# कारक-विभक्त्यर्थाह्निकानां
# *शब्दकौस्तुभ-उद्द्योत*व्याख्ययोः तुलनात्मकमध्ययनम्

(*Kāraka-vibhaktyarthāhnikānām*
*Śabdakaustubha-Uddyotavyākhyayoḥ Tulanātmakamadhyayanam*)

यादवपुरविश्वविद्यालयस्य कलाविभागस्य संस्कृतविभागे

**पि-एच्. डि. (Ph.D.)**

इत्युपाधिलाभाय समर्प्यमाणः शोधप्रबन्धः

गवेषकः

**लक्ष्मीकान्त-मुर्मुः**

मार्गदर्शकः

**प्राध्यापकः डॉ. तपनशङ्करभट्टाचार्य्यः**

**संस्कृतविभागः**

**यादवपुरविश्वविद्यालयः**

कलकाता, पश्चिमबङ्गः

700032

**2023**

# <u>Certified that the Thesis entitled</u>

**कारक-विभक्त्यर्थाह्निकानां *शब्दकौस्तुभ-उद्द्योत*व्याख्ययोः तुलनात्मकमध्ययनम्** (*Kāraka-vibhaktyarthāhnikānām Śabdakaustubha Uddyotavyākhyayoḥ Tulanātmakamadhyayanam.*) submitted by me for the award of the Degree of **Doctor of Philosophy in Arts** at Jadavpur University is based upon my work carried out under the Supervision of **Prof. Dr. Tapan Sankar Bhattacharyya** and that neither this thesis nor any part of it has been submitted before for any degree or diploma anywhere / elsewhere.

(Prof. Dr. Tapan Sankar Bhattacharyya)

**Countersigned by the Supervisor** **Candidate**

Date: Date:

# कृतज्ञतासमर्पणम्

**कारक-विभक्त्यर्थाह्निकानां** ***शब्दकौस्तुभ-उद्द्योत*****व्याख्ययोः तुलनात्मकमध्ययनम्** इति शीर्षकाङ्क्षितस्य शोधप्रबन्धस्यास्य रचनायां बहूनां स्नेहगर्भानां परामर्शकानां तथा एकाधिकप्रतिष्ठानानां साहाय्यं सश्रद्धं स्मरणीयम्।

सर्वादौ अशेषगुणाकारस्य ईश्वरस्य कृपाकटाक्षात् तथा पित्रोराशिषा चिकीर्षितः शोधप्रबन्धः अयं समाप्त इति तेषां चरणारविन्दानि वन्दे। यादवपुरविश्वविद्यालयस्य संस्कृतविभागे पि-एच्. डि. (Ph. D.) इत्युपाधये सर्वथा मे मार्गनिर्देशनं कृतवद्भ्यः सर्वदा च स्नेहाशिषा प्रवृत्तिं विदधद्भ्यः अध्यापकवर्येभ्यो डॉ. तपनशङ्करभट्टाचार्य्यमहोदयेभ्यः कार्तज्ञ्यं विज्ञापयामि। तथा च सर्वेभ्यः यादवपुरविश्वविद्यालयस्य संस्कृतविभागस्य प्रत्यक्षाप्रत्यक्षतया सहायकेभ्यः अध्यापकेभ्यः नितरं कार्तज्ञ्यं निवेदयामि।

विषयेऽस्मिन् रामकृष्ण-मिशन्-विवेकानन्द-शैक्षणिक-शोधसंस्थानस्य संस्कृताध्ययन-विभागे अध्यापकानां ड. गोपीकृष्णन्-रघुमहाभागानां परोक्षापरोक्षरूपेण उत्साहितवतां स्नेहगर्भं साहाय्यम् अपि अनुस्मर्तव्यम्। तान् प्रत्यप्यहं कृतज्ञतां समर्पयामि।

अपि च वाचा सर्वदा प्रोत्साहितवतां रामकृष्ण-मठस्य विशिष्टयतिमहाराजानां स्वामि-वेदतत्त्वानन्द-पुरी-महाभागानां स्नेहगर्भ आशीर्वादोऽपि अनुस्मर्तव्यः, तान् अपि अहं कृतज्ञतां समर्पयामि।

अस्य शोधप्रबन्धस्य लेखनाय यादवपुरविश्वविद्यालयस्थसंस्कृतविभागस्य विभागीयग्रन्थागारस्य ग्रन्थानां निर्बाधं समासादनं कृतमिति तत्रत्येभ्यः अध्यक्षेभ्यः कार्तज्ञ्यं विज्ञाप्यते।

वस्तुतस्तु कुलालचक्रचीवरन्यायेन समेषामेव स्नेहार्पितेनाशिषा उपदेशेन च मम शोधप्रबन्धः सम्पन्नः अतः सर्वेभ्य एवाहं सश्रद्धं कार्तज्ञ्यं विज्ञापयामि।

अपि च अस्मिन् कार्ये सस्नेहं निरतं सहायीभूतेभ्यः मम अग्रजतुल्येभ्यः श्रीमधुसुदन-गराइ (OIC, G.G.D.C. Ranibandh), दिव्येन्दु-राय इति एतेभ्यः तथा च साहाय्यं कृतवद्भ्यः मित्रतुल्यसहाध्येतृभ्यः राहुलगाजी-विष्णुपदपाल-पिण्टुराउल-सौरभदास-त्रिदिवरायमण्डलेभ्यः धन्यताभावसुरभितं समादरप्रसूनं समर्पयामि। अन्तिमे प्रत्यक्षाप्रत्यक्षरूपेण सर्वेभ्यः सहायकेभ्यः अध्यापकेभ्यः, मित्रेभ्यश्च पुनः पुनः भूरिशः कार्तज्ञ्यं विनिवेदयामि।

इति विनयविनीतः

लक्ष्मीकान्त-मुर्मुः

# प्रास्ताविकम्

**“विद्यया रक्षितं राष्ट्रं प्रसीदति न सीदति”** इति वचनं हृदि निधाय विद्यया पृथिवीयं सुरक्षिता भवति, तस्या रक्षणं च विदुषां रक्षणात्। विदुषां रक्षणं च विद्वद्सम्मानादेव। विद्या सर्वजनबोधगम्यः भवेत् तदर्थं विदुषां प्रतिपादनकौशलमपि सर्वदा स्मर्तव्यम्। तेषां सरला शैली विदुषां सम्प्रदाये समादरं जनयति। **कारक-विभक्त्यर्थाह्निकानां *शब्दकौस्तुभ-उद्द्योत*व्याख्ययोः तुलनात्मकमध्ययनम्** इति शीर्षकाङ्कितो मे शोधप्रबन्धः पि-एइच्. डि. (Ph.D.) इत्युपाधये गृहीतः।

पाणिनीयशब्दशास्त्रं नव्यव्याकरणसम्प्रदाये श्रेष्ठत्वं भजते, तस्य मूलं भवति पाणिनीयसूत्रम् *अष्टाध्यायी* इति ग्रन्थः। पाणिनीयसूत्राणाम् *अष्टाध्यायी*ग्रन्थस्य वा बहवः व्याख्यानग्रन्थाः लभ्यन्ते, तेषु एकः भवति श्रीमद्भट्टोजिदीक्षितस्य *शब्दकौस्तुभः* इति ग्रन्थः। ग्रन्थोऽयं साक्षाद् *अष्टाध्यायी* ग्रन्थस्य व्याख्यानग्रन्थः, व्याख्यानक्रमश्च *अष्टाध्यायी* क्रमेण वर्तते, अपि च *प्रदीप*विभूषितस्य *महाभाष्यस्य* व्याख्यानभूतः अयं *शब्दकौस्तुभः* ग्रन्थः। उक्तं च दीक्षितेन– ‘फणिभाषितभाष्याब्धेः *शब्दकौस्तुभ* उद्धृतः’ इति। अपरं च श्रीमद्-पतञ्जलिविरचितस्य *महाभाष्यम्* इति ग्रन्थस्य *उद्द्योत* इति टीका श्रीमन्नागेशभट्टस्य सर्वजनप्रसिद्धः। *शब्दकौस्तुभः* ग्रन्थः *अष्टाध्यायी*ग्रन्थस्य व्याख्यानग्रन्थः, अपरं च *उद्द्योत* इति टीका *अष्टाध्यायी*क्रमेण व्याख्यातः *महाभाष्य*व्याख्यानग्रन्थस्य *प्रदीप*टीकायाः व्याख्यानटीका। अतः उभयोः क्रमः समानः, विषयोऽपि समानः, परन्तु व्याख्याकारौ भिन्नौ, यतो हि *शब्दकौस्तुभ*कारः श्रीमद्भट्टोजिदीक्षितः प्राचीनः, श्रीमन्नागेशभट्टश्च नवीनः। अत्र अवधेयं यद् विषयः समानः परन्तु व्याख्याकारौ भिन्नौ अतः मतभेदं स्यादेव इति मनसि

निधायः विषयोऽयं शोधविषयो स्यात्। परन्तु विस्तरभयात् कारकविभक्तिप्रकरणम् एव शोधप्रबन्धरूपेण स्वीकृतम्।

**शोधपत्रस्य लक्ष्यम्**

*शब्दकौस्तुभ*ग्रन्थस्य आधुनिककाले प्रसिद्धिः प्रचारश्च स्यात्। संस्कृतवाङ्मये तथा व्याकरणसम्प्रदाये ग्रन्थोक्तगूढार्थस्य प्रचारः स्यात्।

*उद्द्योत*टीका तथा *शब्दकौस्तुभ*योः कः भेदः, समानता च इति विषये वैयाकरणसम्प्रदाये अवगमनं स्यात्। सुकुमारमतीनाम् अर्वाचीनां विषयेऽस्मिन् अभिरुचिः वर्धेत, विषयेऽस्मिन् ये जिज्ञासवः सन्ति तेषां साहाय्यं भवेत्।

**शोधपत्रस्यानुसन्धेयविषयाः**

व्याकरणशास्त्रे *उद्द्योत*टीकायाः *शब्दकौस्तुभ*स्य च माहात्म्यम्।

उभयोः तुलनात्मकता।

उभयत्र उक्तानां गूढार्थानां सरलतया प्रतिपादनम्।

*उद्द्योत*स्य तथा *शब्दकौस्तुभ*स्य खण्डनमण्डनविश्लेषणम्।

स्वकीयमतानाम् उपस्थापनं समीक्षणञ्च।

प्रबन्धेऽस्मिन् सप्ताध्यायाः वर्तन्ते, आदौ अध्यायद्वये उपोद्घातः, ग्रन्थपरिचयः तथा ग्रन्थकर्तृपरिचयः, ततश्च तृतीयाध्यायात् सप्ताध्यायपर्यन्तं *शब्दकौस्तुभ-उद्द्योत*व्याख्ययोः तुलनात्मकता समीक्षणञ्च विद्यते।

उपोद्घातः इति प्रथमाध्याये संस्कृतव्याकरणशास्त्रस्य इतिहासः, संस्कृतव्याकरणस्य उत्पत्तिः, संस्कृतव्याकरणस्य भेदाः, पाणिनीतरव्याकरणस्य इतिहासः,

पाणिनीयव्याकरणस्य इतिहासः च प्रतिपादितः वर्तते। द्वितीयाध्याये *शब्दकौस्तुभ*ग्रन्थस्य *उद्द्योत*टीकायाः तत्कर्तुश्च परिचयः। तृतीयाध्याये अपादानात् करणकारकपर्यन्तं द्वाविंशतिसूत्राणां, चतुर्थाध्याये अधिकरणात् कर्तृकारकपर्यन्तं एकादशसूत्राणां, पञ्चमाध्याये विभक्त्यर्थप्रथमाह्निकविमर्शः इत्यत्र सप्तदशसूत्राणां, ततश्च च षष्ठाध्याये विभक्त्यर्थद्वितीयाह्निकविमर्शः इत्यत्र अष्टाविंशतिसूत्राणां, सप्तमाध्याये च विभक्त्यर्थतृतीयाह्निकविमर्शः इत्यत्र अष्टाविंशतिसूत्राणां विषये विश्लेषणं समीक्षणं च प्रतिपादितं वर्तते। अनन्तरम् उपसंहारः वर्तते, तत्र सम्पूर्णस्य शोधप्रबन्धस्य विषयस्य सारः संक्षेपेण प्रतिपादितोऽस्ति। अन्ते च शोधप्रबन्धनिर्माणे परिशीलितसहायकग्रन्थानां सूची निर्मिता, एवंरूपेण शोधप्रबन्धोऽयं सज्जीकृतो वर्तते।

# संङ्केताक्षरसूची

| | |
|---|---|
| अ. वे. | अथर्ववेदः |
| कवि. क. | कविकल्पद्रुमः |
| का. मी. द्वि. भा. | काव्यमीमांसा, द्वितीयभागः |
| का. | काशिका |
| का. वा. | कात्यायनवार्त्तिकम् |
| कौ. धा. | कौमुदीधातुः |
| जै. व्या. | जैनेन्द्रव्याकरणम् |
| तै. सं. | तैत्तिरीय-संहिता |
| प. भा., सं. | परिभाषा., संख्या. |
| प. ल. म. | परमलघुमञ्जूषा |
| प. श. कौ. प. | पस्पशाह्निकशब्दकौस्तुभस्य पर्यालोचनम् |
| पा. प. व्य. | पाणिनीयपदव्यवस्था |
| पा. सू. | पाणिनीयसूत्रम् |
| प्रौ. मनो., का. प्र. | प्रौढमनोरमा, कारकप्रकरणम् |
| बा. रा., उ. का. | बालरामायणम्, उत्तरकाण्डम् |
| बौ. वा. स. | बोद्धार्थवादसमीक्षणम् |
| ब्र. वै. पु. | ब्रह्मवैवर्तपुराणम् |
| महा. भा. उ., द्वि. ख. | पतञ्जलिमहाभाष्योद्द्योतः, द्वितीयखण्डम् |
| महा. भा., प. | महाभाष्यम्, पस्पशाह्निकम् |

| | |
|---|---|
| महा. भा. प्र., द्वि. ख. | पतञ्जलिमहाभाष्यप्रदीपः, द्वितीयखण्डम् |
| महा. भा., श्लो. वा. | पतञ्जलिमहाभाष्यम्, श्लोकवार्तिकम् |
| मु. उ. | मुण्डकोपनिषद् |
| रा., कि. का. | रामायणम्, किष्किन्धाकाण्डे |
| ल. श. शे., का. प्र. | लघुशब्देन्दुशेखरे, कारकप्रकरणम् |
| वा. | वार्तिकम् |
| वा. प., का. | वाक्यपदीयम्, कारिका |
| वा. प., ब्र. का., श्लो. | वाक्यपदीयम्, ब्रह्मकाण्डम्, श्लोकः |
| वा. प., प. का., श्लो. | वाक्यपदीयम्, पदकाण्डम्, श्लोकः |
| वा. प., सा. समु., का. | वाक्यपदीयम्, साधनसमुद्देशः, कारिका |
| वै. प. ल. म. | वैयाकरणपरमलघुमञ्जूषा |
| वै. सि. कौ., द्वि. भा. | वैयाकरणसिद्धान्तकौमुदी, द्वितीयभागः |
| वै. सि. कौ., प्र. भा. | वैयाकरणसिद्धान्तकौमुदी, प्रथमभागः |
| श. कौ., द्वि. ख. | शब्दकौस्तुभः, द्वितीयखण्डम् |
| श. श. प्र. | शब्दशक्तिप्रकाशिका |
| सि. कौ., ग. पा. | सिद्धान्तकौमुदी, गणपाठः |
| स्का. पु., ना. ख. | स्कान्दपुराणम्, नागरखण्डम् |
| स्वा. व्या. | स्वारस्वतव्याकरणम् |
| सं. व्या. शा. का. इति. | संस्कृत व्याकरण शास्त्र का इतिहास |
| है. बृ. वृ. | हैमबृहत्वृत्तिः |

# विषयानुक्रमणिका


| शीर्षकम् | पृष्ठम् |
|---|---|
| शोधनिर्देशक-प्रमाणपत्रम् | ii |
| कृतज्ञतासमर्पणम् | iii |
| प्रास्ताविकम् | v |
| सङ्केताक्षरसूची | viii |
| विषयानुक्रमणिका | x |

**प्रथमोऽध्यायः**

| | |
|---|---|
| **1. उपोद्घातः** | **1-25** |
| 1.1. संस्कृतव्याकरणस्य इतिहासः | 1 |
| 1.2. संस्कृतव्याकरणस्य उत्पत्तिः | 2 |
| 1.3. संस्कृतव्याकरणस्य भेदाः | 4 |
| 1.4. पाणिनीतरव्याकरणस्य इतिहासः | 7 |
| 1.5. पाणिनीयव्याकरणस्य इतिहासः | 15 |

**द्वितीयोऽध्यायः**

| | |
|---|---|
| **2. *शब्दकौस्तुभ*ग्रन्थस्य *उद्द्योत*टीकायाः तत्कर्तुश्च परिचयः** | **26-44** |
| 2.1. श्रीमद्भट्टोजिदीक्षितस्य देशकालकृतिपरिचयः | 26 |
| 2.2. *शब्दकौस्तुभ*ग्रन्थस्य परिचयः | 30 |
| 2.3. श्रीमन्नागेशभट्टस्य देशकालकृतिपरिचयः | 31 |
| 2.4. *महाभाष्य*ग्रन्थस्य *उद्द्योत*टीकायाः च परिचयः | 42 |

**तृतीयोऽध्यायः**

| | |
|---|---|
| **3. अपादानात् करणकारकपर्यन्तं समीक्षणम्** | **45-82** |
| 3.1. कारके | 45 |
| 3.2. ध्रुवमपायेऽपादानम् | 48 |
| 3.3. भीत्रार्थानां भयहेतुः | 56 |
| 3.4. पराजेरसोढः | 57 |
| 3.5. वारणार्थानामीप्सितः | 58 |
| 3.6. अन्तर्धौ येनादर्शनमिच्छति | 59 |

3.7. आख्यातोपयोगे 60
3.8. जनिकर्तुः प्रकृतिः 61
3.9. भुवः प्रभवः 63
3.10. कर्मणा यमभिप्रैति स सम्प्रदानम् 64
3.11. रुच्यर्थानां प्रीयमाणः 65
3.12. श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः 66
3.13. धारेरुत्तमर्णः 67
3.14. स्पृहेरीप्सितः 68
3.15. क्रुधद्रुहेर्ष्याऽसूयार्थानां यं प्रति कोपः 69
3.16. क्रुधद्रुहोरुपसृष्टयोः कर्म 71
3.17. राधीक्ष्योर्यस्य विप्रश्नः 71
3.18. प्रत्याङ्भ्यां श्रुवः पुर्वस्य कर्ता 72
3.19. अनुप्रतिगृणाश्च 72
3.20. साधकतमं कर्म 73
3.21. दिवः कर्म च 78
3.22. परिक्रयणे सम्प्रदानमन्यतरस्याम् 80

## चतुर्थोऽध्यायः

**4. अधिकरणात् कर्तृकारकपर्यन्तं समीक्षणम् 83-111**
4.1. आधारोऽधिकरणम् 83
4.2. अधिशीङ्स्थाऽऽसां कर्म 88
4.3. अभिनिविशश्च 88
4.4. उपान्वध्याङ्वसः 89
4.5. कर्तुरीप्सिततमं कर्म 90
4.6. तथायुक्तं चानीप्सितम् 91
4.7. अकथितञ्च 92
4.8. गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ 101
4.9. हृक्रोरन्यतरस्याम् 105
4.10. स्वतन्त्रः कर्ता 107
4.11. तत्प्रयोजकोहेतुश्च 109

**पञ्चमोऽध्यायः**


| | | |
|---|---|---|
| **5.** | **विभक्त्यर्थप्रथमाह्निकविमर्शः** | **112-149** |
| 5.1. | अनभिहिते | 112 |
| 5.2. | कर्मणि द्वितीया | 116 |
| 5.3. | तृतीया च होश्छन्दसि | 119 |
| 5.4. | अन्यरान्तरेण युक्ते | 120 |
| 5.5. | कालाध्वनोरत्यनतसंयोगे | 122 |
| 5.6. | अपवर्गे तृतीया | 123 |
| 5.7. | सप्तमी-पञ्चम्यौ कारकमध्ये | 124 |
| 5.8. | कर्मप्रवचनीययुक्ते द्वितीया | 125 |
| 5.9. | यस्मादधिकं यस्य चेश्वर-वचनं तत्र-सप्तमी | 128 |
| 5.10. | पञ्चम्यपाङ्-परिभिः | 131 |
| 5.11. | प्रतिनिधि-प्रतिदाने च यस्मात् | 132 |
| 5.12. | गत्यर्थ कर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि | 133 |
| 5.13. | चतुर्थी संप्रदाने | 135 |
| 5.14. | क्रियार्थोपपदस्य च कर्मणि स्थानिनः | 139 |
| 5.15. | तुमर्थाच्च भाववचनात् | 140 |
| 5.16. | नमः स्वस्ति-स्वाहा-स्वधाऽलं वषड् योगाच्च | 141 |
| 5.17. | मन्य-कर्मण्यनादरे विभाषाऽप्राणिषु | 144 |


**षष्ठोऽध्यायः**


| | | |
|---|---|---|
| **6.** | **विभक्त्यर्थद्वितीयाह्निकविमर्शः** | **150-184** |
| 6.1. | कर्तृकरणयोस्तृतीया | 150 |
| 6.2. | सहयुक्तेऽप्रधाने | 152 |
| 6.3. | येनाङ्गविकारः | 154 |
| 6.4. | इत्थंभूतलक्षणे | 155 |
| 6.5. | संज्ञोऽन्यतरस्यां कर्मणि | 158 |
| 6.6. | हेतौ | 159 |
| 6.7. | अकर्तर्यृणे पञ्चमी | 161 |
| 6.8. | विभाषा गुणेऽस्त्रियाम् | 162 |
| 6.9. | षष्ठी हेतुप्रयोगे | 163 |
| 6.10. | सर्वनाम्नस्तृतीया च | 164 |

6.11. अपादाने पञ्चमी 165
6.12. अन्यारादितरर्ते-दिक्छब्दाञ्चूत्तर-पदाजाहि-युक्ते 168
6.13. षष्ठ्यतसर्थप्रत्ययेन 170
6.14. एनपा द्वितीया 171
6.15. पृथग्विनानानाभिस्तृतीयाऽन्य-तरस्याम् 171
6.16. करणे च स्तोकाल्प-कृच्छ-कति-पयस्यसासत्ववचनस्य 172
6.17. दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् 173
6.18. दूरान्तिकार्थेभ्यो द्वितीया च 173
6.19. सप्तम्यधिकरणे च 174
6.20. यस्य च भावेन भाव-लक्षणम् 178
6.21. षष्ठी चानादरे 178
6.22. स्वामीश्वराधिपति-दायाद-साक्षिप्रतिभू-प्रसूतैश्च 179
6.23. आयुक्त-कुशलाभ्यां चासेवायाम् 179
6.24. यतश्च निर्धारणम् 180
6.25. पञ्चमी विभक्ते 180
6.26. साधु निपुणाभ्यामर्चायां सप्तम्यप्रतेः 181
6.27. प्रसितोत्सुकाभ्यां तृतीया च 181
6.28. नक्षत्रे च लुपि 182

**सप्तमोऽध्यायः**

**7. विभक्त्यर्थतृतीयाह्निकविमर्शः 185-218**

7.1. प्रातिपदिकार्थलिङ्ग परिमाणवचनमात्रे प्रथमा 185
7.2. सम्बोधने च 190
7.3. सामन्त्रितम् 191
7.4. एकवचनं संबुद्धिः 192
7.5. षष्ठी शेषे 193
7.6. ज्ञोऽविदर्थस्य करणे 195
7.7. अधीगर्थ-दयेशां कर्मणि 196
7.8. कृञः प्रतियत्ने 197
7.9. रुजार्थानां भाव-वचनानामज्वरेः 197
7.10. आशिषि नाथः 198
7.11. जासि-निप्रहण-नाट-क्राथ-पिषां-हिंसायाम् 199
7.12. व्यवहृ-पणोः समर्थयोः 200

7.13. दिवस्तदर्थस्य 201
7.14. विभाषोपसर्गे 202
7.15. द्वितीया ब्राह्मणे 203
7.16. प्रेष्यब्रुवोर्हविषो देवता-संप्रदाने 203
7.17. चतुर्थ्यर्थे बहुलं छन्दसि 204
7.18. यजेश्च करणे 205
7.19. कृत्वोऽर्थे-प्रयोगे कालेऽधिकरणे 205
7.20. कर्तृ-कर्मणोः कृति 206
7.21. उभय-प्राप्तौ कर्मणि 209
7.22. क्तस्य च वर्तमाने 210
7.23. अधिकरणवाचिनश्च 211
7.24. न लोकव्यय-निष्ठा-खलर्थ-तृणाम् 212
7.25. अकेनोर्थविष्यदाधमण्ययोः 213
7.26. कृत्यानां कर्तरि वा 213
7.27. तुल्यार्थैरतुलोपमाभ्यां तृतीयान्यतरस्याम् 215
7.28. चतुर्थी चाशिष्ययुष्य-मद्र-भद्र-कुशल-सुखार्थ-हितैः 216

**उपसंहारः** **219-221**

**परिशीलितग्रन्थसूची** **i-v**

# प्रथमोऽध्यायः

## उपोद्घातः

### 1.1. संस्कृतव्याकरणस्य इतिहासः

वेदस्य अपौरुषेयत्वं प्राचीनमुनयः ऋषयः सर्वे भारतीयविद्वांसश्च अङ्गीकुर्वन्ति, श्रीभगवान् प्रत्येकं कल्पारम्भे आद्यन्तरहितं नित्यं ज्ञानं प्रयच्छति। तस्माद् वैदिकज्ञानादेव लोकः प्रचलति, तथाहि प्रोक्तं भारतीयेतिहासस्य अद्वितीयज्ञात्रा श्रीकृष्णद्वैपायनवेदव्यासेन-

**अनादिनिधना निधना नित्या वागुत्सृष्टा स्वयम्भुवा।**

**आदौ वेदमयी दिव्या यतः सर्वाः प्रवृत्तयः॥** इति।

सृष्टेः प्रथमावस्थायां पृथिवी आसीत् अग्निपिण्डा, क्रमशः तापस्य ह्रासे प्राणस्य प्रादुर्भावे आदौ एककोशीजीवस्य उन्मेषः, ततश्च शरीरस्य परिवर्तनेन क्रमेण अस्माकं पशुतः मनुष्ये उन्नतिः इति वैज्ञानिकी दृष्टिपरम्परा, ततश्च वाग्व्यवहारः, पदपदार्थज्ञानं, वैदिकलौकिकभाषाज्ञानं, चतुर्दशविद्याग्रहणमेवंप्रकारेण अस्माकं विकाशः। परन्तु "वेदोऽखिलो धर्ममूलं" इति वचनमनुसृत्य अखिलधर्ममूलं शब्दराशिः वेद एव अस्मान् प्रवर्तयति प्रवृत्तिमार्गे, तादृशस्य वेदस्य ज्ञानाय अपेक्षते वेदाङ्गानां ज्ञानम्। वेदस्य षडङ्गेषु अन्यतमं स्वीकृतमाचार्यैः "मुखं व्याकरणं स्मृतम्" इति। "प्रधाने च कृतो यत्नः फलवान् भवति।" तथाहि व्याकरणं वेदस्य सुरक्षार्थं प्रयोजनं भवति, महाभाष्ये प्रोक्तं- "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" इति। व्याक्रियन्ते व्युत्पाद्यन्ते शब्दाः अनेन इति व्याकरणम्, वि-आङ्-पूर्वकात् कृधातोः करणे ल्युट्-प्रत्यये व्याकरणशब्दस्य निष्पत्तिः।

प्रकृतिप्रत्ययादिभिः शब्दस्य व्युत्पत्तिः साधुत्वनिष्पत्तिः येन शास्त्रेण क्रियते तच्छास्त्रं व्याकरणम्। व्याक्रियन्ते विविच्यन्ते असाधुशब्देभ्यः साधुशब्दाः पृथक् क्रियन्ते इति वा व्याकरणम्।

तदुक्तं हरिणा-

"साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः।" इति।

अपि च अर्थावगत्यर्थं वक्तारः शब्दप्रयोगं कुर्वन्ति। अर्थज्ञानं च वृत्तिज्ञानं विना न सम्भवति।

वृत्तिग्राहकेषु अन्यतमं भवति व्याकरणं यथा भणितं प्राचीनैः-

**शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्यात् व्यवहारतश्च।**

**वाक्यस्य शेषाद् विवृतेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धाः॥** इति।

एवं प्रकारेण लोकवेदयोः उपकारकत्वात् व्याकरणं महोपयोगि।

तथा च श्रूयते लोके-

**काणादं पाणिनीयं च सर्वशास्त्रोपकारकम्।** इति।

## 1.2. संस्कृतव्याकरणस्य उत्पत्तिः

व्याकरणस्य उत्पत्तिविषये विदुषां महान् संशयः विद्यते, ऋग्वेदपाठे अस्य किञ्चित् निदर्शनं दृश्यते। वाल्मीकीयरामायणे हनुमतः वाक्पटुता प्रोक्तास्ति-

**नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।**

**बहु व्याहतानेन न किञ्चितदपभाषितम्॥**[1] इति।

---

[1] रा., कि. का., ३/२९.

एतेन ज्ञायते यत् रामचन्द्रकाले व्याकरणस्य सुव्यवस्थितं पठनपाठनमासीत्। यास्काचार्येण शाकटायनव्याकरणस्य उल्लेखः पूर्वमेव कृतः, तथापि पुराकल्प एतदासीत्- "संस्कारोत्तरकालं ब्राह्मणा व्याकरणं स्माधीयते" इति*महाभाष्य*वचनानुसारेण ज्ञायते यत् प्राचीनकालादेव व्याकरणस्य चर्चा आसीत्।

इतोऽपि प्रमाणं यथा मुण्डकोपनिषदि-

**"द्वे विद्ये वेदितव्ये...,**

**शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति"**[2] इति।

गोपथब्राह्मणे[3] कतिचनसंज्ञाविषये, ऐतरेयब्राह्मणे[4] विभक्तिविषयज्ञानं, महाभारते उद्योगपर्वणि[5] च इत्यादिप्राचीनग्रन्थादिषु दृश्यते।

व्याकरणस्य प्रथमः प्रवक्ता ब्रह्मा, तथाहि ऋक्तन्त्रप्रातिशाख्ये पठ्यते-

**ब्रह्मा बृहस्पतये प्रोवाच, बृहस्पतिरिन्द्राय,**

**इन्द्रो भरद्वाजाय, भरद्वाज ऋषिभ्यः, ऋषयो ब्राह्मणेभ्यः,**

**तं खल्विममक्षरसमाम्नायमित्याचक्षते।**[6] इति।

ततश्च प्रवक्ता बृहस्पतिः यथा भाष्ये-

**बृहस्पतिरिन्द्राय दिव्यं वर्षसहस्रं**

**प्रतिपदोक्तानां शब्दानां शब्दपारायणं प्रोवाच।**[7] इति।

---

[2] मु. उ., १.१. मन्त्र. ४, ५.

[3] १/१४.

[4] ७/७.

[5] ४३/६१.

[6] ऋक्तन्त्रे, १/४.

एवं भाष्यानुसारेण व्याकरणस्य आदि संस्कर्ता इन्द्रः इति मन्यते यथा तैत्तिरीयसंहितायां दृश्यते-

**वाग्वै पराच्यव्याकृतावदत्। ते देवा इन्द्रमब्रुवन्,**

**इमां नो वाचं व्याकुर्विति.....तामिन्द्रो मध्यतोऽवक्रम्य व्याकरोत्।**[8] इति।

### 1.3. संस्कृतव्याकरणस्य भेदाः

व्याकरणशास्त्रस्य द्वौ सम्प्रदायौ, यथा ऐन्द्रः, माहेश्वरः शैवः वा इति। कातन्त्र-व्याकरणम् ऐन्द्रसम्प्रदायस्य, पाणिनीयव्याकरणं शैवसम्प्रदायस्य। किन्तु सामान्यतः व्याकरणं त्रिधा विभक्तुं शक्यते। छान्दसमात्रं, लौकिकं, छान्दसलौकिकञ्चेति। तत्र छान्दसं प्रातिशाख्यादि, लौकिकं कातन्त्रादि, छान्दसलौकिकञ्च पाणिन्यादि इति।

पाणिनेः प्रागनेके वैयाकरणाः आसन् इति तु स्पष्टतया ज्ञायते, प्रायेण पञ्चाशीतिः व्याकरणप्रवक्तारः समजायन्तेति युधिष्ठिरमीमांसकानां मतम्[9]। तेषु पञ्चाशीतिव्याकरणप्रवक्तृषु षड्विंशतिसंख्यकानामाचार्याणामुल्लेखो दरीदृश्यते। तेषु केषाञ्चन आचार्याणां नामोल्लेखः पाणिनिना कृतोऽस्ति यथा- "तृषिमृषिकृषेः काश्यपस्य"[10], "अङ्गार्ग्यगालवयोः"[11], "ई३चाक्रवर्मणस्य"[12], "ऋतो भारद्वाजस्य"[13],

---

[7] महा. भा., प., १/१/१.

[8] तै. सं., ६/४/७.

[9] सं. व्या. शा. का. इति., Vol.1., सम्पा. युधिष्ठिरमीमांसकः, पृ. ६७.

[10] पा. सू. १/२/२५.

[11] पा. सू. ७/३/९९.

[12] पा. सू. ६/१/१३०.

“इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च”[14], “गिरेश्च सेनकस्य”[15], “अवङ् स्फोटायनस्य”[16], “त्रिप्रभृतिषु शाकटायनस्य”[17] इत्येतेषु पाणिनीयसूत्रेषु कश्यप-गार्ग्य-गालव-चाक्रवर्मण-भारद्वाज-स्फोटायन-शाकटायनप्रमुखाः शब्दविशारदाः समाद्रियन्ते। किन्तु पाणिनेः “उदीचाम्”, “प्राचाम्” इत्यादिपादानां प्रयोगेन ज्ञायते यद् इतोऽपि बहवो वैयाकरणप्राचार्याः आसन् इति।

इदानीं प्रसिद्धेषु नव वा अष्टौ वा व्याकरणानि इति विदुषां समाजे प्रसिद्धिः। तत्रापि मतभेदाः दृश्यन्ते।

तद्यथा-

श्रीतत्त्वविधिनामके वैष्णवग्रन्थे नव व्याकरणानामुल्लेखो विद्यते-

**ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।**

**सारस्वतं चापिशलं शाकल्यं पाणिनीयकम्॥**[18] इति।

एवमेव रामायणेऽपि नव व्याकरणानां चर्चा विद्यते-

**सर्वासु विद्यासु तपोविधाने पस्पर्धतेऽयं हि गुरुं सुराणाम्।**

**सोऽयं नवव्याकरणार्थवेत्ता ब्रह्मा भविष्यत्यपि प्रसादात्॥**[19] इति।

---

[13] पा. सू. ७/२/६३.

[14] पा. सू. ६/१/१२७.

[15] पा. सू. ५/४/११२.

[16] पा. सू. ६/१/१२३.

[17] पा. सू. ८/४/५०.

[18] श्रीतत्त्वविधौ. व्या. शा., पृ. २२.

[19] बा. रा., उ., श्लो. ४७.

अर्वाचीनास्तु ग्रन्थकृतः अष्टावेव शाब्दिकान् सङ्गिरन्ते। यथा हैमबृहद्वृत्यवचूर्णिकृतः-

**ब्राह्मपैशानमैन्द्रञ्च प्राजापत्यं बृहस्पतिम्।**

**त्वाष्ट्रमापिशलं चेति पाणिनीयमथाष्टकम्॥**[20] इति।

एवमेव वोपदेवोऽपि अष्टौ शाब्दिकान् स्वीकृतवान्। यथा-

**इन्द्रश्चन्द्रः काशकृत्स्नाऽऽपिशली शाकटायनः।**

**पाणिन्यमरजैनेन्द्राः जयन्त्यष्टादिशाब्दिकाः॥**[21] इति।

दुर्गाचार्योऽपि **"व्याकरणमष्टमप्रभेदम्**[22]**"** इत्येवाभिधत्ते। मतान्तरे-

**यस्मिन् व्याकरणान्यष्टौ निरूप्यन्ते महान्ति च**

**तत्राद्यं ब्राह्ममुदितं द्वितीयं चान्द्रमुच्यते॥**

**तृतीयं याम्यमाख्यातं चतुर्थं रौद्रमुच्यते।**

**वायव्यं पञ्चमं प्रोक्तं षष्ठं वारुणमुच्यते।**

**सप्तमं सौम्यमाख्यातमष्टमं वैष्णवं तथा॥**[23] इति।

---

[20] है. बृ. वृ., प्रारम्भे.

[21] कवि. क. प्रारम्भे.

[22] दुर्गनिरुक्तवृत्तिः., आनन्दाश्रमसंस्करणं, पृ. ७४.

[23] सं. व्या. शा. का. इति., Vol.-1., सम्पा. युधिष्ठिरमीमांसकः, पृ. २१, २२.

## 1.4. पाणिनीतरव्याकरणस्य इतिहासः

### ऐन्द्रव्याकरणम्

“ब्रह्मणः प्राप्तव्याकरणगमः, बृहस्पतिरिन्द्राय शब्दपारायणं प्रोवाच”[24], इन्द्रस्तु प्रागव्याकृतां वाचं प्रकृतिप्रत्ययविभागपुरस्सरं सखण्डामकरोत्।

तथा च श्रुतिः-

“वाग्वै पराच्यव्याकृतावत्। ते देवा इन्द्रमब्रुवन्, इमां नो वाचं व्याकुर्विति ....तामिन्द्रो मध्यतोवक्रम्य व्याकरोत्”[25] इति। अत्रैव च सायणाचार्यः- ‘तामखण्डां वाचं मध्ये विच्छिद्य प्रकृतिप्रत्ययविभागं सर्वत्राकरोत्।’ इति एवम् अनुशीलनेन ज्ञायते यत् व्याकरणस्यादिमसंस्कर्ता इन्द्र आसीत्। कश्यपाज्जातोऽयं बृहस्पतेः शिष्यः। तत्र “बृहस्पतिरिन्द्राय दिव्यं बर्षसहस्रम्”[26] इत्यादि भाष्यवचनं प्रमाणम्। प्रायः विक्रमपूर्वं पञ्चशतोत्तरनवसहस्रम् अस्य कालः इति युधिष्ठिरमीमांसका[27] अभिप्रयन्ति। व्याकरणस्यास्य स्वरूपम् अज्ञातमपि हरिश्चन्द्रस्य चरकव्याखायाः “शास्त्रेष्वपि अथ वर्णसमूह इति ऐन्द्रव्याकरणस्य” इति वचनात् युधिष्ठिरमीमांसकाः ऐन्द्रव्याकरणस्य आदिमं सूत्रम् उदाहरन्ति। “अथ वर्णसमूहः”[28] इति। एवम् ऐन्द्रव्याकरणम् अति विस्तृतमासीत् इति। तथाहि- यान्युज्जहार माहेन्द्राद् व्यासो व्याकरणार्णवात्। पदरत्नानि किं तानि सन्ति पाणिनिगोष्पदे इति तिब्बतीयग्रन्थानुसारम् ऐन्द्रव्याकरणस्य परिमाणं

---

[24] महा. भा., प.

[25] तै. स. ६.४.७.

[26] तै. स. ६.४.७.

[27] सं. व्या. शा. का. इति., Vol. 1., सम्पा. युधिष्ठिरमीमांसकः, पृ. ८३.

[28] तत्रैव.

पञ्चविंशतिसहस्रश्लोकात्मकम् आसीत्।[29] यद्यपि ऐन्द्रव्याकरणं नष्टम् अभवत् तथापि कतिचन सूत्राणि प्रामाणिकैः आचार्यैः उद्धृतानि। तथाहि- 'अथ वर्णसमूहः', 'अर्थं पदम्', 'सं प्रयोगः प्रयोजनम्' इत्यादि ऐन्द्रेऽभिहितम्। एतद् व्याकरणं परिभाषामूलम् आसीत्[30]।

**चान्द्रव्याकरणम्**

चान्द्रव्याकरणं पाणिनीयव्याकरणात् परकालिकं भर्तृहर्यनुसारं चन्द्राचार्यः लुप्तप्रायं व्याकरणागमं पुनः प्रचारयति स्म। तथाहि-

**पर्वतादागमं लब्ध्वा भाष्यबीजाऽनुसारिभिः।**

**स नीतो बहुशाखात्वं चन्द्राचार्यादिभिः पुनः।।**[31] इति ।

चान्द्रव्याकरणस्येदं वैशिष्ट्यम्- यदत्र व्याकरणे परिभाषिकसंज्ञाया आश्रयणं न कृतमस्ति तथाहि- "चन्द्रोपज्ञमसंज्ञकं व्याकरणम्" इति।

स्वयं चन्द्राचार्यः स्वोपज्ञवृत्तौ प्राह- "लघुविस्पष्टसम्पूर्णमुच्यते शब्दलक्षणम्" इति।

अतः पाणिनीयव्याकरणापेक्षयाऽस्य लघुत्वं स्पष्टत्वं वाऽऽयाति अत्र ग्रन्थे वार्त्तिकं नास्ति, सूत्रेष्वेव हि सर्वं प्रतिपादितमस्ति एतद्व्याकरणं प्रायेण *महाभाष्य*मनुसरति[32]।

---

[29] तदेव, पृ. ९३.

[30] पा. प. व्य., पृ. ७.

[31] वा. प., द्वि. का., श्लो. १८९.

[32] पा. प. व्य. पृ. ८.

**काशकृत्स्नव्याकरणम्**

महाभाष्ये पस्पशाह्निके- 'पाणिनिना प्रोक्तं पाणिनीयम्, आपिशलं, काशकृत्स्नम्' इत्युक्तम्। अत आपिशलव्याकरणवदस्य व्याकरणस्यापि पाणिनिव्याकरणापेक्षया प्राचीनत्वमायाति।

युधिष्ठिरमीमांसकमहोदयानुसारं काशकृत्स्नस्यैव संक्षिप्तं रूपं "कातन्त्रम्"[33] इति अस्य ग्रन्थत्रयमुपलभ्यते काशकृत्स्नतन्त्रं, काशकृत्स्नधातुपाठः, मीमांसाशास्त्रञ्चेति। भृगुवंशीयकाशकृत्स्नस्यापत्योऽयं प्रायः वि.पू. ३१०० कालिकः इत्यनुमीयते युधिष्ठिरमीमांसकैः[34]। अस्य व्याकरणस्य वैशिष्ट्यम्- "काशकृत्स्नं गुरुलाघवम्" अर्थाद् गौरवं लाघवं च विचिन्त्यैव एतच्छास्त्रं प्रवृत्तम्। प्रसिद्धाऽप्रसिद्धयोः चिन्तनं विहितमस्ति।

**आपिशलव्याकरणम्**

भगवान् पाणिनिः अष्टाध्याय्यां "वा सुप्यापिशालेः"[35] इति सूत्रे आपिशल्याचार्यं स्मरति। तथा च *महाभाष्ये, काशिकायां, न्यासे, प्रदीपे* च स्मृतोऽस्ति। पाणिनिना "आपिशलिः" शब्दः कौण्ड्यादिगणे[36] अपाठि। अतः आपिशलिः पाणिनेः नातिदूरवर्तीति युधिष्ठिरमीमांसका आमनन्ति। "शिक्षा आपिशलीयादिका" इति राजशेखरस्य वचनेन अस्य शिक्षाग्रन्थोऽपि आसीदिति ज्ञायते[37]। एतत् सर्वं विज्ञाय अस्य कालः वि.पू. ३००० इति युधिष्ठिरमीमांसकाः कथयन्ति।

---

[33] सं. व्या. शा. का. इति., Vol. 1., पृ. ६१५.

[34] तदेव, पृ. १०६.

[35] पा. सू. ६-१-९२.

[36] सि. कौ., ग. पा. (४-१-८०).

[37] का. मी., द्वि. भा., सम्पा. मधुसुदनमिश्र, पृ. १३३.

अस्मिन् व्याकरणेऽपि अष्टौ अध्यायाः भवन्ति। तदाह आचार्यपाल्यकीर्तिः- "अष्टक आपिशलपाणिनीये", "आपिशलमधीते आपिशला ब्राह्मणी" इति भाष्यवचनेन प्रतीयते यत् पतञ्जलिकालेऽपि व्याकरणस्यास्य महान् प्रचार आसीत्।

आपिशलव्याकरणन्तु इदानीं न प्राप्यते, किन्तु तस्य सूत्राणि कानिचित् मिलन्ति यत्र तत्र तथाहि- "धेनो रञः"[38], "मन्यकर्मण्यनादरे विभाषाऽप्राणिषु"[39], "तुरुस्तुशम्यमः सार्वधातुकासु छन्दसि" इत्यादीनि।

आपिशलव्याकरणं पाणिनीयव्याकरणमिव सर्वाङ्गपूर्णं ततोऽपि विस्तृतमुभयविधशब्दानामन्वाख्यायकमासीत्। अत एव सूत्र-संज्ञा-प्रत्यय-प्रत्याहारादिषु आपिशालपाणिनीयव्याकरणयोः सादृश्यं संलक्ष्यते।

**शाकटायनव्याकरणम्**

*अष्टाध्यायां* शाकटायनस्य त्रिवारं (लङः शाकटायनस्यैव[40], व्योर्लघुप्रयत्नतरः शाकटायनस्य[41], त्रिप्रभृतिषु शाकटायनस्य[42]) नाम आयाति। अत एव चास्यापि पाणिनिप्राग्भावित्वं सिध्यति केचन एनं काण्वशिष्य इति कथयन्ति। अन्ये काण्वापराभिधानम्। एतद्व्याकरणमतिविशालमासीत्, यतो हि शाकटायनमते सर्वेऽपि

---

[38] काशिकान्यासः. ४-२-४५., 'एवं कृत्वाऽऽपिशलेः......धेनोरञ' एतद्धि तत् सूत्रम्.

[39] काशिकापदः. २-३-१७., 'मन्यकर्मण्यनादरे विभाषाप्राणिषु' इति आपिशलिः अधीते स्म, न तत्र प्रतिषेधापेक्षा.

[40] पा. सू. ३-४-१११.

[41] पा. सू. ८-३-१८.

[42] पा. सू. ८-४-५०.

शब्दाः व्युत्पन्नाः सन्ति पाणिनिमते तु कानिचित् प्रतिपदिकानि अव्युत्पन्नान्यपि सन्ति। सर्वं नाम धातुजमिति शाकटायनसिद्धान्तादेव उभयविधशब्दानामन्वाख्यायकमेतद्व्याकरणम्।

शाकटायनव्याकरणस्यैवाङ्गभूतमुपलभ्यमानमुणादिसूत्रम्[43]। अस्मिन् व्याकरणे बहूनां शब्दानामन्वाख्यानमनेकैः धातुभिः क्रियते[44]। एतेः कारितं च यकारादिं चान्तरकरणमस्तेः शुद्धं च सकारादिं च इति निरुक्तस्य दुर्गाचार्यकृतव्याख्यया ज्ञायते यत् सत्यशब्दस्य निरुक्तिः "इण् गतौ" "अस् भुवि" इति धातुद्वयेन शाकटायने कृता।

शाकटायनमते त्रयीशब्दानां प्रवृत्तिः तदाह- "तदेवं निरुक्तकारशाकटायनदर्शनेन त्रयीशब्दानां प्रवृत्तिः, जातिशब्दाः, गुणशब्दाः, क्रियाशब्दाः इति, न सन्ति यदृच्छाशब्दा" इति।

शाकटायने अच्छश्रदन्तरशब्दानामपि उपसर्गत्वं स्वीक्रियते।

तथाहि-

"अच्छश्रदन्तरित्येतान् आचार्यः शाकटायनः।
उपसर्गान् क्रियायोगान् मेने ते तु त्रयोऽधिका"।।[45] इति ।

**सारस्वतव्याकरणम्**

सरस्वतीप्रसादात् प्राप्तं व्याकरणम्-सारस्वतव्याकरणमिति कथ्यते। अस्य कर्तृविषये नामद्वयमुपस्थितं भवति "अनुभूतिस्वरूपाचार्यः"[46] "नरेन्द्राचार्यः"[47] इति।

---

[43] 'एवं च कृते वा पेति उणादिसूत्राणि शाकटायनस्येति सूचितम्'. (म. भा. उ. ३-३-१).

[44] शाकटायनाचार्योऽनेकैश्च धातुभिरेकाभिधानम् ऊहितवान्- एकेन चैकम् निरुक्तटीका. १-१३ उद्धृतः सं. व्या. शा. का. इति., Vol. I., सम्पा. युधिष्ठिरमीमांसकः, पृ. १८०.

[45] तदेव, पृ. १८१.

[46] स्वा. व्या., सम्पा. वासुदेवशर्मा, पृ. २६४.

सारस्वतव्याकरणस्य प्रथमवृत्तेः अन्ते अनुभूतिस्वरूपाचार्यस्य नाम नोल्लिखितं, किन्तु द्वितीयतृतीयवृत्तौ तस्य नाम उल्लिख्यते। तदेवं वक्तुं शक्यते, यत् सप्तशतसूत्रात्मिकायाः प्रथमवृत्तेः रचयिता नरेन्द्राचार्यः, अन्त्ययोः वृत्त्योस्तु अनुभूति स्वरूपाचार्य इति। यथा च बाणभट्टतत्पुत्राभ्यां रचिता कादम्बरी बाणभट्टनाम्ना प्रसिद्ध्यति तथा नरेन्द्राचार्यनाम्ना सारस्वतव्याकरणस्य प्रसिद्धिर्न विरुध्यते।

अस्य व्याकरणस्य पाठद्वयम् उपलभ्यते, द्वयोरनयोः पाठयोः प्रायेणाष्टाशतसूत्राणां न्यूनाधिक्यं परिलक्ष्यते परिबृंहितपाठस्य सिद्धान्तचन्द्रिकानाम्ना प्रसिद्धस्य परिबृंहणं रामाश्रमभट्टेन विहितम्। सारस्वतव्याकरणस्य विद्यमानासु नैकासु टीकासु क्षेमेन्द्रटीप्पणी अतिप्रसिद्धा।

**जैनेन्द्रव्याकरणम्**

जिनेन्द्रेण प्रोक्तस्य व्याकरणस्य संस्करणद्वयमुपलभ्यते- औदीच्यं दाक्षिणात्यं च। औदीच्यसंस्करणे प्रायः सहस्रद्वयसंख्या विद्यते। दाक्षिणात्यसंस्करणे तु सप्तशतसूत्राण्यधिकानि भवन्ति।

अस्मिन् व्याकरणे एकशेषप्रकरणं नारभ्यते। तदुक्तम् "देवोपज्ञमनेकशेषव्याकरणम्"[48] इति। एतच्च *महाभाष्या*नुकरणम्[49]। पाणिनीयव्याकरणवद् अल्पाक्षरसंज्ञानां समादरः कृतोऽस्ति।

---

[47] 'इति नरेन्द्राचार्यकृते सारस्वते' क्षेमेन्द्रटिप्पणम् सार. प्रक्रियायाः अन्ते. (उद्धृतः सं. व्या. शा. का. इति., Vol. I. सम्पा. युधिष्ठिरमीमांसकः, पृ. ७०७).

[48] जै. व्या., सू. १-४-९७.

[49] अशिष्य एकशेष एकेनोक्तत्वात्, म. भा. १-२-६४, वा. २९.

एतद्व्याकरणमपि पाणिनीयवद् विद्यते, अस्य वृत्तिग्रन्थेषु उभयनन्दीकृता महावृत्तिः प्रसिद्धतमा विद्यते। पर्यालोचनेन ज्ञायते यत्, अस्यापि व्याकरणस्य मुख्याधारः पाणिनिव्याकरणमेव। एतद्व्याकरणे षण्णां[50] प्राचीनजैनाचार्याणां नामानि स्मृतानि। आचार्यश्रुतकीर्तिः जैनेन्द्रव्याकरणे पञ्चवस्तुनामकं प्रक्रियाग्रन्थं रचितवान् अन्तेऽसौ जैनेन्द्रव्याकरणमित्थं वर्णयति-

**सूत्रस्तम्भसमुद्धृतं प्रविलसन् न्यासोरुरत्नक्षितिः**

**श्रीमद्वृत्तिकपाटसम्पुटयुगं भाष्योऽथ शय्यातलम्।**

**टीकामालमिहारुरुक्षुरचितं जैनेन्द्रशब्दागमं**

**प्रासादं पृथुपञ्चवस्तुकमिदं सोपानमारोहतात्॥** इति[51] ।

**अमरव्याकरणम्**

अमरसिंहस्य नामलिङ्गाऽनुशासनं संस्कृतजगति विश्रुतं विद्यते। अस्य महत्त्वमुद्गन्ती सूक्तिः प्रथिता आस्ते- "*अष्टाध्यायी* जगन्माताऽमरकोशो जगत्पिता" इति।

अमरकृतं नूनं किञ्चिद्व्याकरणं स्वतन्त्रं महाभाष्याऽनुकरणकारि आसीदिति श्लोकार्धेनानुमीयते।

यथा-

"अमरसिंहो हि पापीयान् सर्वं भाष्यमचूचुरत्"[52] इति।

---

[50] गुणे श्रीदत्तस्त्रीयाम् (१९-४-३४), कृवृषिमिजां यशोभद्रस्य (२-१-९९), राद् भूतबलेः (३-४-८३), रात्रेः कृतिप्रभावचन्द्रस्य (४-३-१८०), वेतेः सिद्धसेनस्य (५-१-७), चतुष्टयं समन्तभद्रस्य (५-४-४८०).

[51] पा. प. व्या., पृ. ११, १२.

[52] तत्रैव (उद्धृतः).

**कातन्त्रव्याकरणम् (कौमारम्)**

कातन्त्रव्याकरणमेव कौमारव्याकरणमुच्यते। कुमाराणामिदं कौमारमिति व्युत्पत्तेः। एतद्व्याकरणं सुकुमारबुद्धीनां कुमाराणां प्रारम्भिकं ज्ञानं सम्पादयति अथवा कुमाराणां कार्तिकेयभगवत्पादानाम् आज्ञया शर्ववर्मणा कृतं व्याकरणं कौमारम्। तदाह "तत्र भगवत्कुमारप्रणीतं सूत्रानन्तरं तदाज्ञयैव श्रीशर्ववर्मणा प्रणीतं सूत्रं कथमनर्थकं भवति"[53] इति अन्यत्र स्वतन्त्रकौमारमासीदिति विषये किमपि प्रमाणं नोपलभ्यन्ते।

कातन्त्रव्याकरणे द्वौ पाठौ भवतः, वृद्धपाठः लघुपाठश्च। अस्य व्याकरणस्य द्वौ भागौ- आख्यातभागः कृत्प्रकरणं च। कात्यायनद्वारा कृत्प्रकरणस्य समावेशे सत्यपि कतिपयन्यूनतानिवारणार्थं श्रीपतिदत्तेन कातन्त्रपरिशिष्टस्य रचना कृता। एतद्विषये युधिष्ठिरमीमांसकविवेचनं स्वस्य "संस्कृतव्याकरणशास्त्र का इतिहास" नामके ग्रन्थे कृतम्।

**शाकल्यव्याकरणम्**

शाकल्यस्य पुत्रः शाकल्यः। पाणिनिना स्मृतेषु पूर्वाचार्येषु अन्यतमः। अयम् *अष्टाध्याय्यां* चतुष्कृत्वः स्मरणं कृतम्[54]। अयं शौनकेन, कात्यायनेन, पतञ्जलिना स्मृतोऽस्ति। असौ वेदसंहितायाः प्रवक्ता। पदपाठस्य कर्तापि आसीदिति ग्रन्थेषु स्मर्यते। प्रायः अस्य कालः वि. पू. 3100 इति युधिष्ठिरमीमांसकाः आमनन्ति। अस्य व्याकरणे वैदिकलौकिकशब्दानाम् अन्वाख्यानम् आसीदित्यपि ज्ञायते। वायुपुराणे- शाकल्यः पदविमत्तः इति कथ्यते।

---

[53] सं. व्या. शा. का. इति., Vol. I., सम्पा. युधिष्ठिरमीमांसकः, उद्धृतः, पृ. ६१२.

[54] सम्बुद्धौ शाकल्यस्येतावनार्षे (पा. सू. १-१-१६), इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च (पा. सू. ६-१-१२७), लोपः शाकलस्य (८-३-१९), सर्वत्र शाकल्यस्य (८-४-५१).

तथाहि-

**वेदमित्रस्तु शाकल्यो महात्माः द्विजसत्तमः।**

**चकार संहिताः पञ्च बुद्धिमान् पदवित्तमः॥**[55] इति।

### 1.5. पाणिनीयव्याकरणस्य इतिहासः

विश्वस्मिन् विश्वे सर्वासां प्राचीनानामर्वाचीनानां वा भाषाणां यावन्ति व्याकरणानि सन्ति, तानि सर्वाणि पाणिनिव्याकरणमतिशेरते। एतावाति महत्त्वे सति वक्तुं शक्यते यत् लौकिकवैदिकोभयविधशब्दतत्त्वप्रदर्शकं पाणिनीयव्याकरणं मूर्धन्यभिषिक्तं राराजते। व्याकरणमिदं सर्वाङ्गसुन्दरं सूक्ष्मचिन्तनोद्भासितम् अद्भुतप्रतिभानिदर्शनं सूक्ष्मपदार्थप्रतिभासकं वर्तते। अपि च युगोपयोगितया परितोषितं, परिवर्धितं, संयोजितं, परिवर्तितमिति, अतः अस्य प्रचारः, प्रसारः सर्वदा महान् विद्यते। तदुक्तं पतञ्जलिना "सर्ववेदपारिषदं हीदं शास्त्रम्"[56] इति। अत एव समग्रस्य पाणिनीयव्याकरणस्योपादेयत्वं मुक्तकण्ठेन पुराणेषु प्रतिपादितम्।

तथाहि-

**पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम्।**

**सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चन॥** इति।

केचिच्च अस्य व्याकरणस्य अइउण्-प्रभृतीनि आधारभूतानि चतुर्दश सूत्राणि महेश्वरप्रसादाल्लब्धानीति एतानि श्रुतिपदवाच्यानि भवन्ति इति अस्य व्याकरणस्य श्रुतिमूलकत्वाद् वेदाङ्गत्वमित्थं स्वाभिप्रायं व्यञ्जन्ति।

---

[55] प. श. कौ. प., सम्पा. ड. सुबोध शर्मा, पृ. ८.

[56] महा. भा., २/१/५८.

तदुक्तं नागेशेन *लघुशब्देन्दुशेखरे*-

**“श्रुतिमूलकत्वादस्यैव वेदाङ्गत्वम्।”** इति।

पाणिनीयव्याकरणं त्रिमुनिव्याकरणमिति उच्यते, पाणिनि-कात्यायन-पतञ्जलिभिः त्रिभिः मुनिभिः कृतकत्वात्। मुनित्रयपर्यालोचनेनैव अस्य व्याकरणस्य त्रिमुनित्वं बोद्धुं शक्यते इति तदधस्ताद् उपन्यस्यते।

**पाणिनिः**

पणिनोऽपत्यमित्यर्थे पणिन् शब्दात् “तस्यापत्यम्” (पा. सू. ४/१/९२) इति सूत्रेण अण्-प्रत्यये “तद्धितेष्वचामादेः” (पा. सू. ७/२/११७) इति सूत्रेणादिवृद्धौ पाणिन् इति जाते ततो युवापत्यमित्यर्थे “अत इञ्” (पा. सू. ४/१/९५) इति सूत्रेणाञ्प्रत्यये पाणिनिरिति रूपं सिद्ध्यति, एतेन ज्ञायते पणिनः अपत्यमिति। अस्य महर्षेः पाणिनिः, शालातुरीयः, दाक्षिपुत्रः इति प्रसिद्धानि नामानि सन्ति। जन्म शालातुरेऽभवदिति ज्ञायते, वर्तमाने लाहोरः लाहुरः वा इत्यनुमीयते, कालः आनुमानिकः २८००-५०० ई. पू. मध्ये कदाचित् आसीदिति वक्तुं शक्यते। अयं विद्वान् आवैदिककालात् लौकिकीं वैदिकीं च भाषामधिकृत्य आपिशलप्रभृतीनां वैयाकरणानां शास्त्रीयमतानि पर्यालोच्य ***“अष्टाध्यायी”*** नामकं ग्रन्थं विरचितवान्। सूत्रनिबन्धोऽयं ग्रन्थः।

सूत्रञ्च-

**अल्पाक्षरमसन्दिग्धं सारवद्विश्वतोमुखम्।**

**अस्तोऽभमनवद्यं च सूत्रं सूत्रविदो विदुः॥** इति।

***“अष्टाध्यायी”*** नामको ग्रन्थः अष्टसु अध्यायेषु विभक्तः, पुनः प्रत्यकं अध्यायः चतुर्षु पादेषु विभक्तः। पुनः अयं ग्रन्थः विषयमाधारीकृत्य विद्वद्भिः त्रिधा विभक्तम्।

यथा-

१. वाक्येभ्यः पदानां सङ्कलनम् प्रथमाध्याये द्वितीये च।

२. पदानां प्रकृतिप्रत्ययविभागः तृतीयचतुर्थपञ्चमाध्यायेषु।

३. प्रकृतिप्रत्ययैस्सह आगमादेशानां संयोजनेन परिनिष्ठितपदानां निर्माणञ्च षष्ठसप्तमष्टमाध्यायेषु इति[57]।

लाघवविधानार्थमत्र बहवः पन्थान आश्रिताः, यथा अच् इत्यादिप्रत्याहारचिन्तनं, टिघुइत्यादि संज्ञा कल्पना, पूर्वत्रासिद्धमित्यादिसूत्रम् इत्यादयः।

**कात्यायनः**

पाणिनिकाले बहवः वृत्तिकाराः आसन् तेषु वररुचिकात्यायनयोः भिन्नत्वविषये विदुषां संशयो विद्यते। दाक्षिणात्यः अयं विद्वान् प्रायः आनुमानिकं ई. पू. २९०० काले आसीत् इति विदुषां मतम्। कात्यः कात्यायनो वा तस्य गोत्राभिधानमिति। वररुचिः इति पितृकृतं नाम। इदमेव वादं पुष्टीकरोति स्कन्दपुराणान्तर्गतश्लोके यद् अयं याज्ञवल्क्यस्य पुत्रः इति।

तथाहि-

**कात्यायनाभिधं च यज्ञविद्याविचक्षणम्।**

**पुत्रो वररुचिर्यस्य बभूव गुणसागरः॥**[58]इति।

अयं विद्वान् *अष्टाध्याय्याः* वार्त्तिकानि रचयामास।

---

[57] पा. प. व्य., सम्पा. हरेकृष्णशतपथी, पृ. १३.

[58] स्का. पु., ना. ख.

वार्त्तिकं च-

**उक्तानुक्तदुरुक्तानां चिन्ता यत्र प्रवर्तते।**

**तं ग्रन्थं वार्त्तिकं प्राहुर्वार्तिकज्ञा मनीषिणः॥** इति।

पाणिनेः सूक्ष्मेक्षिकापर्यालोचनस्य साफल्याभावात् वार्त्तिककारः विस्तरेण वर्णितवान्, अर्थात् पाणिनिना स्वसमये अव्यवह्रियमाणतया यदनुक्तं तत् स्वसमये पूरितं दुरुक्तं च प्रत्याख्यातमिति।

**पतञ्जलिः**

अन्तर्द्रष्टा शेषावतारः पतञ्जलिः सूत्रवार्तिकगतव्याकरणस्य क्लेशदूरीकरणाय आविर्भूतः। कात्यायनस्य पूरकदृष्टिं पर्यालोच्य केषाञ्चन वार्त्तिकानां त्यागः, लौकिकव्यवहारेणैव सिद्धे केषाञ्चन पाणिनीयसूत्राणां प्रत्याख्यानं प्रश्नोत्तररूपया अपूर्वशैल्या सूत्रवार्त्तिकानां व्याख्यानात्मकं महर्षिः पतञ्जलिः भाष्यं रचितवान् ।

तथाहि भाष्यं च-

**सूत्रार्थो वर्ण्यते यत्र वाक्यैः सूत्रानुसारिभिः।**

**स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः॥** इति।

अत्र न मन्तव्यं यत् पतञ्जलिना पाणिनेः न्यूनता दर्शिता। यतो हि स्वयमेव पतञ्जलिनोच्यते वृद्धिरादैजिति सूत्रे-

**प्रमाणभूत आचार्यो दर्भपवित्रपाणिः शुचावकाशे**

**प्राङ्मुख उपविश्य महता प्रयत्नेन सूत्राणि प्रणयति स्म।**

**तत्राशक्यं वर्णेनाप्यनर्थकेन भवितुं, किं पुनरियता सूत्रेण।** इति।

त्रिषु अपि मुनिषु एतस्य प्रामाण्यमधिकमङ्गीक्रियते, यतो हि- यथोत्तरं मुनीनां प्रामाण्यमिति। अनेन सूत्रेषु दार्शनिकविचारः प्रस्तुतः।

कलेः सप्तविंशतितमशताब्द्यां ख्रिस्ताब्दतः शतचतुष्टयवर्षपूर्वमस्य कालमासीत् इति विदुषामभिप्रायः। अस्य माता गोणिकाख्या, जन्मभूमिश्च गोनर्ददेशः। तेन अयं गोनर्दीय इत्यच्यते[59]।

इत्थं त्रिमुनिव्याकरणं लोके वेदे च प्रयुज्यमानानां शब्दानां साधुत्वासाधुत्वविवेचनम् अन्यतश्च प्रयुक्तानां शब्दानां प्रयोगकारणचिन्तनं, पदपदार्थोपस्थापनपर्यालोचनेन व्याकरणमिदं द्वेधा विभक्तुं शक्यते-

१. शब्दसाधुत्वविषयकम्।

२. पदपदार्थतत्सामर्थ्यचर्चाविषयकम्। इति।

आद्यं प्रक्रियारूपेण प्रसिद्धं परं च दार्शनिकरूपेणेति। प्रथमांशे *प्रक्रियाकौमुदी, काशिका, वैयाकरणसिद्धान्तकौमुदी, लघुसिद्धान्तकौमुदी* इत्यादयः ग्रन्थाः। द्वितीयांशे च *वाक्यपदीयम्, वैयाकरणभूषणसारः, सिद्धान्तमञ्जूषा, सिद्धान्तलघुमञ्जूषा, परमलघुमञ्जूषा* इत्यादयः, यत्र च विद्यते स्फोटः, ध्वनिः, लकारार्थः, नामार्थः, शब्दशक्तिः इत्यादि विषये आलोचना।

**प्रक्रियामूलकव्याख्यानग्रन्थाः**

***महाभाष्यम्-*** फणिमणिना पतञ्जलिना विरचितं *महाभाष्यम्,* व्याकरणशास्त्रस्य मुख्यव्याख्यानग्रन्थेषु अन्यतमं भवति अयं ग्रन्थः। अतीवसरलभाषया लौकिक-उदाहरणसहयोगेन व्याकरणज्ञानपिपासूनां रसास्वादाय व्याकरणशास्त्रस्य पाणिनीयसूत्राणां

---

[59] बौ. वा. स., सम्पा. शिवशङ्करकरणः, पृ. ७.

गुढतत्त्वं प्रतिपादितमस्ति। सम्पूर्ण-*अष्टाध्यायीस्थ*-सूत्राणां व्याख्यानं ग्रन्थकारेण कृतमासीत्, परन्तु अधुना सम्पूर्णं नैव लभ्यते, एकाशीतेः मतान्तरे त्र्यशीतेः वा अह्निकानां पाठः लभ्यते। ग्रन्थस्य आदौ पस्पशाह्निके व्याकरणशास्त्रस्य प्रयोजनविषये उक्तमस्ति। ततः महेश्वरसूत्राणां व्याख्यानात् परं *अष्टाध्यायी*क्रमेण सूत्राणां व्याख्या क्रमेण लभ्यते।

***काशिका-*** अयं ग्रन्थोऽपि व्याकरणशास्त्रस्य पाणिनीयसूत्राणां व्याख्यानग्रन्थः। *अष्टाध्यायी*क्रमेण विरचितस्यास्य ग्रन्थस्य कर्तारौ तावद् वामनजयादित्यौ। अत्र सूत्राणां सूक्ष्मातिसूक्ष्मं गुढतत्त्वम् उदारणप्रत्युदारणं पूर्वकं प्रतिपादितं वर्तते। अपि च काशिका ग्रन्थस्याऽपि उपरि टीकाद्वयं वर्तते यथा *“न्यासः”*, अस्य कर्ता भवति जिनेन्द्रबुद्धिः। अपरञ्च *“पदमञ्जरी”*, अस्य कर्ता हरदत्तः।

***वैयाकरणसिद्धान्तकौमुदी-*** व्याकरणशास्त्रस्य सुप्रसिद्धग्रन्थो भवति *वैयाकरणसिद्धान्तकौमुदी*। पाणिनीयसूत्राणां तथा वार्त्तिकानां मेलनेन ग्रन्थोऽयं श्रीमद्भट्टोजिदीक्षितेन विरचितः। शब्दसाधुत्वप्रतिपादकस्य शास्त्रस्यास्य प्रसिद्धिः एवमस्ति यत् लोके पाणिनीयव्याकरणमित्युक्ते सर्वे सिद्धान्तकौमुदीमेव स्वीकुर्वन्ति। महाभाष्यादिग्रन्थपाठस्य उपायस्तम्भरूपस्य अस्य ग्रन्थस्य विषये उच्यते-

**कौमुदी यदि आयाति वृथा भाष्ये परिश्रमः।**

**कौमुदी यदि नायाति वृथा भाष्ये परिश्रमः॥** इति।

ग्रन्थोऽयं अवरोहणक्रमेण लिखितोऽस्ति। यतो हि ग्रन्थनिर्माणस्य प्रक्रियाद्वयं विद्यते, एकम् आरोहणक्रमः अपरञ्च अवरोहणक्रमः। वाक्येनैव व्यवहारदर्शनाद्वाक्यस्य च धातुमूलकतया पूर्वं धातवस्तत्प्रकृतिप्रत्ययास्ततो नामादीनि यदि बोधितानि भवेयुः तद् आरोहरणक्रमः। पूर्वं वाक्यनिमित्तककार्यप्रदर्शनम् अभिधाय तद्घटकानां निदर्शनेन निर्माणम्

अवरोहणक्रमः। अर्थाद् *अष्टाध्यायी* क्रमेण ग्रन्थोऽयं विरचितो नास्ति। यतो हि *अष्टाध्यायी* पठनार्थमादौ अपेक्षते सन्धिज्ञानं, ततः समासज्ञानम् इत्यादिविषयाः। अतः ग्रन्थेऽस्मिन् आदौ सन्ध्योपयोगिसंज्ञानां, ततः सन्धेः, ततश्च च पदज्ञानार्थं षड्लिङ्गप्रकरणं ततः सान्दार्भिकं स्त्रीलिङ्गानां ज्ञानम्। अष्टाध्याय्यां द्वितीयाध्याये समासकारकयोः विद्यमानत्वाद् अत्रापि स्त्रीप्रत्ययानन्तरं कारकप्रकरणं ततश्च समासप्रकरणं विद्यते, एवं क्रमेण ग्रन्थस्य अन्ते स्वरवैदिकप्रकरणञ्च वर्तते। अपि च अस्य ग्रन्थस्य वासुदेवदीक्षितविरचितः "*बालमनोरमा*" तथा ज्ञानेद्रसरस्वतीविरचितः "*तत्त्वबोधिनी*" व्याख्यानमपि तत्त्वज्ञानलाभाय महत् सुखकरं भवति।

***प्रक्रियाकौमुदी-*** शब्दानां केवलं प्रक्रियाक्रममाश्रित्यैव रामचन्द्राचार्येण पाणिनीयव्याकरणस्योपरि *प्रक्रियाकोमुदी* नामको ग्रन्थः विरचितः। अस्य ग्रन्थस्य *वैयाकरणसिद्धान्तकौमुदी* इति ग्रन्थेन सह तथा भेदो नास्ति। अपि च इतोऽपि प्रक्रियामूलकग्रन्थाः सन्ति यथा- *प्रक्रियासर्वस्वम्, प्रक्रियारत्नम्* प्रभृतयः।

**दार्शनिकव्याख्यानग्रन्थाः**

**वाक्यपदीयव्याख्यानग्रन्थाः-** व्याकरणशास्त्रस्य मूलदार्शनिकग्रन्थो भवति *वाक्यपदीयम्*। यथा वेदान्तादिशास्त्रेषु जीवब्रह्मणोः ऐक्यं प्रदिपादितमस्ति तथैव शब्दब्रह्मणः एव विवर्तरूपमिदं जगदस्ति इति भर्तृहरिणा प्रतिपादितम्। यथा च प्रोक्तं-

**अनादि निधनं ब्रह्म शब्दतत्त्वं यदक्षरं।**
**विवर्तते अर्थाभावेन प्रक्रिया जगतो यतः॥**[60] इति।

[60] वा. प., का. १/१.

एतादृशदार्शनिकतत्त्वनां ज्ञानं प्रक्रियादिग्रन्थादिषु सूत्रमात्रेण नैव लभ्यते, अपि च व्याकरणशास्त्रस्य मोक्षमार्गत्वमपि अनेन ज्ञायते। यतो हि "प्रयोजनमनुद्दिश्य मन्दोऽपि न प्रवर्तते" तस्माद् व्याकरणशास्त्रज्ञानरूपप्रयोजने सत्येऽपि मोक्षः भवति अस्माकं परमलक्ष्यम्। एतादृशदार्शनिकतत्त्वानां ज्ञानं साक्षात् मूलग्रन्थपाठेन नैव सिद्ध्यति यतो हि ग्रन्थोऽयं श्लोकरूपेण वर्तते। अतः श्रीभर्तृहरिणा *"स्वोपज्ञवृत्तिः"* वा *"हरिवृषभवृत्तिः"* विरचिता। ततश्च वृषभदेवेन "पद्धतिः" नाम्नी काचित् टीका, पुण्यराजेन *"प्रकाशः"* तथा च हेलराजेन *"प्रकीर्णप्रकाशः"* इति नाम्ना टीका विरचिता। अपि च सूर्यनारायणशुक्लमहाभागेनापि "भावप्रदीपः" नाम्नी काचिट्टीका विरचिता, यया टीकया व्याकरणशास्त्रस्य मोक्षमार्गत्वं सम्यक्तया बोधितं वर्तते।

***वैयाकरणभूषणसारव्याख्यानग्रन्थाः-*** व्याकरणशास्त्रस्य दार्शनिकग्रन्थेषु ग्रन्थोऽयं श्रीमत्कौण्डभट्टेन विरचितोऽस्ति । अत्र धात्वर्थः, लकारार्थः, नामार्थः, सुबर्थः प्रभृतिविषये आलोचितं वर्तते। विदुषां आदौ प्रश्नः उदेति यत् ग्रन्थस्याशयः कः। अत्र एवंरूपेण प्रतिपादितमस्ति यथा- शब्दस्य उत्पादने मूलं भवति धातुः। परन्तु लोके प्रकृतिप्रत्ययादिसमुदितस्य "पचति" इत्यादि वाक्यस्यैव व्यवहारो भवति। परन्तु कियांश्च धातुः, कियांश्च प्रत्ययार्थः इत्यादिविषयाणां निर्णयः अत्र कृतोऽस्ति, एवं च लकारनामार्थस्फोटादिषु अपि एवंरूपेण प्रतिपादितमस्ति। एतादृशमूलग्रन्थानां सरलतया गूढतत्त्वज्ञानं तु साक्षात् न सम्भवति, अतः व्याख्यानग्रन्थाः अस्माकं साहाय्यकं भवन्ति। यथा- पण्डितहरिवल्लभकृता *दर्पणटीका,* पण्डितभैरवमिश्रविरचिता *परीक्षाटीका,* गोपालदत्तकृता *कान्तिटीका,* शङ्करमिश्रकृता *शाङ्करीटीका,* हरिशास्त्रीकृता *काशिकाटीका,* वनमालीमिश्रकृता *वैयाकरणमतोन्मज्जिनी,* गोपालशास्त्रिविरचिता *सरलाटीका* प्रभृतयः।

एतेषां व्याख्यानग्रन्थानां साहाय्येन वाक्ये प्रयुक्तानां नामाख्यातधातूपसर्गानां कियान् अंशः अर्थावबोधे साहाय्यं भवति इत्यादिविषयानां ज्ञानं भवति।

इतोऽपि सन्ति व्याकरणशास्त्रस्य दार्शनिकग्रन्थाः यथा श्रीमन्नागेशभट्टेन विरचिता परमलघुमञ्जूषा, शब्देन्दुशेखरः प्रभृतयः। अत्र केवलं दिग्दर्शनमात्रेण स्मारितं वर्तते।

**व्याकरणव्याख्यानग्रन्थानां माहात्म्यम्।**

**मूलपाठस्य अवबोधः-** वाक्ये ग्रन्थकाराणां शब्दप्रयोगविषयं दृष्ट्वा अस्माकं भ्रमो भवति, यतो हि समाससन्धिप्रभृतिप्रयोगे सति शब्दविच्छेदे अर्थस्यापि विच्छेदो भवति। तेन वाक्यार्थज्ञानाभावे पाठज्ञाने तत्त्वज्ञाने च विघ्नः भवति। यथा असन्देहविषये महाभाष्ये प्रोक्तमस्ति- "स्थूला चासौ पृषती च- स्थूलपृषती, स्थूलानि पृषन्ति यस्याः सेयं- स्थूलपृषतीति। .....यदि पूर्वपदप्रकृतिस्वरत्वं ततो बहुव्रीहिः, अथ समासान्तोदात्तत्वं ततस्तत्पुरुषः इति।"[61] एतादृशस्थले व्याख्यानमेव स्मरणम्। एवं सन्धिस्थलादिषु अपि व्याख्यानम् अपेक्षते।

**गुरुपरम्परया ग्रन्थकर्तुर्प्रकृताशयः-** कुत्राचित् गुरुपरम्परया टीकया एव विषयस्य सम्यग् अवगमनं भवति, यतो हि कश्चन गुरुः ग्रन्थलेखनान्तरं सशिष्यान् पाठयति अनन्तरं कदाचिद् शिष्यः टीकां रचयेत्, तेन अनया टीकया एवं मूलतत्त्वस्य सम्यग् अवगतिः भवति यतो हि शिष्यः गुरोः आशयं सम्यग् जानीयात्। अन्यसम्प्रदायटीकया तथा नैव लभ्येत, कदाचिद् विरुद्धमपि भवितुमर्हति। अतः गुरुपरम्परया टीकया एव यथार्थशास्त्रज्ञानं भवति। अपि च कुत्राचित् यदि ग्रन्थकर्तुः टीका स्यात् तेनापि ग्रन्थकर्तुः प्रकृताशयः ज्ञातुं

---

[61] महा. भा., ख. १-५ आह्निकानि, सम्पा. जयशङ्करलालत्रिपाठी, पृ. २७.

शक्यते। कुत्राचित् पाठभेदः, उपपाठविषयेऽपि ज्ञानं गुरुपरम्परया टीकयैव ज्ञातुं शक्यते, यतो हि मूलपाठे किं भवितुमर्हति इति विषयाः सम्यक् शिष्याः एव जानीयुः।

**गूढतत्त्वज्ञानम्-** गुढतत्त्वज्ञानं टीकया एव सम्भवति, यतो हि केचन विषयाः सन्ति येषां ज्ञानं टीकया विना नैव कदाचित् अभविष्यत्। यथा अत्र दृश्यते "वृद्धिरादैच्"[62] इति सूत्रे आ, ऐ, औ इत्येतेषां त्रयाणां वर्णानां वृद्धिसंज्ञा भवति इति तु मूलग्रन्थे, परन्तु महाभाष्येकारेण बहवः विचाराः प्रस्तूयन्ते। यथा "वृद्धिरादैच्" इत्यस्य आदैच् इत्यत्र "चोः कुः" इत्यनेन कथं कुत्वं न सम्भवति। तत्र समाधानं तावद् "अयस्मयादीनि छन्दसि" इति सूत्रेण भसंज्ञात्वात् पदसंज्ञा न भवति। परन्तु छन्दसि एव खलु भसंज्ञा, पाणिनीयसूत्रं न छन्दः। अत्र समाधानं "छन्दोवत् सूत्राणि भवन्ति[63]" इति सिद्धान्तस्तु महाभाष्ये लभ्यते। अपि च वृद्धिरादैच् इति सूत्रे तद्भावितपक्षस्य अतद्भावितपक्षस्य च विचारः कृतः। परन्तु उभयपक्षे दोषान् प्रदर्शयित्वा अतद्भावितपक्षस्य दोषान् निवार्य अयमेव पक्षः साधु भवति इति प्रदर्शितः अर्थात् आदैच्-मात्रस्य ग्रहणं फणिमणिना कृतमस्ति। एवंरूपेण शास्त्रेऽस्मिन् र-प्रत्याहारचिन्तनम्, अन्योन्याश्रयदोषविवेकः, सूत्रगतफलितार्थचिन्तनम् इत्यादिगूढतत्त्वानां गाम्भीर्यं केवलं व्याख्यानग्रन्थादेव लभ्यते।

**पूर्वपक्षिमतम्-** पूर्वपक्षिणां मतविषये ज्ञानं तु टीकां विना न काचित् पन्थाः विद्यते, यतो हि ग्रन्थकर्तारः ग्रन्थे "केचित्, अन्ये च, कुत्रचित्, तत्र, अन्यत्र" इत्यादिशब्दप्रयोगेण पूर्वपक्षिणां मतं उपस्थापयन्ति, के भवन्ति ते पूर्वपक्षिणः मीमांसाकाः, नैयायिकाः, वैदान्तिनः वा। अपि च कानि विद्यन्ते तेषां मतानि इत्यादिविषयाणां ज्ञानं तु टीकया एव

---

[62] पा. सू. १-१-१.

[63] महा. भा., ख. १-५ आह्निकानि, सम्पा. जयशङ्करलालत्रिपाठी, पृ. २९३.

प्राप्तुं शक्यते। उदारहणरूपेण उच्यते परमलघुमञ्जूषायाः प्रारम्भे एव दृश्यते- "तत्र वर्णपदवाक्यभेदेन स्फोटस्त्रिधा।"[64] अत्र "तत्र" इति पदेन कुत्र बोधः इति प्रश्ने सति टीकायां लिखितं वर्तते "विवेचयिष्यमाणेषु स्फोटभेदेषु" इति। इतोऽपि दृश्यन्ते उदाहरणानि यथा अस्मिन्नेव ग्रन्थे लक्षणानिरूपणप्रकरणे "स्वबोध्यसम्बन्धो लक्षणेति केचित्" इति वाक्यांशः परिलक्ष्यते, अत्र "केचित्" इति पदेन के। टीकया ज्ञायते के इत्युक्ते मीमांसकाः। एवंरूपेण पूर्वपक्षिणां मतं ज्ञायते।

**वाक्यार्थज्ञानम्-** व्याख्यानग्रन्थेन वाक्यार्थज्ञानं सम्यक्तया लभ्यते। यतो हि वाक्ये शक्तिः, लक्षणा, व्यञ्जनाश्च भवन्ति, तेषां निगुढतया ज्ञानं मूलपाठमात्रेण न सम्भवति। अतः व्याख्याग्रन्थपाठेन वाक्यस्य लक्षणा एवंरूपेण ज्ञायते यथा- "द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः"[65] इति सूत्रे द्वितीया इति पदे लक्षणा वर्तते। यतो हि अलौकिकविग्रहवाक्ये एकार्थीभावरूपं सामर्थ्यं तिष्ठति, तदा तु द्वितीयान्तं पदं न तिष्ठति, तस्मात् तत्र द्वितीया इत्यस्य लक्षणया द्वितीयाप्रकृतिकप्रातिपदिकम् इति अर्थो भवति। एवं रूपेण वाक्यार्थज्ञाने व्याख्यानग्रन्थाः अस्माकं मूलग्रन्थावबोधने साहाय्यं कुर्वन्ति।

---

[64] प. ल. म., सम्पा. जयशङ्करलालत्रिपाठी, पृ. ५.

[65] पा. सू. २/१/२४.

# द्वितीयोऽध्यायः

## *शब्दकौस्तुभ*ग्रन्थस्य *उद्द्योत*टीकायाः तत्कर्तुश्च परिचयः

### श्रीमद्भट्टोजिदीक्षितस्य देशपरिचयः

वेदस्य मुनित्रयवंशलब्धजन्मा वैयाकरणशिरोमणिः अयं भट्टोजिदीक्षितः। अयं च वाराणसीं गत्वा व्याकरणं तन्त्रान्तराणि चाध्यैष्ट। यद्यपि भट्टोजिदीक्षितग्रन्थेषु कृष्णपण्डितस्य नाम न दृश्यते तथापि शब्दकौस्तुभे तदेतत्सकलमभिधाय प्रक्रियाप्रकाशे गुरुचरणैरुक्तम् इति समुल्लेखनेन, ध्यायं ध्यायमिति *प्रौढमनोरमा*याः मङ्गलश्लोकव्याख्यावसरे गुरोरित्येकवचनेन सर्वविद्यालाभः एकस्मादेवगुरोरिति सूचितमिति शब्दरत्नवाक्ये गुरुशब्दप्रतीकमुपादाय कृष्णपण्डितादिति 'भावप्रकाश'ज्योत्स्नाव्याख्यासूक्तत्वात् मनोरमाकुचमर्दिन्यां जगन्नाथेन स्पष्टमुक्तत्वाच्चास्य कृष्णपण्डितशिष्यत्वं सिध्यति।

मद्रपुरीयतालपत्रग्रन्थालये स्थितस्य *शब्दकौस्तुभ*स्यान्ते भट्टोजिदीक्षितकृता स्वगुरुस्तुतिरित्थमुपलभ्यते।

**निर्विशेषं महाशेषाच्छेषकृष्णमहं भजे।**

**यो मामशेषाः शेषोक्तीः विशिष्यैवाध्यजीगपत् ।।** इति।

अनेन सर्वमपि व्याकरणशास्त्रं शेषकृष्णादेव अध्यगायि इति ज्ञायते। अयं हि महाराष्ट्रियो ब्राह्मणः आसीत्। अस्य पितुर्नाम लक्ष्मीधरभट्टः, पुत्रो भानुजिदीक्षितः हरिदीक्षितश्च पौत्रः। भ्रातुष्पुत्रो हि कौण्डभट्टः।

**कालपरिचयः**

दीक्षितस्य कालविषये नास्त्यैकमत्यम्| डॉ. वेलवाल्करमहोदयानां मते अस्य समयः १६५७-१७०० वैक्रमाब्दपर्यन्तं वर्तते। अन्येषां मते तु अस्य कालः १६३७ वैक्रमाब्दोऽस्ति। युधिष्ठिरमीमांसकास्तु अस्य समयः १५०० तः १६५० संवत्सरं यावद् वर्तते इति आमनन्ति।

१५५०-१६२० वैक्रमवर्षाणि इति केचनामनन्ति। युधिष्ठिरमीमांसकास्तु १५७०-१६५० इति विक्रमकालेषु दीक्षितस्य स्थितिं मन्यन्ते।

**श्रीमद्भट्टोजिदीक्षितस्य कृतयः**

अयं च भट्टोजिदीक्षितः सर्वशास्त्रविशारदः आसीदिति तस्य ग्रन्थप्रणयनेनैव ज्ञायते। प्रायस्सर्वेषु शास्त्रेषु ग्रन्थाः समारचिताः।

**व्याकरणग्रन्थाः**

१) *वैयाकरण-सिद्धान्तकौमुदी*

२) *शब्दकौस्तुभः*

३) *प्रौढमनोरमा*

४) *वैयाकरणसिद्धान्तकारिकाः*

५) *धातुपाठः*

६) *लिङ्गानुशासनसूत्रवृत्तिः*

७) *भट्टोजिदीक्षितीयम्*

**अद्वैतग्रन्थाः**

१) *तत्त्वविवेकदीपनव्याख्या*

२) *तत्त्वकौस्तुभः*

३) *अद्वैतकौस्तुभः*

**तर्कग्रन्थाः**

१) *तर्कामृतम्*

२) *तन्त्रसिद्धान्तदीपिका*

३) *तन्त्राधिकारनिर्णयः*

**धर्मादिशास्त्रग्रन्थाः**

१) *चतुर्विंशतिमुनिमतव्याख्या*

२) *गोत्रप्रवरनिर्णयः*

३) *कालनिर्णयः*

४) *त्रिस्थली सेतुः*

(५) *त्रिस्थली सेतुसारसङ्ग्रहः*

६) *आचारप्रदीपः*

७) *आशौचत्रिंशच्छ्लोकी*

८) *आशौचनिर्णयः*

९) *आह्निकनिर्णयः*

१०) *कालनिर्णयसङ्ग्रहः*

११) *चन्दनधारणविधिः*

१२) *तीर्थनिर्णयः*

१३) *तीर्थनिर्णयसंक्षेपः*

१४) *तिथिप्रदीपकः*

१५) *तीर्थयात्राविधिः*

१६) *दशश्लोकीटीका*

१७) *प्रायश्चित्तविनिर्णयः*

१८) *मासनिर्णयः*

१९) *श्राद्धकाण्डः*

२०) *सन्ध्यामन्त्रव्याख्या*

२१) *सर्वसारसंग्रहः*

एवमेव *तैत्तिरीयसन्ध्याभाष्यम्* इत्यादीन् ग्रन्थान् व्यरचयत्।

***वैयाकरणसिद्धान्तकौमुदी***

प्रक्रियाक्रमग्रन्थेषु *वैयाकरणसिद्धान्तकौमुदी* अर्वाचीनकाले प्राथम्यं भजते। पूर्वतनप्रक्रियाग्रन्थेषु *अष्टाध्यायी*सूत्राणां सर्वेषां निवेशः नासीत्। अस्यां कौमुद्यां तु सर्वेषामपि *अष्टाध्यायीस्थ*सूत्राणां निवेशः युक्तियुक्ततया कृतो दृश्यते।

**पदच्छेदः पदार्थोक्तिः विग्रहो वाक्ययोजना।**

**पूर्वपक्षसमाधानं व्याख्यानं पञ्चलक्षणम्।।** इति।

एवं व्याख्यानपञ्चलक्षणमपि कौमुद्यां प्रस्फुटं दृश्यते। अत्र च कौमुद्यां भाष्यस्थविषयाणां सङ्ग्रहेण प्रतिपादनमपि दरीदृश्यते।

एवं भाष्योक्तगूढार्थानपि अतिसरलरीत्या रात्री कौमुदी इव सुखं प्रकाशयति इति कौमुदी अन्वर्थनामधेया व्याकरणशास्त्रनभं बिभर्ति कालातिवर्तिनी।

**_शब्दकौस्तुभ_ग्रन्थस्य परिचयः**

*शब्दकौस्तुभः* इति ग्रन्थः श्रीमद्भट्टोजिदीक्षितेन विरचितः। ग्रन्थोऽयम् *अष्टाध्यायी* इति ग्रन्थस्य व्याख्यानग्रन्थः। परन्तु मूलतः फणिभाषितस्य अर्थात् श्रीमत्पतञ्जलेः *महाभाष्यम्* इति ग्रन्थस्य सारभूतः ग्रन्थः।

तथा च वैयाकरणभूषणसारे–

**फणिभाषितभाष्याब्धेः _शब्दकौस्तुभ_ उद्धृतः।**

**तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते॥** इति।

ग्रन्थोऽयं *अष्टाध्यायी*सूत्रक्रमानुसारेण आह्निकरूपेण विभक्तोऽस्ति, यथा महाभाष्यादिषु दृश्यते। आदौ निर्विघ्नग्रन्थपरिसमाप्त्यर्थम् इष्टदेवतामङ्गलाचरणं ततश्च त्रिमुनिनमस्कारः ततश्च भर्तृहरिप्रभृतिवैयाकरणभूषणानां नमस्कारः, ततश्च स्वीयतातपादानाम् नमस्कारात्मकं मङ्गलाचरणं विद्यते।

यथा च–

**विश्वेशं सच्चिदानन्दं वन्देऽहं योऽखिलं जगत्।**

**चरीकर्त्ति बरीभर्ति संजरीहर्ति लीलया॥**

**नमस्कुर्वे जगद्वन्द्यं पाणिन्यादिमुनित्रयम्।**

**श्रीभर्तृहरिमुख्यांश्च सिद्धान्तस्थापकान्बुधान्॥**

**नत्वा लक्ष्मीधरं तातं सुमनोवृन्दवन्दितम्।**

**फणिभाषितभाष्याब्धेः *शब्दकौस्तुभ*मुद्धरे॥**[1] इति।

मङ्गलाचरणात् परं भगवान् भाष्यकारस्य "अथ शब्दानुशासनम्" इति वाक्येन "अथ" शब्दस्य विचारप्रसङ्गेन मूलविषयः प्रारभ्यते। ततश्च स्थानिना बोधकत्वं आदेशाः न वेति निरूपणम्, ततश्च स्फोटनिरूपणं, व्याकरणाध्ययनप्रयोजनं, व्याकरणाध्ययनफलम् इत्येवं क्रमेण ग्रन्थस्य प्रथमभागस्य कलेवरः विस्तीर्णतां याति। द्वितीयभागे वचनप्रकरणात् परं कारकप्रकरणम् आगच्छति, अस्य क्रमः २१ इति। अयम् अंशः *शब्दकौस्तुभ*ग्रन्थस्य प्रथमस्याध्यायस्य चतुर्थपादस्य तृतीयमाह्निकम्। एवं विभक्तिप्रकरणम् अपि पूर्वनिपातप्रकरणात् परं आगच्छति, अस्य क्रमः ३३ इति। अयम् अंशः *शब्दकौस्तुभ*ग्रन्थस्य द्वितीयस्याध्यायस्य तृतीयपादस्य प्रथममाह्निकं, द्वितीयाह्निकं, तृतीयामाह्निकञ्च। अयमेव अस्य शोधप्रबन्धस्य विषयः।

## श्रीमन्नागेशभट्टस्य देशकालकृतिपरिचयः

### महामहोपाध्यायः श्रीमन्नागेशभट्टः

निखिलशास्त्रतत्त्वज्ञः नागेशभट्टोऽयं महाराष्ट्रदेशीयः ऋग्वेदशाखाध्यायी ब्राह्मणः। नागोजीभट्टः इति नामान्तरम्। "शिवभट्टसुतो धीमान्, सतीदेव्यास्तु गर्भजः" इति उक्तरीत्या अस्य पिता शिवभट्टः, माता सतीदेवी। उपनाम तु अस्य काले इति। नागेशशिवभट्टकाले

[1] श. कौ., प्र. ख., सम्पा. गोपालशास्त्री, पृ. १.

इति अस्य सम्पूर्णनाम वर्तते। अस्य गुरुर्भट्टोजिदीक्षितस्य पौत्रो वीरेश्वरदीक्षितस्य पुत्रः हरिदीक्षितः आसीत्।

### कालपरिचयः

जयपुरमहाराजाः श्रीसवाईजयसिंहवर्मणः अश्वमेधयज्ञसम्पादनाय यज्ञाचार्यरूपेण नागेशभट्टाचार्यान् समाहूतवन्तः। परन्तु "अहं क्षेत्रसंन्यासं गृहीत्वा काश्यां स्थितोऽस्मि, अतः तं परित्यज्य अन्यत्र गन्तुं न शक्नोमि" इति नागेशाचार्यः प्रख्यातवानिति महामहोपाध्यायदुर्गाप्रसादकृतरसगङ्गाधरभूमिकायां लिखितमस्ति। श्रीजयसिंहमहाराजाश्च १७१४ ख्रिष्टाब्दे अश्वमेधयज्ञं चक्रुरिति ऐतिह्ये समुपलभ्यते। एतेन १७३९ वैक्रमादारभ्य १८९० वैक्रमपर्यन्तं (१६७४ ईसवीयतः १७५३ ईसवीयपर्यन्तम्) नागेशभट्टस्य कालः निश्चीयते।

किञ्च पण्डितराजजगन्नाथः देहलीश्वरस्य शाजाहानस्य सभालङ्कारभूतः। अयं जगन्नाथः, नागेशगुरोः हरिदीक्षितस्य पिता वीरेश्वरदीक्षितश्च समकालिकौ। अतः पण्डितराजस्य समये १६६६ ख्रिष्टाब्दे पुरुषद्वयपर्याप्तानि चत्वारिंशद्वर्षाणि योज्यन्ते चेत् १७०६ ख्रिष्टाब्दः नागेशस्य समयः आयातीति रसगङ्गाधरभूमिकायां निर्धारितम्।

युधिष्ठिरमीमांसकमहोदयाः भानुदत्तकृतरसमञ्जरीग्रन्थस्य टीकां जयपुराधीशस्याश्वमेधयज्ञञ्च प्रमाणत्वेन स्वीकृत्य १७३० वैक्रमाब्दात् १८१० पर्यन्तं नागेशसमयम् ऊहाञ्चक्रिरे। बलदेवोपाध्यायस्तु नागेशस्य समयः १६७५-१७४५ इति ब्रूते। समग्ररूपेण विवेचयामः चेत् सप्तदशशताब्दस्यान्तिमसमयात् (१६७०-१६८०) अष्टादशशताब्द्या अर्धकालपर्यन्तम् (१७७५) नागेशस्य समयः आसीदिति ज्ञायते।

**श्रीमन्नागेशभट्टस्य वंशः**

नागेशभट्टस्य पितरौ सतीदेवीशिवभट्टाविति नास्ति सन्देहस्यावसरः परमेतौ काश्यामेव निवसन्तौ नागेशं जज्ञतुः आहोस्वित्महाराष्ट्र इति तु सन्देहः। महाराष्ट्रीय ब्राह्मणोऽयं नागोजीभट्टः, नागेशः, चेति नाम्नापि ख्यातः। नागेशभट्टः विवाहितोऽविवाहितो वा इत्यस्मिन् विषये यद्यपि कुत्रापि प्रमाणं नोपलभ्यते परन्तु पुत्रपुत्रीरूपेण शेखरमञ्जूषाग्रन्थयोर्नामग्रहणादयं विवाहितः। तत्र यद्ययमविवाहितः स्यात्तदा सन्तानचर्चा वृथा स्यात्। महान् वैयाकरणोऽयं विवाहितः इति लोकप्रचलित कथातोऽपि ज्ञायते। एकदा शृङ्गवेरपुराधीशः नागेशमर्थसहायतायै तत्पुरतः गत्वा “अस्ति काचित् विप्रतिपत्तिः" इति पृष्टवान्। तस्मिन् समये नागेशः त्रुटिपङ्क्तेः कस्याश्चित् पाण्डुलिपेः पत्रमेकं पुरस्कृत्योवाच "इयं हि विप्रतिपत्तिः” इति। तत्पश्चात् महाराजेन रामसिंहेनोक्तं यन्नैतादृशी विप्रतिप्रत्तिरपाकरिष्यते मया, एतादृश्याः विप्रतिपत्तेः निराकरणं भवादृशाः सरस्वतीपुत्राः एव करिष्यन्ति, यदि चार्थविषयिणी काचिद् विप्रतिप्रत्तिः स्यात्तस्यापनोदः करिष्यते मया। ततो नागेशेनोक्तं यत् पत्नी प्रष्टव्येति। तदनु नागेशः स्वपत्नीं पृष्टवान्। तयाप्युक्तं यदस्मत्पार्श्वे यवधान्यपूर्ण एको घटोऽस्ति, तेन मासैकस्य भोजनवृत्तिः प्रचलिष्यतीति। एतच्छ्रुत्वा शृङ्गवेरपुराधीशः रामसिंहः प्रतिमासं शतरूप्यकपरिमिता वृत्तिं ददौ। अस्य पत्नी दुर्गानाम्नी आसीदिति केचन वदन्ति। केचन वदन्ति यत् नागोजिभट्टो बाल्यादेव गृहीतब्रह्मचर्यव्रतः, न सेवितवान् पत्नीम्। यदि तस्यापत्यं स्यात् तर्हि तद्विषये कुत्रचिदुल्लेखः स्यात्। परं तथा न दृश्यते। अतो नागेशः अविवाहितः यावज्जीवनं ब्रह्मचर्यव्रतमाचरितवान् इति। परं सिद्धान्तलघुमञ्जूषाग्रन्थान्ते “शब्देन्दुशेखरं पुत्रं मञ्जूषाञ्चैव कन्यकाम्” इत्युक्तिः महोदयस्यास्य वैवाहिकं स्थितिं साधयति। नागेशः

स्वीयरचनास्वादावेव स्वपितरौ सस्मार। मन्येऽस्य पितरौ तस्याल्पीयस्येव वयसि शिवसायुज्यमाप्तवन्तौ। यदि प्रौढसमये तावास्तां तर्ह्यवश्यमेव कुत्रचिज्जीवनकर्तृकचर्चाप्रसङ्गानुसारम् अवश्यमेवोल्लिखिता स्यात्। परं कुत्रापि तथा न मिलति। अयं शैवः आसीदिति बहुत्र रचनायां प्राप्यते। संगृहीतं युधिष्ठिरमीमांसकेन यथा–

"नागेशभट्टविदुषा नत्वा साम्बं शिवं लघु"

"नत्वा साम्बं शिवं ब्रह्म नागेशः कुरुते सुधीः"

"नत्वा गङ्गाधरं मर्मप्रकाशं तनुते गुरुम्" इति।[2]

नागेशस्य समग्रजीवनं ग्रन्थपर्यालोचनेनैति इति तु सत्यमेवास्य समयः प्रायो तु ग्रन्थरचनायामेव व्यतीतः। अथ च शृङ्गवेरपुराधीशस्य महाराजरामसिंहस्य कृपया कदाप्यर्थाभावो न जातः।

सतीदेवी शिवभट्टः च नागेशस्य पितराविति नास्त्यत्र मनागपि सन्देहः, परन्तु अस्य जन्म महाराष्ट्रे उत काश्यां जातमित्यत्र तु सन्देहः वर्तते नागेशभट्टस्य विवाहो जातो वा न वेति सन्देहोऽपि वर्तते। परन्तु शेखरमञ्जूषाग्रन्थयोः पुत्रपुत्रीरूपेण ग्रहणादयं विवाहितः इति प्रतीयते। यद्ययमविवाहितः स्यात् तर्हि सन्तानचर्चा व्यर्थं स्यात्। परं मञ्जूषाग्रन्थान्ते "शब्देन्दुशेखरं पुत्रं मञ्जूषाञ्चैव कन्यकाम्" इत्युक्तिस्तु नागेशस्यास्य विवाहः सञ्जातः इति साधयति।

---

[2] सं. व्या. शा. का. इति., Vol.-1., सम्पा. युधिष्ठिरमीमांसकः, पृ. २१.

## श्रीमन्नागेशभट्टस्य शिक्षापरम्परा

नागेशभट्टस्य शिक्षापरम्परा शेषकृष्णभट्टशिष्यभट्टोजिदीक्षितस्य पुत्रस्य वीरेश्वरदीक्षितस्य पुत्रः शिष्यश्च हरिदीक्षितस्तस्मादेव व्याकरणाशास्त्रं समधिगतवानयं नागेशः। हरिदीक्षितस्य तदानीं वैयाकरणेषु महती प्रतिष्ठा आसीत्। हरिदीक्षितादेवाखिलं महाभाष्यान्तं व्याकरणमयं महानुभावः अधिजगे। "हरिदीक्षितादष्टादशवारम्" *महाभाष्य*न्नागेशभट्टोऽध्यगीष्टेति "फणिभाषितभाष्याब्धौ कृतभूरिपरश्रमः इति लेखाल्लोकश्रुतेश्चावगम्यते। स्वगुरौ हरिदीक्षिते नागेशस्य स्वाभाविकी दृढतरा च भक्तिरासीदित्यत्र नास्ति कोऽपि विसंवादः। तत्र तत्र स्वकृतिष्वयं स्वाभीष्टदेवैस्सह गुरूनपि स्मरति। व्याकरणशास्त्रे नागेशभट्टस्य यदप्रतिमपाण्डित्यं तत्तद्रचनासु दृश्यते, तस्य कारणत्वेन सारस्वताराधनस्य सत्त्वेऽपि गुरुकृपा तत्र कारणत्वेनायाति।

नागेशभट्टस्य तर्कशास्त्राध्ययनं तदानीन्तनन्यायदर्शनस्य पारदर्शिपण्डितेन श्रीरामचन्द्रभट्टाचार्येण जातमासीदिति मञ्जूषाग्रन्थे नागेशेन स्वयं लिखति। नागेशेन स्वग्रन्थेषु न्यायगर्भितभाषायाः व्यवहारः कृतो दृश्यते। तत्र मञ्जूषायामादावेव शाब्दबोधेऽगृहीतवृत्तेर्हेतुत्वनिरूपणे नव्यन्यायशैलीप्रयुक्ता। तथा हि "तत्रागृहीतवृत्तिकस्य शाब्दबोधदर्शनात् न हि गुड इत्युक्ते मधुरत्वं प्रकारतया गम्यते" इति, समर्थसूत्रभाष्याच्च "तद्धर्मावच्छिन्नविषयकशाब्दबोधत्वावच्छिन्नं प्रति तद्धर्मावच्छिन्ननिरूपितवृत्तिविशिष्टज्ञानं हेतुः" इति। अतो न्यायशास्त्रगुरोः रामचन्द्रभट्टाचार्यस्य पुष्कलप्रभावो नागेशे समापतित इत्यत्र शङ्कालेशोऽपि न विद्यते। पण्डितराजजगन्नाथात् साहित्यशास्त्रमधीतवन्तः इति मते तु किमपि साक्ष्यं नैवावाप्यते।

नागोजिभट्टस्य बहवः शिष्याः विद्यावैभवसम्पन्नाः आसन्। तेषु वैद्यनाथपायगुण्डेमहोदयः अन्यतमः। सः समस्तशास्त्रं नागेशानुग्रहादधीतवान्। पायगुण्डेमहोदयेन स्वशास्त्रज्ञानशक्त्या अनेके ग्रन्थाः ग्रथिताः। *शब्दरत्नस्य* टीका "*भावप्रकाशः*" *उद्द्योतस्य* टीका "*गदा*" "*काशिका*" च, *वैयाकरणमञ्जूषायाष्टीका* "*कला*" इत्याद्याः। पायगुण्डेपुत्रः बालशर्मापि नागेशभट्टस्य अन्यतमशिष्येष्वासीत्, यस्य धर्मशास्त्रे मीमांसायाञ्च महती प्रतिष्ठा आसीत्। अतो भट्टपादस्य तत्तच्छास्त्रेषु समृद्धा महती च परम्पराविद्यते।

महत्याः गुरुशिष्यपरम्परायाः एका दृष्टिः रेखाचित्रात् ज्ञातुं शक्यते।



**नागेशभट्टस्य कृतयः**

**व्याकरणशास्त्रे**

*परमलघुमञ्जूषा, परिभाषेन्दुशेखरः, बृहच्छब्देन्दुशेखरः, उद्द्योतः (महाभाष्य-टीका), लघुमञ्जूषा, विषमपदीटीका (शब्दकौस्तुभटीका), स्फोटवादः, कारकार्थ-निर्णयः, तात्पर्यदीपिका, तिङन्तसंग्रहः, धातुपाठवृत्तिः, णेरणावितिसूत्रार्थविचारः, नेरणिवादार्थः, परिभाषेन्दुशेखरः, लघुशब्दरत्नटीका, वैयाकरणकारिका, शब्दानन्तसागर-समुच्चयः, सुप्तिङन्तसारसमुच्चयः* इति।

**धर्मशास्त्रे**

*आचारेन्दुशेखरः, आशौचनिर्णयः, आशौचेन्दुशेखरः, इष्टिकालनिर्णयः, तिथि निर्णयः, तीर्थेन्दुशेखरः, त्रिषष्टिसेतुप्रघटकः, सारसङ्ग्रहः, श्राद्धेन्दुशेखरः, सापिण्डीमञ्जरी, सापिण्डदीपिका, सापिण्ड्यनिर्णयः, सापिण्ड्यप्रदीपिका* इति।

**अलङ्कारशास्त्रे**

*उदाहरणप्रदीपिका (काव्यप्रकाशटीका), उद्द्योतः* (काव्यप्रकाशस्य काव्य प्रदीपटीकायाः टीका), *अलङ्कारसुधा* (*कुवलयानन्द*टीका), *गुरुमर्मप्रकाशिका* (*रसगङ्गाधर*टीका), *काव्यमाला* (*रसतरंगिणी*टीका), *परमार्थसारविवरणम्, प्रकाशः* (*रसमञ्जरी*टीका) इति ।

**तन्त्रशास्त्रे**

*देवीमहात्म्यम्* (*दुर्गासप्तशती*टीका), *चण्डीस्तोत्रप्रयोगविधिः* (*स्वकृतदेवी माहात्म्य-टीका*), *परमार्थसारविवरणम्* इति।

**तर्कशास्त्रे**

*लक्षणरत्नमाला, तर्कभाषाटीका* च।

**वेदव्याख्याने**

*वेदसूक्तभाष्यम्, एकश्रुतिवादश्च*।

**वेदान्ते**

*व्याससूत्रेन्दुशेखरः*।

**सांख्यशास्त्रे**

*लघुसांख्यसूत्रवृत्तिः*।

**योगशास्त्रे**

*पातञ्जलसूत्रवृत्तिः, पातञ्जलसूत्रवृत्तिभाष्यच्छायाव्याख्या* च।

**पुराणे**

*तिलकटीका* (रामायणटीका), *अध्यात्मरामायणटीका* च।

**सम्भावितकृतयः**

*अष्टश्लोकीसपिण्डनिर्णयः, उपाकर्मप्रयोगः, कुण्डपद्धतिः, कात्यायनीयतन्त्रः, गर्भवतीव्यभिचारिणीप्रायश्चित्तः, गर्भिणिकृतिः, गोत्रप्रवरनिर्णयः, युक्तिमुक्तावली, दत्तमीमांसा, दानसङ्ग्रहः, रुद्रानुष्ठानप्रयोगः, पदार्थदीपिका, पर्वनिर्णयः, प्रत्याख्यानसङ्ग्रहः, प्रयोगविधिः* (तन्त्रः), *प्रयोगसरणिः* (तन्त्रः), *व्रात्यसङ्ग्रहः, शङ्कासमाधानम्, शतचण्डीप्रयोगः, सहस्रचण्डीप्रयोगः, संस्काररत्नमाला,* इति।

नागेशग्रन्थावलोकनेनेदं प्रकृष्टतया निगदितुं न शक्यते यद् कः ग्रन्थः पूर्वः कश्च पश्चादिति। तत्र व्याकरणग्रन्थानां पौर्वापर्य विचारयामश्चेत् मन्यामहे, प्रदीपोद्योतेन सहैव

शेखरमञ्जूषादिग्रन्थानां प्रणयनमभूदिति। यद्यपि *बृहच्छब्देन्दुशेखरस्य* व्यासशैली तथा सिद्धान्तप्रतिपादने असाफल्यदर्शनेन सर्वस्यादावस्य रचनाभवदिति सम्भाव्यते। परमित्युक्त्या "यथोत्तरं मुनीनां प्रामाण्यम् इति व्यवस्थया चादौ *महाभाष्यप्रदीपोद्योता*नां सर्वमान्यता। *सिद्धान्तकौमुदी*व्याख्यानभूतस्य *शब्देन्दुशेखरस्य* रचनासमनन्तरमेव *लघुशब्देन्दुशेखरस्य* प्रणयनमभवत्। व्याकरणदर्शनसिद्धान्तान् क्रमप्राप्तान् *शब्दकौस्तुभवैयाकरणभूषणसार*प्रभृतिग्रन्थानाधृत्य *वैयाकरणसिद्धान्तमञ्जूषा*ग्रन्थस्य ततश्च *वैयाकरणसिद्धान्तलघुमञ्जूषा*ग्रन्थस्य *वैयाकरणसिद्धान्तपरमलघुमञ्जूषा*ग्रन्थस्य च प्रणयनं जातम्। *परिभाषेन्दुशेखरस्य* ग्रथनमन्ते जातम्। तत्र सन्दर्भेऽस्मिन् सर्वाधिकप्रामाणिकविवेचनं पी. के. गोडेमहोदयेनाकारि तथाहि *महाभाष्यप्रदीपोद्योत*व्याख्यान *वैयाकरणसिद्धान्तमञ्जूषा- शब्देन्दुशेखर- लघुमञ्जूषा*ग्रन्थानां रचना १७००-१७०८ ईसवीयमध्ये तथा लघुशब्देन्दुशेखरस्य १७२१ ईसवीयपूर्वमिति। *परिभाषेन्दुशेखरस्य* रचना तु *महाभाष्यप्रदीपोद्योतवैयाकरणसिद्धान्तमञ्जूषाशब्देन्दुशेखरा*णामन्ते एवाभवत्तत्र व्याकरणसिद्धान्तनिर्देशात्। वस्तुतस्त्विदं सत्यं यन्नागेशग्रन्थानां परस्परं कालनिर्धारणं न केवलं दुःशकमपितु प्रौढिवादमात्रम्।

"एकस्मिन् जन्मनि एकं शास्त्रम्" इत्यभियुक्तिमनुसृत्य एकं शास्त्रं सकलम् अध्येतुमेव यावज्जीवनं पर्याप्तं न भवति। तथात्वे इयन्ति शास्त्राणि नागेशाचार्येण कदा अधीतानि, कदा च तेन असंख्येयाः शिष्याः अध्यापिताः, कदा वा तेन इयन्तः ग्रन्थाः विरचिताः इत्याद्यालोचनेन बुद्धिपथमुपायते, भक्तिपूरितमनसा करतलसम्पुटीकरणं विना अन्यद् विचारादिकं कर्तुं न कोऽपि पारयति।

## श्रीमन्नागेशभट्टस्य शैली

नागेशकृतीनामवलोकनेनेत्थं ज्ञायते यन्नागेशेन व्याकरणशास्त्रे विशेषतया लेखनी समचालि। स्वभावेनायमात्माभिमान्यासीत्। *वैयाकरणसिद्धान्तमञ्जूषाया*ः एवं स्फोटवादस्यान्ते आत्मानं "वैयाकरणः" इति जुघोष। *उद्द्योत*व्याख्यायां "नागेश भाषितार्थविचक्षणः" इति निजोक्तिरपि तस्यात्माभिमानत्वं सूचयति *महाभाष्यस्य* गूढार्थोऽनेन ज्ञातः आसीत्। तत्र श्रूयते अयमष्टादशवारं गुरुमुखात् *महाभाष्य*मधिजगे। अतोऽस्य रचनायां व्याकरणशास्त्रसम्बन्धिनां प्रायशः सर्वेषां विषयाणां सिद्धान्तानाञ्च विवेचनं *महाभाष्य*रीत्या विद्यते। अयं पातञ्जल*महाभाष्यं* समुन्मथ्य व्याकरणसिद्धान्तान् प्रतिपादयामास। वस्तुतः *महाभाष्य*प्रणयनानन्तरं पाणिनीयसूत्राणां विशदविस्तृतविवेचकः एतत्समोऽन्यो न कोऽपि वैयाकरणः अद्यावध्युपलभ्यते इत्युक्तिः नात्युक्तिः। नागेशः न केवलं व्याकरणस्य प्रकाण्डविद्वानपितु महान्दार्शनिकोऽप्यासीदिति मञ्जूषादिग्रन्थपरिशीलनेन समभिज्ञायते। अस्याचार्यस्य साङ्ख्य-योग-न्याय-वैशेषिक-मीमांसा-वेदान्तादिदर्शनानां मतोद्धरणपूर्वकं व्याकरणमतम् अत्यन्तमुत्कृष्टम्। अस्य व्याकरणदर्शनमीमांसायाम् उपजीव्यग्रन्थस्तु पातञ्जल*महाभाष्यम्*, भर्तृहरिप्रणीतवाक्यपदीयञ्च। वाक्यपदीयमुपजीव्य अयं तार्किकादिपरिशीलितपरिष्कारशैल्या व्याकरणसिद्धान्तान् *मञ्जूषा*दिग्रन्थेषु प्रतिपादयाञ्चकार।

तत्र शक्त्याश्रयनिरूपणबौद्धार्थनिरूपणस्फोटार्थ-धात्वर्थकृदर्थनामार्थसमास शक्त्यादिनिरूपणवेलायां वाक्यपदीयस्य साहाय्यं स्वीचकार। यदा वाक्यपदीयस्य अध्ययनाध्यापनक्रमः लुप्तप्रायोऽभवत्तदा नागेशः वाक्यपदीयसिद्धान्तानां नूतनशैल्या

स्वग्रन्थे परिष्कृतप्रत्ययं दत्त्वा पुनः अस्य ग्रन्थस्य महत्त्वं संरक्षितवान्। एवञ्च *महाभाष्यवाक्यपदीयस्थ*दार्शनिकः विचारः व्याकरणदर्शनपृष्ठभूमेः आधारः नागेशस्येति विद्वद्वचः वास्तवतः सत्यमेव प्रतिभाति। गूढविषयाणां प्रस्थापनाय सः तर्कपद्धतेः आश्रयं स्वीचकार। नागेशरचनासु कोऽपि सिद्धान्तः उपेक्षणीयो न विद्यते। अत एव शाब्दिकानां सिद्धान्तविमर्शविषये एष एव सिद्धान्त इति प्रतिपादयितुं महीयांसोऽपि विद्वांसो व्यामुह्यन्ति एवमिदं प्राचीनमतम्, इदञ्च नवीनमतमिति व्याहरन्तो विलोक्यन्ते। इयञ्च परिपाटी सर्वेषान्नागेशग्रन्थानामेव, अयञ्च ग्रन्थनिर्माणे समासशैलीं सूत्रशैलीं चानुसृतवान्। अतः अस्य स्वाभाविकी शैली तु वैदुष्यपूर्णा इति। नागेशभट्टः स्वरचितव्याकरणग्रन्थेषु प्रौढत्वसम्पादनार्थमल्पैरेव पदैर्बह्वर्थप्रकाशनक्षमतायाः समासशैल्याः सूत्रशैल्याश्चाश्रयं निनाय। व्यासशैल्याः अपि प्रयोगोऽनेन कृतो वर्त्तते इति *बृहच्छब्देन्दुशेखरा*ज्ज्ञायते। तत्र हि दृश्यते व्यासशैल्या प्रतिपिपादयिषितस्य विषयस्य मूलचूलोपस्थापनं, तत्सम्बद्धानां सर्वासां शङ्कानां पूर्वपक्षाणाञ्च प्रतिपदतर्कपूर्णाभिर्वचोयुक्तिभिर्निरसनं, स्वाभिप्रायप्रतिपादनञ्च। नव्यन्यायशैल्याः अपि प्रभावः नागेशस्य रचनायां दरीदृश्यते। तत्र *वैयाकरणसिद्धान्तमञ्जूषायां*, *वैयाकरणसिद्धान्तलघुमञ्जूषायां*, *वैयाकरणसिद्धान्त-परमलघुमञ्जूषाया*म् च अयं नव्यन्यायशैल्यां व्याकरणदर्शनसिद्धान्तान् प्रतिपादयाञ्चकार। यतो हि तदानीन्तनकालः नव्यन्यायवचोयुक्तिसम्पृक्तायाः अवच्छेदकावच्छिन्नेत्यादिशब्द-घटितायाः एव भाषासरितः प्रवाहो विद्वत्सु महता वेगेन प्रावहत्। परन्तु तत्तद्ग्रन्थपर्यालोचनेनेत्थं निश्चीयते यन्नागेशः केवलं दार्शनिकसिद्धान्तपूर्णमञ्जूषात्रितये, यत्र नव्यन्यायसरण्या आश्रयणं विना गम्भीरस्य विचारविमर्शस्यैवासम्भवः तत्रैव एनां शैलीं समाश्रितवान्। एतेषां ग्रन्थानां सतीष्वपि नानाविधानेकव्याख्याटिप्पणीषु ग्रन्थानां

दुरूहत्वमद्यावध्यपि न्यूनतां नोपयाति। स्वाभाविकातिसंक्षिप्तगभीरार्थकनागेशभट्टग्रन्थेषु यत्र कुत्रचित्स्थले प्रतिपाद्यविषये महतामपि प्रायः सन्देहावसरः समुत्पद्यते एव। तत्र व्याख्याकाराः अपि तस्य तात्पर्यं परमार्थतो ग्रहीतुं न शक्नुवन्ति, दिग्भ्रान्ता इव दृश्यन्ते। अतः समग्रतया एवं निगदितुं शक्यते यन्नागेशः यथावश्यकं समासशैल्याः, सूत्रशैल्याः, व्यासशैल्याः, नव्यन्यायशैल्याश्चाश्रयं स्वीचकार। एवं बहुविशेषभाषितोऽयम् *उद्द्योताख्य*ग्रन्थः प्रक्रियाव्याकरणग्रन्थान् सर्वानप्यतिशय्य वैयाकरणकुले राराजते। यद्यपि प्रसादगुणभूयिष्ठा *महाभाष्य*कारााणां शैली, सर्वं मनोदर्पणे प्रतिबिम्बत इवाभाति तथापि तत्रत्यं कमप्येकदेशिभाष्यं, किं सिद्धान्तिभाष्यमिति, विना नागेशग्रन्थान् ज्ञातुं न प्रभवाम इत्यत्रास्ति संदेहलेशः।

### *महाभाष्य*ग्रन्थस्य *उद्द्योत*टीकायाः च परिचयः

श्रीमत्पतञ्जलेः मुख्यतमा कृतिः *महाभाष्यम्* इति। *महाभाष्यं* न केवलं संस्कृतव्याकरणवाङ्मये विषयभाषाशैलीदृष्ट्या मुख्यस्थानं भजते अपि तु सम्पूर्णसंस्कृतवाङ्मये तस्य प्राधान्यमनस्वीकार्यम्। अत्र पाणिनीयसूत्राणि, ततः कात्यायनवार्त्तिकानि उल्लिखितानि ततः पतञ्जलेः अभीष्टानि वाक्यानि अपि योजितानि सन्ति प्रयोजनानुसारेण। अयं ग्रन्थः समीक्षात्मकः, निरूपणात्मकः च दृश्यते, येन न केवलं भाष्यशैल्या विरचितः सामान्योऽयं ग्रन्थः इति मन्तव्यम् अपि तु सम्पूर्णवैज्ञानिकः ग्रन्थः। तस्मात् *महाभाष्यं* दार्शनिकग्रन्थेषु अन्तर्भवति। पाणिनेः कृते स स्वयमेव क्वचित् भगवान्, आचार्यः, मांगलिकः, सुहृद् इत्यादिशब्दान् प्रयुङ्क्ते। तेन पाणिनेः उपरि तस्य श्रद्धा आसीत् इति स्पष्टं प्रयीयते। *महाभाष्यं* सरलं सरसं च वर्तते। विषयप्रतिपादनशैली

विलक्षणा। 'काकपेया नदी, तृणमयः पुरुषः', इत्यादिव्यावहारपदानि, 'पर्याप्तोऽप्येकः पुलकः स्थाल्या निदर्शनाय, न च मृगाः सन्तीति यवा नोप्यन्ते, आम्रान् पृष्टः कोविदारानाचष्टे' इत्यादीनि प्रभावोत्पादकवाक्यानि तेषां भाष्ये उपलभ्यन्ते। भाष्यप्रणयने या संवादरूपा शैली स्वीकृता सा नितरामाकर्षनीया वर्तते। अस्य कालविषये तु पाटलिपुत्रस्य नाम बहुवारं प्राप्यते। वायुपुराणानुसारेण महाराजः उदयी (उदायी) गङ्गायाः दक्षिणकूलोपरि कुसुमपुराख्यं स्थानं निर्मितवान्। तदेव पाटलिपुत्रः इति नामान्तरम् इति अद्यतनीया ऐतिहासिकाः ब्रुवते। तेन महाराजाद् उदयिनः अर्वाचीनः *महाभाष्य*कारः भवति। *महाभाष्य*कारः मौर्यराज्यात् परम् आगतः। मुद्राराक्षसे चाणक्यः चन्द्रगुप्तं प्रायः वृषलः इति सम्बोधयति स्म। महाराजस्य समुद्रगुप्तस्य कृष्णचरिताद् ग्रन्थाद् इदं ज्ञायते यत् महामुनिः पतञ्जलिः महानन्दमयं काव्यं निर्मितवान्। यदि श्लेषेण महानन्दः इति शब्दः महानन्दपद्मस्य वाचकः स्यात् तर्हि अयं निश्चयः अस्ति यत् पतञ्जलिः महानन्दपद्मोत्तरवर्ती आसीत्। एतेन वयम् एतत् कथयितुं शक्नुमः यत् *महाभाष्य*कारः पतञ्जलिः शुङ्गवंश्यमहाराजस्य पुष्यमित्रस्य समकालीनः आसीत्। भारतीयपौराणिककाल-गणनानुसारेण पुष्यमित्रस्य कालः विक्रम १२०० वर्षपूर्वं स्थितः।

सूत्रव्याख्यानयोः विशेषज्ञानं तावल्लभ्यते पारिभाषिकशब्दसमूहज्ञानेन। *महाभाष्यप्रदीपोद्द्योतच्छाया*टीकायां वैद्यानाथः पायगुण्डः लिलेख- तत्रातिशयवर्णना व्याख्यानम् इति। व्याख्यानमूलकग्रन्थास्तावद् बहुविधाः भवन्ति। भाष्य-संग्रह-वार्त्तिक-वृत्ति-चूर्णि-न्यास-पञ्जिका-टीका-टिप्पणी-ढुण्ढिका-प्रकरणादयः। तेषु सूत्रभाष्यवार्त्तिकस्य अधिकं व्यवहारः आसीत्। अत एव श्रीतत्त्वनिधेः लक्ष्मीनारायणसंवादे स्मृतं यत्- सूत्रं भाष्यं वार्त्तिकं च त्रयं शास्त्रेषु वर्ण्यते। इतरस्मात् भाष्यात् किं तावद् वैशिष्ट्यम् अस्येति

चेत्- पातञ्जलमहाभाष्ये इष्टीनां सूत्रवत् समादारः क्रियते। तस्मात् *महाभाष्यमुच्य*ते। अस्य एव व्याकरण*महाभाष्यस्य* सर्वजनप्रसिद्धा टीका श्रीमत्कैयटस्य *प्रदीप*टीका। परन्तु *प्रदीप*टीकायाः काठिन्यात् महामतिः श्रीमन्नागेशः *प्रदीप*टीकायाः *उद्द्योत* इति टीकां विरचितवान्। तदेव सम्प्रदाये *महाभाष्यस्य प्रदीपोद्द्योत*टीका इति नाम्ना सुप्रसिद्धा, कालः प्रायः अष्टादशशतके आसीत् इति अभिप्रायः। *उद्द्योत*टीका वस्तुतः न केवलं *प्रदीप*टीकायाः व्याख्यानग्रन्थः अपि तु *महाभाष्यस्य* गूढार्थप्रतिपादनकाले भाष्यस्य प्रकृतः आशयः, अतिरिक्तदार्शनिकतत्त्वस्य, प्रक्रियांशस्य विचारः सम्यक्रूपेण स्पष्टयति श्रीमन्नागेशः तस्य *उद्द्योत* इति टीकायाम्। *प्रदीप*व्याखानज्ञानं विना *उद्द्योत*ज्ञानं नैव सम्भवति इति तु सुप्रसिद्धमेव। तेन इदं बोद्धुं शक्यते यत् *महाभाष्यम्* इति शब्दशास्त्रे सन्तरणं *प्रदीपोद्द्योतं* विना नैव सम्भवति। अतः *उद्द्योत*टीकायाः माहात्म्यं संस्कृतवाङ्मयस्य शब्दशास्त्रे अविस्मरणीयम्।

# तृतीयोऽध्यायः

## अपादानात् करणकारकपर्यन्तं समीक्षणम्

"अनिर्दिष्टाः प्रत्ययाः स्वार्थे"[1] इति नियमेन स्वादिप्रत्ययाः स्वार्थे न भवन्ति, अपि च "अर्थवदधातुरप्रत्ययः प्रातिपदिकम्"[2] इति सूत्रेण सुबन्तसमुदायनिष्ठमर्थवत्त्वं प्रकृतिमात्रम् आरोप्य स्वादिप्रत्ययानां विधानं कृतं परन्तु तेषां प्रत्ययानां अर्थविशेषो नैव निर्दिष्टः, अतः स्वादिप्रत्ययाः स्वार्थे न भवेयुः इति विषयं मनसि निधाय आरब्धमाचार्येण कारकप्रकरणम्। कारकं षड्विधं भवति, उद्दिष्टस्य लक्षणं लक्षितस्य च विभागः इति नियमेन कारकं नाम किम् इति जिज्ञासायां विभिन्नेषु ग्रन्थेषु आचार्याणां विविधानि मतानि दृश्यन्ते। अतः प्रस्तूयते–

### 3.1. कारके (१-४-२३)।

कारकलक्षणम् यथा- *शब्दकौस्तुभे* "अन्वर्था चेयं संज्ञा करोतीति कारकमिति।" एवमग्रे च तैरुक्तम् "अत्र कारकशब्दः क्रियापरः करोतीति कर्तृकर्मादिव्यपदेशान् इति व्युत्पत्या। तथा च अपादानादिसंज्ञाविधौ क्रियायामित्यस्योपस्थित्या क्रियान्वयिनामेव तत्तत्संज्ञाः स्युः।[3]" अन्यत्र च उक्तं- "अन्वर्था चेयं संज्ञा, करोतीति कारकमिति, तेन क्रियानन्वयिनो न भवन्ति।"[4] इति। एवं प्रकारेण लक्षणं प्रतिफलति क्रियान्वयित्वं

---

[1] प. भा., सं. १२२.

[2] पा. सू. १-२-४५.

[3] श. कौ., द्वि. ख., पा. सु. १-४-२३, सम्पा. गोपालशास्त्री, पृ. ११५.

[4] प्रौ. मनो., का. प्र., सम्पा. सदाशिवशर्माशास्त्री, पृ. ४६३.

कारकत्वम् इति। करोति स्वसम्बन्धेन क्रियायां विशेषरूपतामापादयति इति व्युत्पत्तेः महासंज्ञया क्रियान्वयित्वं कारकत्वम् इति कारकसामान्यलक्षणं स्वीकुर्वन्ति। अथवा "कारके" इत्यस्य "करोति कर्तृकर्मादिव्यपदेशान्[5]" इति व्युत्पत्या कारकशब्दः क्रियापरः। तेन "कारके" इत्यस्य क्रियायाम् इत्यर्थः। महाभाष्ये च प्रोक्तं- "यावद् ब्रूयात् कारके तावद् ब्रूयात् क्रियायाम्" इति। अन्वेति इति पदं च अध्याह्रियते तथा च यत् क्रियायाम् अन्वेति इति सूत्रार्थानुरोधेन लक्षणं समायाति। तेन "राज्ञः पुरुषः" इत्यादौ नामार्थान्वयिनः राज्ञः अपि कारकत्वापत्तिरतस्तद्वारणाय क्रिया पदमुपात्तम्। तथा च न दोषः।

करोति क्रियां निर्वर्तयति इति व्युत्पत्यनुरोधेन क्रियाजनकत्वं कारकत्वम् इति लक्षणं तु आचार्याः नागेशाः अङ्गीकुर्वन्ति, यतो हि "कारके" इति सूत्रे करोति कर्तृकर्मादिव्यपदेशान् इति व्युत्पत्या कारकशब्दः क्रियापरः, सप्तम्यर्थो निरूपितत्वम्, जनकतावद् पदं चाध्यह्रियते। तस्यैकदेशे जनकतायां निरूपितत्वस्यान्वयः, शरैः शातितपत्रः इत्यत्रैव। तथा च क्रियानिरूपितजनकतावद् इति सूत्रार्थानुरोधेनापि क्रियाजनकत्वम् इति लक्षणं संगच्छते। विषयेऽस्मिन् महाभाष्यकारकथनमपि प्रमाणं यथा- "कारक इति संज्ञानिर्देशश्चेत् संज्ञिनोऽपि निर्देशः कर्तव्यः साधकं निर्वर्तकं कारकसंज्ञं भवतीति वक्तव्यम्। इतरथा हि कर्मसंज्ञाप्रसङ्गश्चाऽकथितस्य ब्राह्मणस्य पुत्रं पन्थानं पृच्छतीति। नैषः दोषः। कारकम् इति महती संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः। कुत एतत्, लघ्वर्थं हि संज्ञाकरणम्। तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनम् अन्वर्था संज्ञा यथा विज्ञायेत करोतीति कारकमिति इति।"[6] इति।

---

[5] तदेव, पृ. ४६४.

[6] महा. भा., द्वि. ख., सम्पा. भार्गवशास्त्री जोशी, पृ. २४०.

“नन्वन्वर्थं नाम योगरूढत्वम्”, अपि च “ननु करोतीत्यस्य निष्पादयति इत्यर्थः एवं च निष्पादकत्वे लब्धेऽपि क्रियानिर्वर्तकत्वमित्यर्थलाभः अत आह- क्रियैवेति। क्रियायाः एव शब्देन साध्यत्वप्रतीतेः निर्वर्तकार्थे कारकशब्दे सम्बन्धाङ्क्षायां सैव संबन्धत इति भावः। सम्प्रदानादीनामपि स्वज्ञानद्वारा जनकत्वं बोध्यम्।”[7] इति उद्द्योते।

अर्थात् क्रियाजनकत्वं नाम क्रियानिष्ठजन्यतानिरूपितजनकताश्रयत्वम्। अत्र क्रियापदेन व्यापारस्यैव ग्रहणम्। क्रियते इति व्युत्पत्या क्रियायाः फलम् अप्यर्थः, एवं च क्रियापदेनात्र व्यापारस्य ग्रहणं योगारूढत्वात् इति पूर्वक्तोपदेशेन। व्यापारः धातुवाच्यः एव साध्यभूतः। तथा च धातुवाच्यव्यापारनिष्ठजन्यतानिरूपितजनकतावत्त्वम् धातुवाच्य-व्यापारोत्पत्यनुकूलव्यापारवत्त्वम् वा कारकत्वमिति निष्कर्षः।

एवं च चैत्रः काष्ठैः स्थाल्याम् तण्डुलं पचति इत्यादौ पचधात्वर्थव्यापारः, व्यापारनिष्ठा या जन्यता, तादृशजन्यतानिरूपितजनकत्वं चैत्रादिकर्तरि यत्नादिरूपमनोव्यापारे तद्वत्त्वात् कर्तुः कारकत्वम्। एवं पच्धातुवाच्याधिश्रयणादिव्यापारनिष्ठजन्यतानिरूपितजनकत्वं कर्मणि तण्डुलादौ विद्यमाने विक्लित्तिधारणरूपव्यापारे, करणे काष्ठादौ वर्तमाने ज्वलनादिव्यापारे अधिकरणे स्थाल्यादौ विद्यमाने धारणरूपव्यापारे चास्ति।

अतः तत्तदाश्रयत्वात् तेषां समेषां कारकत्वं सिद्ध्यति इति नागेशानां अभिप्रायः।

[7] महा. भा. उ., द्वि. ख., सम्पा. भार्गवशास्त्री जोशी, पृ. २४०.

### ३.2. ध्रुवमपायेऽपादनम् (१-४-२४)।

“अपायो विश्लेषो विभागस्तद्धेतुत्वाद् अपायहेतोः गतिविशेषश्चेह विवक्षितस्तस्मिन्साध्येऽवधिभूतमपादानसंज्ञं स्यात्।”[8] अत्र अपायो नाम विभागजनको व्यापारः। साध्ये इति पदञ्चाध्याह्रियते। ध्रुवम् इत्यस्यार्थः स्थिरम् अर्थात् तादृशव्यापारनाश्रयः। अतः विभागजनकव्यापारे साध्ये यः तादृशव्यापारानाश्रयः तदपादानसंज्ञं भवति इति समायाति। तत्र द्वयोः संयुक्तयोः अन्यतरस्य चलनात् विभागः उत्पद्यते इति स्थितिः। एवं च तादृशविभागजनकचलनाश्रयः सन् तादृशचलनजन्यविभागाश्रयो यः तदपादानं भवति। परन्तु यत्किञ्चिद्विभागजनकव्यापारानाश्रयत्वं विभागाश्रयत्वं च सर्वत्रैव तिष्ठति तस्मात्सर्वत्रातिप्रसङ्गः, अतोऽत्र विभागजनको व्यापारः प्रकृतधातुवाच्य एव गृह्यते।

अतः तदेव प्राचीनैः प्रोक्तं- “अपायो विश्लेषो विभागस्तद्धेतुत्वाद् अपायहेतोः गतिविशेषश्चेह विवक्षितस्तस्मिन्साध्येऽवधिभूतमपादानसंज्ञं स्यात्।”[9] वृक्षात्पतति। ‘ध्रुवम्’ इत्यत्र ‘ध्रुवगतिस्थैर्ययोः’ इत्यस्मात्कुटादेः पचाद्याच् ये तु ’ध्रुव स्थैर्ये‘ इति पठन्ति। अतः प्राचीनमते अपादानत्वं नाम- “प्रकृतधातूपात्तगत्यनाविष्टत्वे सति तज्जन्यविभागाश्रयः, तच्चार्थादवधेरेवत्याह। अवधिभुतमिति। धावत इति। इह क्रियाविशिष्टस्याप्यश्वस्य प्रकृतधातूपात्तक्रियां प्रत्यवधित्वं न विरुध्यते”[10] इति। अत्र विभागस्य अर्थः वि-पूर्वकाद् भज् धातोः घञ्प्रत्यये सति विभागशब्दो निष्पद्यते। अयं च विभागशब्दः पारिभाषिकः। अत

---

[8] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. ११५.

[9] तत्रैव.

[10] प्रौ. मनो., का. प्र., सम्पा. सदाशिवशर्माशास्त्री, पृ. ५३५.

एवास्य लक्षणं प्रोक्तं श्रीमदन्नंभट्टेन- "संयोगनाशको गुणो विभागः" अर्थात् संयोगनाशकत्वे सति गुणत्वं विभागत्वम् इति। विश्वनाथेन पञ्चाननभट्टाचार्येण तु- "विभक्तप्रत्ययासाधारणं कारणं विभागः"[11] इत्युक्तम्। अर्थात् "इमौ विभक्तौ" इति प्रतीतेः यदसाधारणं कारणं तदेव विभागः इत्यर्थः।

अयं च विभागस्त्रिविधः– अन्यतरकर्मजोभयकर्मजविभागजविभागभेदात्। अत एवोक्तं विश्वनाथपञ्चाननभट्टाचार्येण–

"…..विभागोऽपि त्रिधा भवेत्।
एककर्मोद्भवस्त्वाद्यो द्वयकर्मोद्भवोऽपरः॥
विभागजस्तृतीयः स्यात्तृतीयोऽपि द्विधा भवेत्।
हेतुमात्रविभागोत्थो हेत्वहेतुविभागजः॥" इति।[12]

अथवा अयं विभागो द्विविधः कर्मजविभागजभेदात्। तत्र कर्मजविभागोऽपि द्विविधः अन्यतरकर्मजोभयकर्मजभेदात्। एवं विभागजविभागोऽपि द्विविधः– कारणमात्रविभागजन्यः, कारणाकारणविभागजन्यश्च।

एवं चात्र निष्कर्षतया वक्तुं शक्यते यदयं विभागश्चतुर्विधः– अन्यतरक्रियाजन्यः, उभयक्रियाजन्यः, कारणमात्रविभागजन्यः, कारणाकारणविभागजन्यश्च। तत्राद्यः श्येनशैलविभागः। द्वितीयः– परस्परमेषयोः विभागः। तृतीयः– यदा यत्र एककपालेऽवयवेऽदृष्टादिवशात्क्रिया जाता ततः तयैव क्रियया कपालद्वयसमवेतविभागः, अतोऽयं कारणमात्रविभागजन्यः। चतुर्थः– यत्र हस्तक्रियया हस्ततरुविभागे हस्तक्रिया न

---

[11] न्या. सि. मु., सम्पा. श्रीकृष्णवल्लभाचार्यः, पृ. १२३.

[12] तत्रैव.

कारणं व्यधिकरणत्वात्। शरीरे तु क्रिया नास्त्येव अवयवविकर्मणोः यावदवयवकर्मनियतत्वात्। अतस्तत्र कारणाकारणविभागः।

अतः विभागश्च न वास्तवसम्बन्धपूर्वको वास्तव एव। तथा च "देवदत्तः प्रयागात् वाराणसीं गच्छति", "यज्ञदत्तः ग्रामाद् विद्यालयं गच्छति" इत्यादौ तु संयोगपूर्वकस्य विभागस्य सत्वाद् विभागाश्रयस्य प्रयागादेः तु अपादानसंज्ञा भविष्यति। परन्तु 'मथुराः पाटलिपुत्रकेभ्यः आढ्यतराः' इत्यत्र पाटलिपुत्रकस्य अपादानसंज्ञा न स्यात्, एवं च कथमस्य 'मथुराः पाटलिपुत्रकेभ्यः आढ्यतराः' इति प्रयोगस्य सिद्धिः इति चेदत्रोच्यते, अत्र सूत्रे विभागो न वास्तवसम्बन्धपूर्वको वास्तव एव गृह्यते, अपि तु बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिपरिकल्पितोऽपि ग्राह्यः। एवं 'मथुराः पाटलिपुत्रकेभ्यः आढ्यतराः' इत्यादौ बुद्धिपरिकल्पितविभागमादायापादानत्वं बोध्यम्।

अत्र सूत्रे बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिः परिकल्पितोऽपि विभागः आश्रीयते इत्यत्र प्रमाणन्तु भाष्यमेव। तत्र भाष्यकृता- 'अधर्माज्जुगुप्सते' इत्यत्र संश्लेषपूर्वकस्य विश्लेषस्याभावात्तदाश्रयस्याधर्मादेरपादानत्वं न स्यादतः 'अधर्माज्जुगुप्सते' इत्यादावपादानत्वं सिद्ध्यर्थं प्रोक्तं भाष्यकारेण– "जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्॥ जुगुप्साविरामप्रमादार्थानामुपसंख्यानम् कर्तव्यम्॥ जुगुप्सा अधर्माज्जुगुप्सते। अधर्माद् बीभत्सते॥ विरामः धर्माद्विरमति। धर्मान्निवर्तते॥ प्रमादः धर्मात् प्रमाद्यति। धर्मान् मुह्यति॥ इदं चोपसंख्यानं कर्तव्यम्। सांकाश्यकेभ्यः पाटलिपुत्रकाः अभिरूपतराः इति"।[13]

[13] महा. भा., द्वि. ख., पा. सू. १-४-२४., सम्पा. भार्गवशास्त्री जोशी, पृ. २४८.

एवं प्रकारेण वार्त्तिकस्य व्याख्यानं कृत्वा तदनन्तरं बुद्धिपरिकल्पितविभागमादाय "ध्रुवमपायेऽपादानम्" इति सूत्रेणैवोक्तप्रयोगाणां सिद्धिं कृत्वा प्रत्याख्यातं वार्त्तिकं भगवता भाष्यकारेण।

तथाहि– "तत्तर्हीदं बहु वक्तव्यं, न वक्तव्यम्। इह तावद् अधर्माज्जुगुप्सते अधर्माद्बीभत्सते इति। य एष मनुष्यः प्रेक्षापूर्वकारी भवति सः पश्यति दुःखोऽधर्मो नानेन कृत्यमस्तीति। स बुद्ध्या संप्राप्य निवर्तते। तत्र 'ध्रुवमपायेऽपादानम्' इत्येव सिद्धम्। इह तावद् धर्माद्विरमति धर्मान्निवर्तते इति। धर्मात्प्रमाद्यति इति। इह य एष मनुष्यः संभिन्नबुद्धिर्भवति स पश्यति नेदं किञ्चिद्धर्मो नाम नैनं करिष्यामीति स बुद्ध्या सम्प्राप्य निवर्तते। तत्र 'ध्रुवमापयेऽपादानम्' इत्येव सिद्धम्"।[14]

एवं भाष्यप्रामाण्येनात्रेदं स्पष्टतया ज्ञातं यद् अत्र बुद्धिपरिकल्पितसम्बन्धपूर्वको बुद्धिपरिकल्पितोऽपि ग्राह्यः। तथा च 'मथुराः पाटलिपुत्रकेभ्यः आढ्यतराः' इत्यादौ न दोषः।

अथवा विभागः द्विविधः, मुख्यः गौणश्च। तत्र वास्तवसंयोगपूर्वको यत्र वास्तवविभागः सः मुख्यः। बुद्धिपरिकल्पितसम्बन्धपूर्वकश्च यो बुद्धिपरिकल्पिविभागः सः गौणः। यतो हि कारकप्रकरणे मुख्योऽपि समाश्रीयते, गौणोऽपि समाश्रीयते। "साधकतमं करणम्" इति सूत्रे तमब्ग्रहणबलात्। अतः कारणप्रकरणे गौणस्यापि ग्रहणम् भवति। अतः प्राचीनमतानुसारेण प्रकृतधातुवाच्यव्यापारानाश्रयत्वे सति तज्जन्यविभागाश्रयत्वम् अपादानत्त्वम् इति सूत्रार्थः।

'धावतः अश्वाद् अश्ववाहः पतति' इत्यादौ तु पर्वतनिष्ठविभागजनकव्यापारस्याश्रयोऽश्वः यद्यपि अस्ति, तथापि अश्वनिष्ठो यो हि विभागः

---

[14] तत्रैव.

तज्जनको यो हि अश्ववाहनिष्ठविभागस्तस्य तु अनाश्रयः एव अश्वः। एवं तत्र अपादानत्वसिद्धिः। यतो हि प्रकृतधातुः पच् धातुः, तद्वाच्यो व्यापारः अश्वनिष्ठविभागजनकः अश्ववाहनिष्ठव्यापारः, तादृशव्यापारस्यानाश्रयः अश्वः, किञ्च तादृशव्यापारजन्यः विभागाश्रयोऽपि अश्वः तस्मात् तस्य अपादानत्वसिद्धिः।

'प्रयागाद् वाराणसीं गच्छति देवदत्तः' इत्यादौ तु प्रयागस्य अपादानत्वं न स्यात् व्यापारस्य कालिकसम्बन्धेन व्यापाराश्रयत्वाद् इति चेत्, न, व्यापारानाश्रयत्वमत्र व्यापारतावच्छेदकसम्बन्धेन बोध्यम्। तेन व्यापारतावच्छेदकसमवायादिसम्बन्धेन तदनाश्रयत्वात् न दोषः।

नवीनाः आचार्याः नागेशभट्टाः प्राचीनोक्तम् अपादानलक्षणं नैव स्वीकुर्वन्ति, किन्तु भिन्नमेव अपादानत्वस्वरूपं प्रतिपादयन्ति। तेषामभिप्रायऽस्ति यत् प्राचीनोक्तापादानत्वस्वीकारे भाष्यविरोधः। यथा रथात् प्रवीतात्पतितः, त्रस्तादश्वात्पतितः, सार्थात्गच्छतो हीनः, इत्यादौ गतियुक्तेष्वपादानसंज्ञा न स्यात् गतियुक्तस्याध्रुवत्वाद् इति भाष्यकारेण शंकितम्। तत्रोक्तं भाष्यकारेण "गतियुक्तेष्वापादानसंज्ञा नोपपद्यतेऽध्रुवत्वात्। गतियुक्तेष्वपादानसंज्ञा नोपपद्यते। रथात्प्रवीतात्पतितः। अश्वात्त्रस्तात्पतितः। सार्थाद्गच्छतो हीनः इति। किं कारणम्। अध्रुवत्वात्।"[15] इति।

एवं प्रकारेण गतियुक्तेषु अपादानसंज्ञायाः अव्याप्तिः प्रदर्शिता। दोषप्रदर्शनानन्तरं समाधानप्रसङ्गे प्रोक्तं भाष्यकारेण यद् ध्रौव्यस्याविवक्षितत्वान्न दोषः।

तथाहि- "न वाऽध्रौव्यस्याविवक्षितत्वात्, न वा एषः दोषः। किं कारणम्। अध्रौव्यस्याविवक्षितत्वात्। नात्राध्रौव्यं विवक्षितम् किं तर्हि। ध्रौव्यम्। इह तावत्

[15] तत्रैव.

अश्वात्त्रस्तात्पतितः इति यत्तदश्वेऽश्वत्वमाशुगामित्वं तद्ध्रुवं तच्च विवक्षितम्। रथात्प्रवीतात्पतितः इति यद्रथे रथत्वे रमन्तेऽस्मिन् रथ इति तद्ध्रुवं तच्च विवक्षितम्। सार्थाद् गच्छतो हीन इति यत्तत्सार्थे सार्थत्वं सहार्थभावः तद्ध्रुवं तच्च विवक्षितम्।"[16]

अतः नागेशभट्टानां मते प्राचीनमतखण्डने– "भाष्यानुसारिणस्तु एवं हि त्रस्तादश्वात्पतितः- धावतः पतति' इत्यादौ ध्रुवत्वाभावादपादानत्वं न स्यादित्याशङ्क्य 'अध्रौव्यस्याविवक्षितत्वमत्र यत सतोऽप्यविवक्षा भवति इति समाहितं भाष्ये, तदसङ्गतं स्यात्। तदुक्ताध्रुवत्वस्य पतधात्वर्थव्यापाराश्रयत्वस्यात्रासत्त्वेन सतोऽध्रौव्यस्याविवक्षा इत्यस्य असङ्गतेः। सिद्धान्तेऽपि तु उक्तध्रुवपदार्थकथनमेवोचितमिति तदसङ्गतिश्च, लोकसिद्धातिरिक्तार्थे ध्रुवपदस्य शक्तिकल्पने गौरवञ्च।"[17] एवं च भाष्यविरोधात् प्राचीनमतं स्वीकृत्य भाष्यसम्मतं विशिष्टमेव अपादानत्वं प्रतिपादयन्ति।

तथाहि– 'ध्रुवमपायेऽपादानम्' इति सूत्रे 'अपाये' इत्यस्य 'गतिविशेषे' इत्यर्थः। 'गतिर्विना त्ववधिना नापाय इति कथ्यते' इति हर्युक्तेः। 'ध्रुवम्' इत्यस्य च 'अवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वोपयोगिव्यापारस्यानाश्रयम्' इत्यर्थः। एवं च सम्पूर्णसूत्रस्य अर्थो भवति "अपाये– गतिवेशेषे सति यद्ध्रुवम्– अवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वोपयोगिव्यापारस्यानाश्रयं तदपादानम्" इति। अत एवोक्तं नागेशभट्टेन "तस्मादपाये गतिविशेषे सति यद् ध्रुवम्– अवधिभावोपगमाश्रयत्वे सति तदतिरिक्तिस्यावधित्वोपयोगिव्यापारस्यानाश्रयं

[16] तदेव, पृ. २४९.

[17] ल. श. शे., का. प्र. (पा. सू. १-४-२४), सम्पा. तेजपालः शर्मा, पृ. २३३.

तदपादानमिति सूत्रार्थः"।[18] यथा 'देवदत्तः प्रयागाद् वाराणसीं गच्छति' इत्यत्र गतिविशेषः – विभागजनकः संयोगानुकुलव्यापारः, तस्मिन् सति अवधिभावोपगमाश्रयः अश्वः। तदतिरिक्तस्य अवधित्वोपयोगिव्यापारस्यानाश्रयः अश्वः, तस्मात्तस्यापादानत्वम् अपादानत्वाच्च तत्र पञ्चमी सिद्ध्यति।

अतः गतिविशेषे सति यद् ध्रुवम्-अवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वोपयोगिव्यापारस्यानाश्रयं तदपादानम् इत्येव अपादानलक्षणं स्वीकर्तव्यम् इति नवीनामाशयः।

अथ गतिविशेषे सति यद् ध्रुवम् अवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वोपयोगि व्यापारस्यानाश्रयं तदपादानम् इति लक्षणे स्वीक्रियमाणे 'परस्परस्मात् मेषौ अपसरतः' इत्यत्र परस्परस्मात् इत्यस्य अपादानसंज्ञा न स्यात्। परन्तु कथं 'परस्परस्मात् मेषौ अपसरतः' इति प्रयोगसिद्धिः।

अत्र उच्यते 'शब्दभेदादर्थभेदः' इति नियमेन परस्परशब्दमेषशब्दयोः भेदः बोध्यः। एवं च तत्र भेदमुपपाद्य मेषपदवाच्ययोः व्यापाराश्रयत्वविवक्षायां कर्तृत्वं परस्परशब्दवाच्ययोः व्यापाराश्रयत्वाऽविवक्षायां विभागाश्रयत्वविवक्षायां च परस्परशब्दवाच्ययोः ध्रुवत्वमुपपाद्य अपादानत्वं बोध्यम्। तथा च तादृशप्रयोगसिद्धिः। अतः एव आत्मा आत्मानं पश्यति इत्यादौ आत्मनरूपाधिकृतभेदमारोप्य करणत्वं कर्मत्वं च सिद्ध्यति। उक्तं च नागेशेन– "परस्परस्मान्मेषावपसरतः इत्यादौ मेषपदोपात्तादपादानत्वम्। मेषपदोपात्ते तदविचक्षणात्। प्रयोगानुसारित्वाद् विवक्षायाः। आत्मानमात्मना

---

[18] तत्रैव.

इत्यादावन्तःकरणाद्युपाधिकृतभेदात् शब्दरूपोपाधिकृतभेदाग्रहणे मानाभावात्। शब्दलिङ्गितार्थभानस्यैव सत्वाच्चेत्यन्यत्र विस्तरः”[19]।

उद्द्योतेऽपि उक्तं नागेशभट्टेन– “किं च मेषपदोपात्तात्तयोरेव क्रियाश्रयत्वं परस्परपदोपात्तात्तयोर्विभागश्रयत्वमेवेति तत्र न दोषः। अन्यथा वस्तुतस्तदाश्रयक्रियाभेदेऽपि धातुना विभागद्वयस्य तज्जनकक्रियाद्वयस्य च निवृत्तभेदस्यैवोपादानात्परत्वात्कर्तृत्वमेव दुर्वारं स्यात्। आत्मानमात्मना इत्यादावन्तःकरणाद्युपाधिना भेदस्येव शब्दरूपोपाधिकृतभेदस्यात्रापि सत्वाच्च। अस्मन्मते शब्दानुबिद्धार्थस्यैव भानाच्च।”[20] अथ यदि एवंप्रकारेण “परस्परस्मात् मेषौ अपसरतः” इत्यत्र कर्तृत्वापादानत्वयोः व्यवस्था क्रियते चेत्तदा -

**मेषान्तरक्रियापेक्षमवधित्वं पृथक् पृथक्।**

**मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक् पृथक्॥**[21]

इति हरिकारिकायाः अपि असंगतिः। अतः कर्तृत्वापादानत्वयोः अव्यवस्थापनाद् इत्यत्र नाशंकनीयम्। अत एवोक्तं नागेशभट्टेन- “हरिकारिकायामपि अवधित्वम् इत्यस्य परस्परपदोपात्तयोरिति शेषः। कर्तृत्वम् इत्यस्य च मेषपदोपादत्तयोरिति शेषः इति वदन्ति”[22]। अत एव च “देवदत्तयज्ञदत्तौ अन्योन्यम् आश्लिष्यतः” इत्यादौ कर्मत्वसिद्धिः। अन्यथा परत्वात्कर्तृत्वमेव स्यात्।

---

[19] ल. श. शे., का. प्र., पा. सू. १-४-२४, सम्पा. तेजपालः शर्मा, पृ. २३४.

[20] महा. भा. उ., द्वि. ख., सम्पा. भार्गवशास्त्री जोशी, पृ. २५०.

[21] वा. प., सा. समु., का. १४१.

[22] महा. भा. उ., द्वि. ख., सम्पा. भार्गवशास्त्री जोशी, पृ. २५०.

### ३.३. भीत्रार्थानां भयहेतुः (१-४-२५)।

सूत्रे भीत्राशब्दौ भावक्विवन्तौ। तत्र सूत्रे *शब्दकौस्तुभ*कारस्य आशयस्तावत् भयार्थकानां त्राणार्थकानां च धातूनां प्रयोगे भयहेतुः कारकं अपादानं स्यादिति इति प्रकृतसूत्रार्थः, अस्य उदाहरणं तावत् चौरेभ्यः बिभेति। तथा च *शब्दकौस्तुभ*कारः कथयति- "भयं भीः, त्राणं त्राः, भयार्थानां त्राणार्थानाञ्च योगे भयहेतुः कारकमपादानं स्यात्"[23] इति।

ननु भयार्थानां धातूनां योगे भयहेतुः कारकम् अपादानं इति तु संगच्छते। किन्तु त्राणार्थानां धातूनां योगे भयहेतुः कारकम् अपादानम् इति कथं संगच्छते इति एनमाशयं मनसि निधाय *शब्दकौस्तुभ*कारः कथयति- "भयहेतुग्रहणं चिन्त्यप्रयोजनम्"[24] इति।

ननु अरण्ये बिभेति इत्यादौ कथम् अधिकरणसंज्ञा इति चेत् परत्वाद् अधिकरणसंज्ञा इति अवगन्तव्यम्। तर्हि प्रश्नः उदेति- "कस्य बिभ्यति देवाश्च जातरोषस्य संयुगे" इति रामायणश्लोके बिभ्यति योगे कथं तावत् "कस्य" इति षष्ठी। तत्र उच्यते *शब्दकौस्तुभ*कारेण- कस्य संयुगे इति योजनया सः श्लोकः व्याख्येयः।

भाष्यकारस्तु सूत्रमेव नाङ्गीकरोति। ध्रुवमपायेऽपादनम् इति सूत्रेणैव तद्गतार्थत्वं प्रतिपादयति। तत्र *प्रदीप*कारेण *उद्द्योत*कारेण च सूत्रास्तित्वपक्षः सूत्रानस्तित्वपक्षः च स्वीक्रीयते। प्रथमं तावत् *प्रदीप*कारेण बुद्धिकल्पितापायेन सूत्रं प्रत्याख्याति। तथा च सः वदति- "बुद्धिव्यवस्थापितोऽत्रापायोऽस्तीति भावः। तत्र निवृत्त्यङ्गे भये बिभेत्यादयो वर्तन्ते इत्यापत्तिविषयमेतदपादानम्। चोरमध्यगतस्यापि त्राणे चोरसंपर्कफलस्य

[23] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. ११८.

[24] तत्रैव.

वधबन्धनापहरणादेर्निवर्तनात्तेभ्यो निवर्तयतीत्युच्यते”[25] इति। अनन्तरं तन्नये कारकसूत्रारम्भपक्षे कारकशेषत्वात् षष्ठ्यां प्राप्तायां इदं सूत्रमिति ज्ञातव्यम्।

*भाष्यप्रदीप*म् अनुसरता उच्यते सूत्रप्रत्याख्याने षष्ठ्या अनभिधानात् निवृत्तिः बोद्धव्या। क्रियां प्रति जनकत्वेन विवक्षायाम् एषा अपादानसंज्ञा विहिता। सम्बन्धत्वेन विवक्षायां तु षष्ठ्याम् इष्टापत्तिः अस्ति एव। सूत्रप्रत्याख्याने प्रश्नः उदेति सूत्रमिदं कुतः आरब्धं पाणिना, तदा भर्तृहरिमतसहयोगेन प्रपञ्चार्थमिदं सूत्रमारब्धम् इति प्रतिपादयति। तथा च तेन उक्तं- “सूत्राणि प्रपञ्चार्थान्येवेति हरयः”[26] इति।

### 3.4. पराजेरसोढः (१-४-२६)।

परापूर्वक-जिधातुः, असोढः ग्लानिविशेषः। कृतिसाध्यत्वाभावधी-समानाधिकरणोऽनुत्साहः पराजयतेरर्थः। अपादानसंज्ञार्थे यथा अध्ययनात् पराजयते (विपराभ्यां जेः)। अत्र असाध्योऽर्थोऽध्ययनम्। ततो ग्लायति इत्यर्थः। असाध्यर्थत्वाभावेन शत्रून् पराजयते इत्यत्र कर्मसंज्ञा नापादानसंज्ञा। अत्र तिरस्कारानुकूलो व्यापारो धात्वर्थः। अभिभवति- अनादरः परिभवः परीभावस्तिरक्रिया इति कोषः। तथा च अध्ययनसम्बन्धिनी ग्लानिरित्यर्थः। जन्यजनकभावसम्बन्धेन एव उचितः यतो हि अयं विषयः कारकाधिकारे पठितो वर्तते, अध्ययनजन्यग्लानिः इत्यर्थः। भाष्यकारस्तु सूत्रमेव नाङ्गीकरोति।

वस्तुतः नवीनाः तु एवं “पराजेः” इति सूत्रस्य यः एव मनुष्यः प्रेक्षापूर्वकारी भवति सोऽध्ययनस्य दुःखत्वबुद्ध्या ततो निवर्तते, इति प्रत्याख्यानैकवाक्यतया

---

[25] महा. भा. प्र., द्वि. ख., सम्पा. भार्गवशास्त्री जोशी, पृ. २५०.

[26] महा. भा. उ., द्वि. ख., सम्पा. भार्गवशास्त्री जोशी, पृ. २५०.

योऽध्ययनार्थमप्रवृत्तः तत्राप्ययं प्रयोग इष्ट एवेति परापूर्वकजिधातुः अनिष्टसाधकत्वप्रकारकज्ञानमर्थः। अध्ययनपदस्य अध्ययनज्ञाने लक्षणा। एवञ्चाध्ययनज्ञानजन्यमध्ययनविशेष्यकमनिष्टसाधकत्वप्रकारकं ज्ञानमिति फलितम्। अतः तस्मात् निवर्तते, इति लक्ष्मीटीकायामुल्लिखितम्[27]।

### ३.5. वारणार्थानामीप्सितः (१-४-२७)।

वारणार्थकधातोः फलाश्रयार्थे अपादानसंज्ञा। प्रवृत्तिरोधः एवं वारणम्, अग्नेर्माणवकं वारयति, वारिधातोः संयोगानुकूलव्यापाराभावानुकूलव्यापारः अर्थः अत्र फलं द्विधा संयोगः अपरं च संयोगानुकूलव्यापाराभावः, वारिधातोः योगे वारिधात्वर्थव्यापारप्रयोज्यसंयोगः फलाश्ररयः अग्निः एवं संयोगानुकूलव्यापाराभावरूपः फलाश्रयः माणवकः उभयोः अपादानसंज्ञा। तथैव “यवेभ्यो गां वारयति” इत्यत्रापि भक्षणानुकूलव्यापाराभावानुकूलव्यापारः संगमनीयः।

प्रकृतसूत्रेण प्रधानीभूतव्यापारजन्यफलाश्रयः अपि च अप्रधानीभूतव्यापारजन्यफलाश्रयः उभयोः अपादानसंज्ञा भवति। किन्तु “कर्त्तुरीप्सितमं कर्म” शास्त्रेण प्रधानीभूतव्यापारजन्यफलाश्रयस्य कर्मसंज्ञा भवति, अर्थात् कर्त्तुरीप्सिततमं कर्म इति सूत्रेण तमप्प्रत्ययसामर्थ्यात् स्वप्रयोज्यत्वसम्बन्धस्य निवेशेन प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यफलाश्रयस्य माणवकस्य कर्म। अपि च माणवके स्थितः अप्रधानीभूतव्यापारेण प्रयोज्यः संयोगरूपफलस्य आश्रयः अग्निः, तत्र अपादानज्ञा इत्येवं प्रकृतसूत्रस्य प्रयोगोपपत्तिः।

---

[27] वै. सि. कौ., द्वि. भा., सम्पा. पण्डितसभापतिमिश्रः, पृ. १०४.

## ३.६. अन्तर्धौ येनादर्शनमिच्छति (१-४-२८)।

व्यवधाने यत्कर्तृकदर्शनाभावस्य इच्छा प्रभवति, तत्र कर्तृत्वे अपादानसंज्ञा। यथा "मातुर्निलीयते कृष्णः" इत्यत्र कर्तुः इच्छा मातृकर्तृकदर्शनाभावः, मातुः अपादानसंज्ञा। अन्तर्द्धिशब्दस्य अन्यकर्त्तृकस्वकर्मकदर्शनाभावानुकूलव्यवहितदेशा स्थितिः अर्थः। अतः कौमुद्यां "व्यवहिते सति" इति। 'येनादर्शनम्' इत्यत्र 'येन' कर्त्तृबोधकं पदम् 'अदर्शनम्' कृत्प्रत्ययान्तः शब्दः, अतः "कर्तृकर्मणोः कृतिः" इति सूत्रेण कर्तृबोधपदे षष्ठी भवेत्। छन्दोवत्सूत्राणि भवन्ति इति समाधानेन यथोपदिष्टं साधु वर्तते, अतः न षष्ठीविभक्तिः। अत्र उदाहरणे इच्छति पदस्य अप्रयोगे कथम् अपादानं यतो हि यत्कर्त्तृकदर्शनाभावः इति फलति। समाधानं तु एवम् आक्षेपेण इच्छति पदस्य लाभः, तेन प्रयोगपपत्तिः।

"चौरान् न दिदृक्षते" इत्यत्र तु सूत्रे व्यवहृतः 'अन्तर्द्धौ' इति पदेन निवार्यते। आत्मकर्मकचौरकर्तृकदर्शनाभावस्य इच्छायां सति व्यवधानाभावे कर्तृत्वस्य चौरस्य न अपादानसंज्ञा।

यद्यपि "चौरान न दिदृक्षते" इति वाक्ये चौरकर्मकदर्शनाभावेच्छानुकूलव्यापारस्य शाब्दिकार्थः गृह्यते। तेन चौरः मां पश्येत् अतः चौरमहं न पश्यामि इत्यत्र चौरकर्तृक-आत्मकर्मक-दर्शनाभावस्य इच्छा। अतः अपादानसंज्ञायाः प्राप्तिर्भवेत्।

श्रीमद्नागेशभट्टपादानां समाधानं तु एवं- प्रकृतस्थले कर्तुः येन आक्षेपेण इच्छायाः लाभो भवति तथैव चौरकर्तृक-आत्मकर्मकदर्शनाभावरूपविशिष्टेच्छा इति तेनाक्षेपेण एव लभ्यते, अतः कर्तुः न अपादानसंज्ञा।

‘येने’ति पदस्य तु व्यवधाने सति दर्शनाभावेच्छा इत्यत्र अपादानसंज्ञा। “अन्तर्द्धौ अदर्शनमिच्छति” इति सूत्रोपदेशे तु यः दर्शनाभावमिच्छति तत्रापि अपादानसंज्ञायाः प्राप्तिः। अतः ‘येन’ उपदेशः।

इच्छतिपदं तु माता आगच्छति, कृष्णस्य इच्छा, माता मां न पश्येत्, किन्तु माता पश्यति इति व्यवहारे कर्तुः दर्शनादर्शनाभावपरिस्थितौ यत्कर्तृकदर्शनाभावेच्छा अभिलषितदर्शनाभावस्य कर्ता, तत्रैव अपादानसंज्ञाविधानम्।

### 3.7. आख्यातोपयोगे (१-४-२९)।

नियमपूर्वकविद्यास्वीकारः उपयोगः। उपयोगे अपादानं, उपाध्यायाद् अधीते। उपयोगस्य तु व्यापारार्थः अर्थात् फलायते इति भावः, ध्यानसमाधिब्रह्मचर्यादिव्रतपालनपूर्वकविद्यास्वीकारः इत्यार्थः रूढिः अन्यत्र लक्षणा च।

‘नटस्य गाथां शृणोति’ इत्यत्र तु नियमाभावात् प्रवृत्तिः, व्यापारसामान्यस्य प्रतियत्नाभावः। नटं विना गीतश्रवणाद्ययोगात्तस्य तज्जनकतया कारकत्वं कुलालपितृवदन्यथासिद्धत्वसम्भावनया च अकारकत्वमिति भावः। अतः उपयोगपदस्य व्यर्थता इति उद्द्योतांशस्य आशयः।

नटमुखान्तर्गत-दन्त्यादि-उच्चारणस्थानात् निःसृतवायुसंयोगगायनम्, एवं शृणोतिक्रियानिरूपितकारकत्वं नटे वर्तते अतः अपादानसंज्ञा। किन्तु उपोयोगशब्दसामर्थ्यबलात् ‘नटस्य गाथां शृणोति’ इति स्थले अपादानसंज्ञा न।

### ३.४. जनिकर्त्तुः प्रकृतिः (१-४-३०)।

शृणोति जायमानस्य हेतुरपादानं स्यात्, पुत्रात्प्रमोदो जायते। इह जनिरुत्पत्तिः। 'जनिरुत्पत्तिरुद्भवः' इत्यमरः[28]। 'इञजादिभ्यः'[29] इति जनेर्भावे इञ् जनिघसिभ्याम् इत्यादिसूत्रेण अण् वा। 'जनिवध्योश्च'[30] इति वृद्धिप्रतिषेधः। तस्याः कर्तेति षष्ठीतत्पुरुषः। कर्त्तरि च इति प्रतिषेधस्त्वनित्यः, अत एव ज्ञापकात्। यद्वा शेषषष्ठ्या समासोऽयम्। निषेधस्तु कर्मषष्ठीविषय इति 'कारके' कैयटाः। तथा चार्थमात्रस्याग्रहणाद्धात्वन्तरयोगोऽपि भवति "अङ्गादङ्गात्सम्भवति" इति यथा। एतेन 'इक् श्तिपौ धातुनिर्देशे इतीका (का.वा.)' निर्देशोऽयमित्याश्रित्य "गमहन..."[31] इत्युपधालोपमर्थासङ्गतिं च उद्भावयन्तो मीमांसावार्त्तिककाराः समाहिताः। अत्र प्रकृतिग्रहणमुपादानमात्रपरमित्येके। अत एव "प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुपरोधात् (ब्र. सू.)" इत्यधिकरणे ब्रह्मणो जगदुपादानतायां "यतो वा इमानि भूतानि जायन्ते" इति पञ्चमीमुपष्टम्भिकामाहुः। अन्ये तु 'पुत्रात्प्रमोदो जायत' इति वृत्तिस्वरसात्प्रकृतिशब्दः इह कारणमात्रपर इत्याहुः। अस्मिन् च पक्षे यतो वा इति सामान्यशब्दोऽपि उपादानरूपविशेषपरः छागो वा मन्त्रवर्णाद् इति षाष्ठन्यायात्। 'अहमेव बहु स्याम्' इति हि सामानाधिकरण्यं श्रूयते। तच्च चतुर्धा- भ्रमे, बाधायाम्, अभेदे, तादात्म्ये च। प्रकृते तादात्म्ये, भिन्नत्वे सत्यभिन्नसत्ताकत्वम् अविद्यकः सम्बन्धविशेषो वा तादात्म्यमित्याद्युत्तरमीमांसायां स्पष्टम्।

---

[28] अ. को., ०१.०४.३०.

[29] का. वा.

[30] पा. सू., ०७.०३.३५.

[31] पा. सू., ०६.०४.९८.

अत्र प्रकृतसूत्रेण नवीनामाशयः प्रकृतिः उपादानकारणम्, अभिन्ननिमित्तोपादानकारणस्य ग्रहणम्, यतो हि उपादानकारणस्य क्वचित् कार्यस्य नाशात् अनन्तरं नाशो भवति। यथा पटनाशे तन्तुनाशः, परन्तु प्रजानां नष्टे नैव ब्रह्मणः नाशः। स्वतन्त्रस्य कालकृत-वस्तुकृत-स्थानकृत-परिच्छेदशून्यनिरवच्छिन्नब्रह्मणः ‘एकोऽहं बहु स्याम्’ इत्याकारकेच्छासंबलितस्वरूपे विवक्षा। अतः अत्र प्रकृतिः इत्यस्य तात्पर्यम् उपादानकारणम्, अर्थात् मायासंवलितं ब्रह्म।

‘विभाषा गुणेऽस्त्रियाम्’ इति सूत्रेण अस्त्रीलिङ्गवृत्तिगुणवाचकशब्दानां विकल्पेन पञ्चमीविभक्तिः भवति। यथा- ‘जाड्येन जाड्याद्वा बद्धः’ इति। किन्तु प्रकृतसूत्रे विभाषाशब्दः बाहुलकस्य उपलक्षणम्। अतः क्वचित् स्त्रीलिङ्गवृत्तिशब्दे, अगुणवाचके, नित्ये पञ्चमीविभक्तेः विधानं भवति। यदि एवंरूपेण ‘ब्रह्मणः प्रजाः प्रजायन्ते’ इति वाक्ये ‘ब्रह्मणः’ इति पदे पञ्चमीविभक्तेः विधानं “विभाषा गुणेऽस्त्रियाम्” इति सूत्रेणैव स्यात् तर्हि ‘जनिकर्त्तुः प्रकृतिः’ इति शास्त्रोपदेशः व्यर्थः।

यद्यपि “विभाषा गुणेऽस्त्रियाम्” सूत्रे विभाषा इति पदे बाहुलकम् इति अर्थस्वीकारे “ब्रह्मणः प्रजाः प्रजायन्ते” वाक्ये ‘ब्रह्मणः’ इति पदे पञ्चमीविभक्तेः उत्पत्तिः सम्भवा, किन्तु ‘ब्रह्मणः’ इति पदस्य अपादानतया शाब्दबोधोपपत्तिविषये “जनिकर्त्तुः प्रकृतिः” इति शास्त्रोपदेशः आवश्यकः।

### ३.९. भुवः प्रभवः (१-४-३१)।

शास्त्रोपदेशः आवश्यकः। भूकर्तुः प्रभवः प्राग्वत्। हिमवतो गङ्गा प्रभवति। प्रभवनं प्रथमप्रकाशः प्रग्रहणात् तदधिकरणमपादानमित्यर्थः। "प्रभवो जलमूले स्याज्जन्महेतोः पराक्रमे। ज्ञानस्य चादिस्थाने" इति विश्वकोषः।

अत्र नवीनानामेवमाशयः पूर्वसूत्रद्वारा अभिन्ननिमित्तोपादानस्य अपादानसंज्ञा भवति। परन्तु प्रकृतसूत्रेण समवायिकारणस्य अपादानसंज्ञा भवति। हिमवान् गङ्गां प्रति समवायिकारणम्। हिमवतः अभावे गङ्गायाः अनुत्पत्तिः।

द्वितीयं तु "जनिकर्त्तुः प्रकृतिः" इति सूत्रेण प्रकृतिशब्दस्य व्यवहारः प्रकाशनमित्यर्थः अङ्गीकृतः। यद्यपि गङ्गायाः उत्पत्तिः ब्रह्मणः कमण्डलुतः, विष्णुभगवतः चरणात्, भगीरथस्य तपसः इत्यादि पुराणादिषु।

परन्तु हिमवान् इत्यस्य मूलं तु जलं, ततः एव उत्पत्तिः। तेन अपदानसंज्ञाविधानपूर्वकं 'हिमवतो गङ्गा प्रभवति' इति प्रयोगोपपत्तिः।

'काश्मीरेभ्यो वितरता प्रभवति' इति। तसु उपक्षये भावे क्तः। विगतस्ता वितस्ता। अशोष्येत्यर्थः। अत्रोपलभ्यतेः कर्मव्यापारे प्रभवतिः वर्तते। प्रकाशते इत्यर्थः।

"भीत्रार्थानाम्..."[32] इत्यारभ्येयं सप्तसूत्री भाष्ये प्रत्याख्याता। तथाहि चोरेभ्ये बिभेति। भयान्निवर्तते इत्यर्थः। त्रायते, रक्षणेन चोरेभ्यो निवर्त्तयतीत्यर्थः। पराजयते, ग्लान्या निवर्तते इत्यर्थः। वारयति, प्रवृत्तिम्प्रतिबध्नन्निवर्तयति। निलीयते, निलयनेन निवर्तते इत्यर्थः। अधीते उपाध्यायान्निःसरन्तं शब्दं गृह्णातीत्यर्थः। 'ब्रह्मणः प्रपञ्चो जायते' इत्यत्रापि

[32] पा. सू., ०१.४.२५.

ततोऽपक्रामति, यथा वृक्षात्फलमिति लोकप्रसिध्याश्रयेणापायो बोध्यः। प्रभवतीत्यत्रापि भवनपूर्वकं निःसरणमर्थः।

अत्रेदं वक्तव्यं यत् निवृत्तिनिःसरणादिधात्वन्तरार्थविशिष्टे स्वार्थे वृत्तिमाश्रित्य यथाकथञ्चिदुक्तप्रयोगाणां समर्थनेऽपि मुख्यार्थपुरस्कारेण षष्ठीप्रयोगो दुर्वारः। 'नटस्य शृणोति' इतिवत्। न ह्युपाध्यायनटयोः क्रियानुकूलव्यापारांशे विशेषो वक्तुं शक्यः। अनभिधानब्रह्मास्त्रमाश्रित्य प्रत्याख्यानन्तु नातीव मनोरमम्। एवञ्च "जुगुप्साविराम.." इत्यादिवार्त्तिकमप्यवश्यारम्भणीयम्। तथा च सूत्रवार्त्तिकमतमेवेह प्रबलमिति यावद्बाधं साधु। तथा ध्रुवं भयहेतुरसोढ इत्यादिसंज्ञिनिर्देशेऽपि सार्थकः परत्वात्तत्संज्ञाप्राप्तावपि शेषत्वविवक्षायां न माषाणामश्नीयादित्यादाविव षष्ठ्या इष्टतया तत्रापादानसंज्ञाया वारणीयत्वादित्यवधेयम्।

### 3.10. कर्मणा यमभिप्रैति स सम्प्रदानम् (१-४-३२)।

शास्त्रोपदेशः आवश्यकः। कर्मणा करणभूतेन कर्ता यमभिप्रैति सम्बध्नाति ईप्सति वा तत्कारकं सम्प्रदानं स्यात्। न च युगपत्कर्मत्वं करणत्वञ्च कथमिति वाच्यम्, क्रिया-भेदेनाविरोधात्। दानक्रियायां हि कर्म अभिप्रापणक्रियायां करणम्। दीयमानया गवा हि शिष्य उपाध्यायमाभिप्रैति। उपाध्यायाय गां ददाति। अत्राभिप्रैतीति पदत्रयम्। न तु समासः। "उदात्तवता गतिमता च तिङा गतेः समासो वक्तव्यः" इति वार्त्तिकस्य छन्दोविषयत्वादिति हरदत्तः।

अत्र वृत्तिकाराणां मतमेवम् अन्वर्थश्च सम्यक् प्रदीयतेऽस्मै तत्सम्प्रदानमिति। दानोद्देश्यमिति यावत्। यत्र पुनः न ग्रहणाय दीयते तत्रैव दानक्रियाकर्मणा सम्बद्धुमिष्टस्य

सम्प्रदानत्वमिति वृत्तिकारमते सम्प्रदानस्य स्वरूपम्। यत्र पुनर्ग्रहणाय दानं तत्र तु न सम्प्रदानत्वम्, यथा- 'रजकस्य वस्त्रं ददाति' इति। इह हि ददातिर्गौणः न तु वास्तवं दानमस्तीत्याहुः इति *शब्दकौस्तुभे*।

### 3.11. रुच्यार्थानां प्रीयमाणः (१-४-३३)।

रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणोऽर्थः सम्प्रदानसंज्ञो भवति। विषयतासंबन्धावच्छिन्नप्रीत्यनुकूलः प्रीतिसमानाधिकरणो यो व्यापारः स रुचेरर्थः।

अत्राह हरिः–

**हेतुत्वे कर्मसंज्ञायां शेषत्वे वापि कारकम्।**

**रुच्यर्थादिषु शास्त्रेण सम्प्रदानाख्यमुच्यते॥** इति।

"लौल्यात्तदानुगुण्यमाचरतीति देवदत्तस्य हेतुसंज्ञायां प्राप्तायां सम्प्रदानसंज्ञा कथ्यते। तथा च हेतुसंज्ञाविरहे णिजभावाद्धेतुसमवायिन्या द्वितीयस्याः क्रियायाः अप्रतीतेर्मोदकः स्वक्रियायां धातुवाच्यायां कर्ता भवति, न तु कर्म। यदा तु रोचते प्रीणयतीत्यर्थः, तदा कर्मसंज्ञायां प्राप्तायां वचनम्। तथा च प्रीयमाण इति विशेषणम्। "प्रीञ् तर्पणे"[33] इत्यस्मात्सकर्मकात्कर्मणि लट्। दैवादिकस्तु ङिदकर्मकः। तर्प्यमाण इत्यर्थः। यत्तु समर्थसूत्रे "रोचयामहे" इति देवदत्तेन प्रयुङ्क्ते, तदस्मिन्नेव पक्षेऽध्यारोपितप्रेषणपक्षमाश्रित्येत्यवधेयम्। यदा तु देवदत्तस्य योऽभिलाषस्तद्विषयो भवतीत्यर्थस्तदा शेषत्वात्षष्ठ्यां प्राप्तायां वचनमिति।"[34]

---

[33] कौ. धा., १८३६.

[34] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. १२२, १२३.

प्रीयमाणः किम् इत्यत्र तु 'देवदत्ताय रोचते मोदकः पथि' इत्यत्र पथोऽपि सम्प्रदानत्वापत्तिः। तत्सत्त्वे तु देवदत्तस्यैव प्रीयमाणत्वं न पथ इति पथिन्शब्दाद् अधिकरणे सप्तमी। "रुच् दीप्तौ" इत्यत्र दीप्तर्थकोऽपि रुच्धातुरस्ति, किन्तु अत्र दीप्तिर्न विवक्षिता। तेन 'आदित्यो रोचते दिक्षुः' इत्यत्र दीप्त्यर्थे न सम्प्रदानसंज्ञा। महाभाष्यकारेण सूत्रमिदं प्रत्याख्यातम्।

### 3.12. श्लाघह्नुङ्स्थाशपां ज्ञीप्समानः (१-४-३४)।

'श्लाघृ कथने' 'ह्नुङ् अपनयने' 'ष्ठा गतिनिवृत्तौ' 'शप उपालम्भे' एतेषां धातूनां प्रयोगे बोधयितुमिष्टः सम्प्रदानं भवति। देवदत्ताय श्लाघते, स्तौति इत्यर्थः।

अन्ये तु आहुः देवदत्तायात्मानं परं वा श्लाघ्यं कथयतीत्यर्थ इति। तथा च भट्टिकाव्यम्– श्लाघमानः परस्त्रीभ्यस्तत्रागाद्राक्षसाधिपः। इति।

"आत्मानं श्लाघ्यं परस्त्रीभ्यः कथयन्नित्यर्थः। तत्राद्ये पक्षे कर्मत्वे प्राप्ते द्वितीये तु कारकशेषत्वात् षष्ठ्यां प्राप्तायां वचनम्। ह्नौतिप्रभृतयोऽत्र स्वार्थोपसर्जनज्ञापनवचनत्वात्सकर्मकाः। तथा च ज्ञीप्स्यमान इति संज्ञिविशेषणमुपात्तमिति हेलराजः। 'देवदत्ताय ह्नुते' देवदत्तं ह्नुवानस्तमेव ह्नुति तमेव बोधयति। अथवा ह्नोतव्यं देवदत्तं बोधयतीत्यर्थः। 'देवदत्ताय शपते' शपथेन किञ्चित्प्रकाशयतीत्यर्थः। ज्ञीप्स्यमानग्रहणाद् देवदत्तः श्लाघते गार्गिकया श्लाघते पथि इत्यादौ कर्त्रादिविषये संज्ञा न भवति। 'ज्ञीप्स्यमाने विवदन्ते' इति 'शप उपालम्भे' इति वार्त्तिकोदाहरणव्याख्यायां कैयटः। तत्र यस्मै आख्यायते स ज्ञीप्स्यमान इति मते तु यस्य आख्यायमानः प्रत्युदाहरणम्। तस्माद् द्वितीया, 'देवदत्तं श्लाघते' इति। आख्यायमानो ज्ञीप्स्यमान इति मते तु यस्मै आख्यायते स प्रत्युदाहरणम्।

तस्माच्च षष्ठी, देवदत्ताय श्लाघते विष्णुमित्रो यज्ञदत्तस्येति। 'ज्ञप मिच्च'[35] इति चुरादिकात्मनि कर्मणि शानचि ज्ञीप्स्यमान इति रूपं बोध्यम्। न तु ज्ञीधातोः। तस्य बोधने मित्त्वाभावात्। 'तज्ज्ञापयति' इत्यादिभाष्यप्रयोगात्। अत एव 'मारणतोषण'[36] इत्यत्र निशानेष्विति पाठो न तु निशामनेष्विति। निशानं तनूकरणम्। श्यर्तर्ल्युट्। 'संज्ञपितः पशु' इत्युदाहरणम्। 'अप्-ज्ञप्यृधामीत्'[37] इत्यत्र तूभयोरपि ज्ञप्योर्ग्रहणमिति सिद्धान्तः। चौरादिकश्च मारणतोषणनिशामनेषु वर्त्तते इति माधवः।"[38] इति।

### 3.13. धारेरुत्तमर्णः (१-४-३५)।

धृङ् अवस्थानार्थकस्तस्माण्णिजि, अवस्थानानुकूलो व्यापारः। स एव धारयते, तस्मिन् अर्थे सम्प्रदानसंज्ञं भवति। देवदत्ताय शतं धारयति चैत्रः इत्यत्र देवदत्तः उत्तमर्णः, द्रव्यं चैत्रेण गृहीतमपि देवदत्तसम्बन्धित्वेनैव तिष्ठतेः चैत्रकर्तृको देवदत्तसम्प्रदानकः शतकर्मकावस्थित्यनुकूलो व्यापार इति शाब्दबोधः। अर्तेः क्तः ऋणम्। 'ऋणमाधमर्ण्ये' इत्यत्र व्यवहारविशेषोपलक्षणार्थमाधमर्ण्यग्रहणमिति व्याख्यानाद् उत्तमर्णेऽपि निष्ठानत्वं भवति। अस्मादेव निपातनात् अत्र बहुव्रीहौ निष्ठान्तस्य परनिपातः। देवदत्ताय शतं धारयति इत्यत्र ध्रियमाणं स्वरूपेणावतिष्ठमानम्। उत्तमर्णः किम्, उत्तमर्णः धनस्वामी, 'देवदत्ताय शतं

---

[35] कौ. धा., १६२४.

[36] ग. सू.

[37] पा. सू., १-४-३५.

[38] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. १२३, १२४.

धारयति ग्रामे'। उत्तमर्णग्रहणाभावे हेतुसंज्ञाया इवाधिकरणसंज्ञाया अप्यपवादः स्यात्तद्वारणाय तद्-ग्रहणम्। सूत्रमिदं महाभाष्यकारेण प्रत्याख्यातम्।

### 3.14. स्पृहेरीप्सितः (१-४-३६)।

स्पृहयतेः प्रयोगे अभिप्रेतः सम्प्रदानसज्ञः स्यात्। पुष्पेभ्यः स्पृहयति इति उदाहरणम्, पुष्पसंप्रदानिका इच्छेति बोधः। यदा तु विषयत्वावच्छिन्नेच्छानुकूलव्यापारस्य स्पृहधातुवाच्यत्वविवक्षा तदा फलताच्छेदकविषयतासम्बन्धेन प्रकृतधात्वर्थप्रधान-व्यापारजन्यफलाश्रयत्वस्य पुष्पेषु सत्त्वात् पुष्पाणां कर्मसंज्ञा भवति तदा 'पुष्पाणि स्पृहयति' इति, वनस्येप्सितत्वाभावेन न सम्प्रदानसंज्ञा, किन्तु अधिकरणत्वेन सप्तमी तदाह- 'पुष्पेभ्यो वने स्पृहयति' इति। स्पृहधातुः चुरादिः अनदन्तश्च, इच्छायाः तदनुकूलव्यापारस्य च वाचकः। इप्सिततत्वं धात्वर्थव्यापारजन्यफलाश्रयत्वं, किन्तु अत्र प्रकृतधातुवाच्यमेव ग्राह्यमिति नियमो न। यदा व्यापारजन्यस्य स्वीकारः तदा 'कर्तुरीप्सितमम्' इति कर्मत्वाप्राप्त्या 'शेषे षष्ठी' प्राप्ता, तदा बाधनार्थं सूत्रारम्भः। यदा तु इप्सिततमत्वं वा शेषत्वेन विवक्षितं तदा षष्ठ्येवेति हरदत्तादयः। तथा च हेलराजः अपि वाक्यपदीये 'हेतुत्वे कर्मसंज्ञायाम्' इत्यस्मिन् श्लोके तथैव कथयति।

परन्तु कर्मसंज्ञया सम्प्रदानसंज्ञायाः बाधेन दानीयवत् 'परस्परेण स्पृहनीयशोभम्' इत्यत्र स्पृहनीयगुणैर्महात्मभिः इत्यत्र च न सम्प्रदाने अनीयर्, किन्तु कर्मण्यनीयर्-प्रत्ययः। शेषत्वविवक्षायान्तु षष्ठी एव।

"यदि दानीयो विप्रः इतिवद् सम्प्रदान एव तु व्याख्येयः।

तदा–

**कुर्माय इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च।** इति षष्ठ्याः अपि अप्रसङ्गता। विभक्तिविपरिणामेन "कान्ताय" इति व्याख्येयम्। हरदत्तमते तु यथा श्रुतौ एव उक्तप्रयोगः निर्बाधः इति।"[39]

"कुर्माय इव कान्तस्य त्रस्यन्ति स्पृहयन्ति च।" इति

वस्तुतस्तु तन्मतमयुक्तमेव। तथाहि– स्पृहयति योगे कर्मषष्ठ्याः शेषषष्ठ्याश्च बाधिका सम्प्रदानसंज्ञा। एवञ्च 'स्पृहणीयशोभम्' इत्यत्र सम्प्रदाने अनीयर्, 'कुर्माय इव' इत्यत्र विभक्तिविपरिणामेन 'कान्ताय स्पृहयन्ति' इति व्याख्यायेम्। कान्तस्य त्रस्यन्ति, कान्ताय स्पृहयन्ति इति योजना इति न कश्चन दोषः। वस्तुतः उभयबाधकत्वमयुक्तम्। यदा इच्छायाः एव धातुवाच्यत्वविवक्षा धात्ववाच्यस्यैव फलस्य च विवक्षा तदा कर्मसंज्ञाया अप्राप्ता शेषषष्ठी बाधकत्वेनास्य चारितार्थ्यात् न निरावकाशत्वं सम्प्रदानसंज्ञायाः। किञ्च 'मातुः स्मरति' इत्यत्र मातृपदार्थस्य कर्मत्वेऽपि तस्य संबन्धित्वेन विवक्षायां षष्ठी भवति, तथाऽस्य सूत्रस्य शेषषष्ठ्यापवादत्वेऽपि संप्रदानत्वाविवक्षायां शेषत्वविवक्षायां तादृशप्रयोगस्य निर्वहे सति विभक्तिविपरिणामकल्पनम् अन्याय्यमिति दिक्।"[40]

### 3.15. क्रुधद्रुहेर्ष्यासूयार्थानां यम्प्रति कोपः (१-४-३७)।

शास्त्रोपदेशः आवश्यकः। क्रोधाद्यर्थानां धातूनां प्रयोगे यं प्रति कोपस्तत्कारकं सम्प्रदानं स्यात्। देवदत्ताय क्रुध्यति द्रुह्यति असूयति वा। वाक्-चक्षुरादिविकारानुमेयः प्ररूढः

---

[39] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. १२४.

[40] वै. सि. कौ., द्वि. भा., सम्पा. पण्डितसभापतिमिश्रः, पृ. ९१७.

कोपोऽत्र क्रोधः मनसो वृत्तिविशेषः। अपकारो द्रोहः, दोषत्वारोपानुकूलव्यापाररूप इति। असहनमीर्ष्या, परकीयपाण्डित्यादिगुणानामसहनं तच्च गुणादिज्ञानजन्यद्वेषात्मकम्। गुणेषु दोषारोपणमसूया। ननु चित्तदोषार्थानामित्येवास्तु किं क्रोधादीनां विशिष्योपादानेनेति चेत्, न द्विषादावतिप्रसङ्गात्। योऽस्मान्द्वेष्टि इत्यादौ ह्यनभिनन्दनं द्विषेरर्थः। अत एवाचेतनेष्वपि प्रयुज्यते "औषधं द्वेष्टि" इति। यं प्रति कोपः इत्यादि तु 'भार्याम् ईर्ष्यति' इति। मैनामन्योऽद्राक्षीदिति। अत्र भार्यां प्रति कोपः इति न, किन्तु परैः दृश्यमानां तां न सहते इत्येव। एवञ्चात्र न कोपजन्येर्ष्या, किन्तु अन्यपुरुषदर्शनजन्येति भावः।

हरये क्रुध्यति इत्यत्र क्रोधक्रियया हरिः अभिप्रेरितः, अतः क्रियया यमभिप्रैति सोऽपि सम्प्रदानम् इत्यनेन सम्प्रदानं सम्भवति, अतः प्रकृतशास्त्रोपदेशः व्यर्थः।

यथा 'पत्ये शेते' इति वाक्ये शयनक्रियया पतिपत्निसम्बन्धः परिलक्ष्यते, अर्थात् पत्नी एतदर्थं शयनं करोति येन पतिः अपि शयनं कुर्यात्। परन्तु हरये क्रुध्यति इत्यत्र क्रोधकर्तुः एवमभिप्रायः यत् हरिः मह्यं कृपादृष्टिं ददातु, न तु मयि क्रोधः भवति इति। अतः सम्प्रदानस्य उपपत्तिः असम्भवा, शास्त्रोपदेशः यथार्थः।

कुप् धातोः अर्थः क्रोधः, तेन यं प्रति कोपः तत्र सम्प्रदानं भवेत्।

अपि तु तथा न, कुप् धातोः अर्थः कोपः न तु क्रोधः। क्रोधः कोपजन्यः भवति, कोपः क्रोधस्य जनकः। बालकं प्रति पितुः मनसि कोपः आयाति, न तु क्रोधः। अर्थात् कुपधातुः न हि क्रोधार्थकः। भाष्यकारानुसारेण "न हि प्रकुपितः क्रुध्यति", अर्थाद् विना कोपे न हि क्रोधस्य उत्पत्तिः। प्ररूढकोपः एव क्रोधः। अतः "कुप्यति कस्मैचित्" इति असाधुप्रयोगः इति विदुषां मतम्।

**3.16. क्रुधद्रुहोरुपसृष्टयोः कर्म (१-४-३८)।**

सोपसर्गयोरनयोरनयोर्यं प्रति कोपस्तत्कारकं कर्मसंज्ञं द्वितीयविभक्तिश्च। क्रूरमभिक्रुध्यति। अभिद्रुह्यति। उपसृष्टः इति शब्दस्य वैयाकरणसम्प्रदाये सोपसर्गः इत्यर्थः। पूर्वसूत्रापवादः अर्थात् प्रकृतसूत्रं "क्रुधद्रुह्" इत्यत्र सम्प्रदानसंज्ञायाः अपवादहेतुत्वेन बाधको भवति। यतो हि क्रुधद्रुह्... इति सूत्रस्य उद्देश्यं भवति व्यापकः, सोपसृष्टयोः...इति सूत्रस्य उद्देश्यं व्याप्यः।

**3.17. राधीक्ष्योर्यस्य विप्रश्नः (१-४-३९)।**

शास्त्रोपदेशः आवश्यकः। एतयोः कारकं सम्प्रदानसंज्ञं स्यात्। यदीयो विविधः प्रश्नः क्रियते। 'कृष्णाय राध्यति ईक्षते वा' इति। पृष्टो गर्गः शुभाशुभं पर्यालोचयतीत्यर्थः। शुभाशुभपर्यालोचनमिह धात्वर्थः। शुभाशुभरूपयोः कर्मणोर्धात्वर्थेनोपसङ्ग्रहादकर्मकावेतौ। षष्ठ्यां प्राप्तायां वचनम्। अत एव राध्यतीति श्यनविकरणम्, अकर्मकादेव तद्विधानात्। तथा च दिवाद्यन्तर्गणसूत्रं राधोऽकर्मकादेव। यथा वृद्धाविति। अत एव कर्मवत् कर्मणा इति सूत्रे राध्यत्योदनः स्वयमेव इति भाष्यं सङ्गच्छते। तत्र हि सिध्यतीत्यर्थः बोध्यः।

एतेन –

**न दूये सात्वतीसूनुर्यन्मह्यमपराध्यति।**

**क्रियासमभिहारेण विराध्यन्ते क्षमेत कः ॥** इति।

अत्र माघप्रयोगौ व्याख्यातौ। एतेनैतयोः कर्मकारकं सम्प्रदानं स्यादिति व्याचक्षाणाः परास्ताः। यस्यैत्यनर्थकं यम्प्रीत्यनुवृत्त्यैवेष्टसिद्धेः।

पूर्वक्तरीत्या राध-धातोरकर्मत्वस्वीकारादेव धात्वर्थैकदेशे कृष्णपदार्थान्वयः। प्रश्नविषयशुभाशुभाश्रयत्वेन कर्मत्वं कृष्णस्येति सकर्मकोऽयं धातुरिति तु न शङ्क्यम्। तस्य फलस्य प्रकृतधात्वर्थप्रधानीभूतव्यापारजन्यत्वाभावात्।

### 3.18. प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता (१-४-४०)।

प्रतिपूर्वः आङ्पूर्वश्च शृणोतिरभ्युपगमे वर्त्तते। तस्य पूर्वो व्यापारः प्रवर्त्तनक्रिया, तस्याः कर्त्ता सम्प्रदानं स्यात्। विप्राय गां प्रतिशृणोति आशृणोति वा। विप्रेण मह्यङ्गां देहीति प्रवर्त्तितः प्रतिजानीते इत्यर्थः। हेतुसंज्ञायां प्राप्तायां "देवदत्तेन प्रतिशृणोति" इति प्रयोगनिवृत्तये वचनम्। विवक्षान्तरे तु "देवदत्तो गां प्रतिश्रावयति" इति भवत्येवेति हरदत्तः।

अत्रेदं चिन्त्यम् उक्तरीत्या- 'देवदत्तो रोचयति मोदकम्' इत्यपि प्रयोगो दुर्वारः। न चेष्टापत्तिः। तत्रत्यस्वग्रन्थेन हेलाराजग्रन्थेन च विरोधात्। तत्र हेतुत्वबाधान्न णिजिति यदि, तर्हि प्रकृतेऽपि तुल्यम्। तस्मादिह वैषम्यं दुर्वचमिति।

अत्र द्विवचननिर्देशमूलकव्याख्यानात् प्रत्येकं निमित्तत्वमित्याशयेनोदाहरति गां प्रतिशृणोतीति। अनयोः प्रवर्त्तनापूर्वकाभ्युपगमोऽर्थः, अर्थात् तत्तदुपसर्गपूर्वकयोः। अत्र विप्रपदाच्चतुर्थ्या आश्रयत्वमर्थः। तस्य प्रवर्तनायामन्वयः। वस्ततस्तु सम्प्रदानशक्तिमत्त्वेनैवान्वय इति।

### 3.19. अनुप्रतिगृणश्च (१-४-४१)।

प्रतिपूर्वस्य आङ्पूर्वस्य अनुपूर्वस्य च गृणातेः कारकं पूर्वस्य कर्तृभूतं सम्प्रदानं स्यात्। अनुप्रतिभ्यां गृणाः अनुप्रतिगृणाः तस्येति विग्रहः। अनुप्रतिपूर्वा गृणातिः शंसने

प्रोत्साहने वर्त्तते। तत्र पूर्वो व्यापारः शंसनम्। होत्रे अनुगृणोति प्रतिगृणोति वा। होता प्रथमं शंसति, तमध्वर्युः "ओथामोदेव" इत्यादिभिः शब्दैः प्रोत्साहयतीत्यर्थः।

अनुप्रतीति भिन्नं पदम्, अनुप्रतिभ्यामिति समासः। यद्वा प्रकृतिवदित्यतिदेशेन लुक्, लुप्तपञ्चम्यन्तमिति। प्रत्येकमिति शेषः। अत एव प्रत्येकं निमित्तत्वम्। गृण इति श्नान्तानुकरणात् षष्ठी। शंसितुः शंसनविषयहर्षानुकूलव्यापारलक्षणं प्रोत्साहनमनयोरर्थः। पूर्वव्यापारस्येति शंसनस्येत्यर्थः। प्रोत्साहयतीति इति शेषः।

### 3.20. साधकतमं करणम् (१-४-४२)।

क्रियायां प्रकृष्टोपकारकं कारकं करणसंज्ञं स्यात्। यद्व्यापारानन्तरं क्रियानिष्पत्तिः तत्प्रकृष्टम्।

उक्तञ्च–

**क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम।**

**विवक्ष्यते यदा तत्र करणं तत्तदा स्मृतम्॥** इति।

काष्ठैः पचति। विवक्ष्यते इत्यनेन स्थाल्यादीनामपि वैवक्षिकं करणत्वमस्तीत्युक्तम्।

आह च–

**वस्तुतस्तदनिर्द्देश्यं न हि वस्तुव्यवस्थितम्।**

**स्थाल्या पच्यत इत्येषां विवक्षा दृश्यते यतः॥** इति।

ननु कारकाधिकारादेव सिद्धे साधकत्वे पुनः श्रुतिः प्रकर्षार्थाऽस्तु किं तमपा, सत्यम्, अस्मिन्प्रकरणे सामर्थ्यगम्यप्रकर्षो नाश्रीयते इति ज्ञापयितुं तमप्। तेन "गङ्गायां घोषः" इति सिद्धम्। यदा तु तीरधर्मः आधारत्वं प्रवाहे उपचर्यते तदेदं प्रयोजनम्। यदा तु

गङ्गाशब्द एव तीरे वर्त्तते तदा न प्रयोजनम्। तत्राद्ये विभक्तिर्लाक्षणिकी। सुब्विभक्तौ न लक्षणा इति तु "येन विधिः"[41] इति सूत्रे एव निराकृतम्। द्वितीये तु प्रकृतिर्लाक्षणिकी। ननु उभयं मुख्यमस्तु। परम्परासम्बन्धस्तु संसर्गः। मैवम्, कारकविभक्त्यर्थानां प्रकृत्यर्थे साक्षात्सम्बन्धेन विशेष्यताया व्युत्पन्नत्वात्। अपादानप्रकरणोक्तानि च बहून्युदाहरणानि तमब्ग्रहणस्य प्रयोजनानि बोध्यानि।

प्रकृष्टत्वं च "अव्यवधानेन फलजनको यो व्यापारस्तद्वत्त्वम्। एवञ्च यद् व्यापाराव्यवधानेन फलनिष्पत्तिः तत्करणम्" इति सूत्रार्थो फलति। तथा चोक्तं नागेशभट्टेन *महाभाष्यस्य उद्द्योते*- "साधकतमं करणम्" इति सूत्रव्याख्यानावसरे "अत्र कारकाधिकारात् क्रियानिरूपितातिशयकारकत्ववत्करणम्" इत्यर्थः। अतिशयश्च यद्व्यापारानन्तरमव्यवधानेन फलोत्पत्तिस्तत्त्वम् इति। *लघुशब्देन्दुशेखरे*ऽपि एवमेवोक्तम् "यद्व्यापाराव्यवधानेन क्रियानिष्पत्तिस्तत्प्रकृष्टम्"[42]। *प्रौढमनोरमा*याम् अपि "यद्व्यापारादनन्तरं क्रियानिष्पत्तिस्तत्प्रकृष्टम्" इति। एवं सूत्रप्रामाण्येनापि स्वनिष्ठव्यापाराव्यवधानेन फलनिष्पादकत्वं करणत्वम् इति सुसम्पन्नम्।

गङ्गायां घोषः, गङ्गायां गावः इत्यादौ गौणस्यापि अधिकरणसंज्ञा भवति तथैव व्यवधानेन फलोत्पादकस्य गौणस्यापि करणत्वापत्तिः इत्यत्र नाशंकनीयं यतोहि करणसंज्ञाविधायके साधकतमं करणम् इति सूत्रे तमब्ग्रहणेन व्यवधानेन फलोत्पादके करणकत्वोपचारणे तृतीयान्तप्रयोगस्यासाधुत्वं प्रतिपाद्यते, एतत्सूत्रातिरिक्तस्थले च गौणस्यापि अधिकरणत्वादिकं भवति इति तमपा बोध्यते।

---

[41] पा. सू. १-१-७२.

[42] ल. श. शे., का. प्र. (पा. सू. १-४-४२), सम्पा. तेजपालः शर्मा, पृ. १६५.

अयं भावः– करणसंज्ञाविधायके "साधकतमं करणम्" सूत्रे तमब्ग्रहणं व्यर्थम्। यतो हि- "साधकतमं करणम्" इत्येतावन्मात्रोक्तौ "क्रियतेऽनेनेति करणम्" इति महासंज्ञया साधकस्यैव करणसंज्ञा भविष्यति, "लघ्वर्थं हि संज्ञाकरणम्" तत्र महासंज्ञाकरणे एतत्प्रयोजनम् अन्वर्थस्यैव संज्ञा यथा स्यात् इति। एवञ्च महासंज्ञाकरणसामर्थ्यात् कारकाधिकाराच्च साधकस्य करणत्वसिद्धौ तत्र साधकपदं व्यर्थं सत् साधकतमार्थं भविष्यति। एवं च तमबर्थस्य स्वयमेव लाभसिद्धौ सूत्रे तमब्ग्रहणं व्यर्थम्। तथा चोक्तं शेखरे- "कारकाधिकारात्करणल्युडन्तकरणेति महासंज्ञया च साधकत्वे लब्धे साधकग्रहणमेव साधकतमार्थं भविष्यतीति"। एवं च प्रकृतसूत्रे "तमप्" ग्रहणं व्यर्थं सद् ज्ञापयति "अस्मिन् कारकप्रकरणे शब्दसामर्थ्यगम्यः प्रकर्षो नाश्रीयते" इति।

तमप्प्रत्ययस्य फलं "गङ्गायां घोषः" इत्यत्र सप्तमीविभक्तिरूपम्। गङ्गा इति भगीरथखातावच्छिन्नजलप्रवाहो गङ्गापदार्थः। घोषः इति घोषन्ति गावोऽत्रेति घोषः। घुषिरविशब्देन "हलश्च" इत्यधिकरणे घञ्प्रत्ययः। आभीरपल्लीविशेषः।

आशयस्तु अयं- "प्रकृते क्रियतेऽनेनेति करणमिति व्युपत्त्या महासंज्ञया यथा साधकार्थलाभस्तथैव आधारोऽधिकरणम् इत्यत्र अधिक्रियतेऽस्मिन्नित्याधिकरणमिति महासंज्ञयाऽऽधारलाभे सिद्धे तत्राधारपदमाधारतमार्थं भविष्यतीति सर्वावयवव्याप्त्याधारस्याधिकरणसंज्ञेति तिलेषु तैलम् सर्वस्मिन्नात्माऽस्ति इत्यादावेवाधिकरणसंज्ञा न तु गौणाधारे इति गङ्गायां घोषः इत्यत्र गङ्गाशब्दस्य अधिकरणत्वाभावेन सप्तमी नैव प्राप्नोति। कृते तु तमप्प्रत्यये न दोषः।"[43]

---

[43] वै. सि. कौ., द्वि. भा., सम्पा. पण्डितसभापतिमिश्रः, पृ. १०५.

तथैव साधकतमं करणम् इति स्थाने “करणम्” कारकम् इत्येव सूत्रमस्तु। यतो हि कारके इत्यधिकाराद् अथवा “क्रियते अनेन तत् करणम्” इति अन्वर्थमहासंज्ञाविधानसामर्थ्यात् कार्यसाधनं स्यात्। अत्र साधकपदं व्यर्थं सत् ज्ञापयति, प्रकृष्टं साधकं करणं भवति इति। तर्हि तमब्ग्रहणं किमर्थं यतो हि साधकेनैव खलु प्रकृष्टपदस्य लाभो भवति। अतः “तमप्” व्यर्थं सत् ज्ञापयति “अस्मिन् कारकाधिकारे शब्दसामर्थ्यगम्यः अधिकारार्थो नाश्रीयते” अर्थात् “शब्दाधिक्याद् अर्थाधिक्यं न भवति” इति। यदि शब्दाधिक्यात् अर्थाधिक्यस्य ग्रहणं स्यात् तर्हि “गङ्गायां घोषः” इति प्रयोगस्य दोषो भवेत्।

अतः शब्दाधिक्यस्य ग्रहणे “गङ्गायां घोषः” इति प्रयोगः सिद्ध्यति। अन्यथा “आधारोऽधिकरणम्”[44] इति सूत्रे “अधिकरणम्” इति पदेनैव आधारार्थस्य लाभः स्यात्, आधारपदं खलु व्यर्थम्।

---

[44]आधारः आश्रयः। अधिकरणसंज्ञाविधायकं संज्ञासूत्रम्। पदम्- आधारः, अधिकरणम्। अनुवृत्तिः- कारके। कर्तृकर्मद्वारा तन्निष्ठक्रियाया आधारः कारकमधिकरणसंज्ञं स्यात्। अधिकरणं संज्ञा, आधारः संज्ञी।

कर्तृकर्मान्यतरव्यधानेन क्रियाश्रयः कारकम् अधिकरणसंज्ञम् इत्यर्थः।

तदाह हरिः-

**कर्तृकर्मव्यवहितामसाक्षाद् धारयत् क्रियाम्।**

**उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्॥** इति।

आ-पूर्वक कृ-धातोः अधिकरणे घञ् “अध्यायन्याय” इति सूत्रे “अवहाराधार” इत्यपुसंख्यानात्। अधीयतेऽस्मिन्नित्याधारः। आधारः आश्रयः। सप्तम्या आश्रयोऽर्थः, शक्यतावच्छेदकमाश्रयत्वम्।

यतो हि अधिक्रियते अस्मिन् इति विग्रहे "यत्र किमपि स्थापयितुं योग्यं भवति सः आधारः" इति महासंज्ञया एव आधारपदस्य लाभः स्यात्। अर्थाद् अधिकरणम् इत्येव सूत्रं भवतु, किमर्थं आधारोऽधिकरणम् इति सूत्रे आधारपदस्य व्यवहारः।

एतेन व्यर्थं सत् ज्ञापयति, आधारपदस्य अर्थः अस्ति "सर्वावयवव्याप्यत्वम्" इति, तेनैव अधिकरणसंज्ञा भवति। ततः तिलेषु तैलम्, दधिषु सर्पिः इत्यादिप्रयोगाः सिद्ध्यन्ति। परन्तु गङ्गायां घोषः इति उदाहरणे घोषस्य स्थितिः गङ्गायाः एकस्मिन् प्रान्ते विद्यते इति कारणात् न तु सर्वावयवव्यापकत्वम् अपि तु एकदेशव्यापकत्वम्।

परन्तु अत्र "सर्वावयवव्याप्यत्वम्" इति आधारस्य लक्षणे यदि "एकदेशव्याप्यत्वम्" इति इत्यपि गणना भवति तर्हि गङ्गायां घोषः इत्यस्य अधिकरणसंज्ञा भवति। अपि च यदि "आधारर्थस्य" ग्रहणं न स्यात् तर्हि गौणमुख्यमिति उभयविधस्य आधारस्य अधिकरणसंज्ञया लाभो भवति। तेन मुख्याधारैकदेशव्याप्यत्वं भवति "गङ्गायां गावः" अपि च गौणाधारैकदेशव्याप्यत्वं भवति "गङ्गायां घोषः" इति।

गङ्गायां घोषः इति वाक्यस्य द्विधा अभिप्रायो भवति, यथा प्रथमतः- मम गृहं गङ्गातीरे वर्तते इति अभिप्राये मम गृहं गङ्गाप्रवाहे विद्यते, अर्थात् अहं गङ्गायां निवसामि। द्वितीयतः- गङ्गायाः तीरे वर्तते इति कारणात् तीरवृत्तिः धर्मः गङ्गायाम् आरोप्यते। अपि च शैत्यपावनात्वादिधर्मदयः अपि तीरे आरोपिता भवन्ति।

अतः गौणाधारस्यापि अधिकरणसप्तम्याः शक्यार्थः एव सिद्धो भवति। इति आधारोऽधिकरणम्।

एवं यथा आधारोऽधिकरणम् इति सूत्रे आधारपदस्य व्यवहारे गौणाधारस्यापि ग्रहणं तथैव तमब्ग्रहणे प्रकृष्टोपकारकार्थपरं बोधयति। प्रकृते साधकार्थमात्रबोधकं साधकपदं न प्रकृष्टोपकारकार्थपरम्।

अन्यषां समाधानं तु- यदि कश्चन अन्वर्थसंज्ञां न स्वीकरोति, अपि च तस्य कृते तमब्ग्रहणमावश्यकं भवति। अन्यथा गौणमुख्ययोः मुख्ये कार्यसम्प्रत्ययः इति न्यायेन मुख्याधारस्यैव अधिकरणसंज्ञा भवति न तु गौणाधारस्य तेन गङ्गायां घोषः इत्यत्र अधिकरणसंज्ञा न सिद्ध्यति खलु। अपि च आध्रियते यस्मिन् इति व्युत्पत्त्यनुसारेणापि आधारशब्दस्य सर्वावयव्याप्ताधारः इति अर्थे शक्तिस्वीकारे गौणाधारस्य शक्तिस्वीकाराय स्वरितत्वप्रतिज्ञया समाधानं भवति। अतः साधकतमं करणम् इति सूत्रेऽपि मुख्यगौणेषु अन्यतमं करणसंज्ञं भवति इति।

### 3.21. दिवः कर्म च (१-४-४३)।

दिवः साधकतमं कर्मसंज्ञं स्यात्, चकारात्करणसंज्ञम्। करणशब्दानुवृत्त्या वक्षमाणस्यान्यतरस्यांग्रहणस्याकर्षणेन वा संज्ञयोः पर्याये लब्धे समावेशार्थश्चकारः। तेन "मनसा दीव्यतीति मनसा देवः" इत्यत्र कर्मण्यण्, करणे तृतीया चेत्युभयं सिध्यति। "मनसः संज्ञायाम्"[45] इत्यलुक्। किञ्च अक्षैर्दीव्यते यज्ञदत्तेन इत्यत्र सकर्मकत्वादणि कर्तुर्णौ कर्मत्वं न, "अणावकर्मकात्"[46] इति परस्मैपदं च नेति दिक्।

---

[45] पा. सू., ६-३-४१.

[46] पा. सू., १-३-८८.

स्यादेतत्, यदि समावेशः, तर्हि अक्षान् दीव्यति इत्यत्र परत्वात् तृतीया स्यात्। तथा हि, करणसंज्ञाया अवकाशः देवना अक्षाः। करणे ल्युट्। कर्मसंज्ञाया अवकाशः दीव्यन्ते अक्षाः। “भावकर्मणोः”[47] इति यगात्मनेपदात्। अक्षान् इत्यत्र तूभयसंज्ञाप्रयुक्तकार्यप्रसङ्गे परत्वात्तृतीयैव प्राप्नोति। अत्राहुः, कार्यकालपक्षे “कर्मणि द्वितीया”[48] इत्यत्र परस्योपस्थानं तस्यानवकाशत्वाद् द्वितीयेति। ननु दीव्यन्ते अक्षाः इत्यत्र कर्मण्यभिहितोऽपि करणस्याभिधानेऽपि कर्मणोऽनभिधानाद् द्वितीया स्यात्। मैवम्, एकैव ह्यत्र शक्तिः संज्ञाद्वयोपयोगिनी। तथा चोभयत्राप्यभिधानमेव न त्वनभिहितत्वम्।

नवीनां समाधानं तु शक्तिद्वययोग इति करणत्वकर्मत्वात्मकशक्तिद्वययोग इत्यर्थः। एतेन संज्ञाद्वयसमावेशेन। परस्मैपदाभाव इति “अणावकर्मादिति” सूत्रेण। ननु करणरूपेऽर्थे तृतीयाया विधानेन कथं तृतीयया कर्मत्वबोधनम्, अत आह अत्र विप्रतिषेधशास्त्रबलात्तृतीयैव शक्तिद्वयबोधिका। अत्र कार्यकालपक्षे कर्मत्वसामानाधिकरण्यविशिष्टमपि करणत्वं प्रकृतसूत्रप्रदेशोपस्थितकर्तृकरणयोरिति सूत्रघटककरणपदेन गृह्यते तेन तृतीयैवोभयबोधिकेति भावः। परन्तु यदा अक्षाणां फलाश्रयत्वसमानाधिकरणकर्मत्वविवक्षा तदा “अक्षान् दीव्यति” इत्यादि साधु। “अक्षाणां देविता” इत्यादौ तृतीयातः परत्वात् कृद्योगलक्षणा षष्ठी। “मनसा देवः” इत्यादौ हेतुतृतीयान्तेन पचाद्यजन्तदेवशब्दस्य समासः। न च शक्तिद्वयस्वीकारेऽत्र कर्मणि लकारे करणत्वशक्तेरनुक्तत्वेन तृतीयापत्तिरिति वाच्यम्।

---

[47] पा. सू., १-२-१३.

[48] पा. सू., २-३-२.

"अपादानमुत्तराणि" इत्यस्योदाहरणं गां दोग्धि इत्यादिः, तत्र कर्मणि लकारे पञ्चम्यापत्तिवारणायैकद्रव्यगतानेकशक्तिमध्ये एकस्या अभिहितत्वे परस्यापि तद्वत् प्रकाशेनाक्षतेः। अत्र अभिहितशक्तिवत्प्रकाशेनास्मिन्नर्थे "अपादानमुत्तराणि कारकाणि बाधन्ते" इति भाष्यमेव मानम्। तथा हि संज्ञयोः स्वतो न विरोधः। कृत्कृत्यसंज्ञयोरिव समावेशसम्भवात्, किन्तु फलद्वारक एको वाच्यः सोऽपि चेन्नाश्रीयते यदा परत्वादित्यसङ्गतमेव स्यादिति तया कल्पनमावश्यकमिति। एकैव शक्तिः संज्ञाद्वयोपयोगिनीति तु प्राचामुक्तिं खण्डयति। कर्मादिपादानां कर्मत्वादितत्तच्छक्तिरूपेण बोधकतया तयोर्भेदस्यैवौचित्यादिति मञ्जूषायां विस्तरः।

### 3.22. परिक्रयणे सम्प्रदानमन्यतरस्याम् (१-४-४४)।

प्रतिपूर्वस्य आङ्पूर्वस्य अनुपूर्वस्य च नियतकालं वेतनादिना स्वीकरणं तस्मिन् साधकतमं कारकं संम्प्रदानसंज्ञं वा स्यात्। अर्थात् "नियतकालं वेतनादिना स्वीकरणं परिक्रयणं तस्मिन् साधकतमं कारकं सम्प्रदानसंज्ञं वा स्यात्"[49] इति। शताय शतेन वा परिक्रीतः। परिशब्दः सामीप्यं द्योतयति। क्रयो नामात्यन्तिकं स्वीकरणम्। नियतकालन्तु तस्य समीपमिति भावः।

नवीनानामाशयस्तु शतव्यापारश्च दानरूप एवेति बोध्यम्, करणत्वस्य व्यापारनियतत्वसंरक्षणायाह व्यापारः। अत्र विकल्पेन सम्प्रदानसंज्ञाविधानं भवति। वेतनादिस्वीकारपूर्वकं निर्दिष्टकालपर्यन्तं कार्यं परिक्रयणमिति उच्यते। दशरूप्यकैः दशदिनानि यावत् कार्यं कर्तव्यम्, अत्र प्रकृतसूत्रेण विकल्पेन सम्प्रदानसंज्ञा भवति, तेन

---

[49] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. १२७.

"शतेन शताय वा परिक्रीतः" इति प्रयोगोपपत्तिः। शताय परिक्रीतः इति वाक्यस्य "शतसम्प्रदान-भूतकालिक-परिक्रयणम्" इति एवंरूपेण अर्थबोधो भवति। अतः अत्र करणस्य सम्प्रदानरूपेण भानं भवति। तेन शतकरणस्य दानरूपव्यापारः बोध्यः।

## अध्यायसमीक्षणम्

"अपादानात् करणकारकपर्यन्तं समीक्षणम्" इत्यभिधेये तृतीयाध्यायेऽस्मिन् कारके[50] इति सूत्रे कारकस्य लक्षणविषये आलोचितम्, तत्र *शब्दकौस्तुभे* श्रीमद्भट्टोजिदीक्षितस्य आशयः- क्रियान्वयित्वं कारकत्वम् इति। परन्तु श्रीमन्नागेशभट्टस्य *उद्द्योत*टीकायां आशयः- क्रियाजनकत्वं कारकत्वम् इति अर्थात् जनकताश्रयेण व्यापारस्य फलस्य च ग्रहणम्। कारकशब्दः क्रियापरः, करोति कर्तृकर्मादिव्यपदेशान् इति व्युत्पत्तिविषये तु उभययोः मतं समानम्। अतः उभययोः मतं स्वस्वदृष्ट्या साधु इति मे मतिः। ध्रुवमपायेऽपादानम्[51] इत्यस्मिन् सूत्रे अपादानत्वविषये उद्द्योते प्रोक्तं- अपायो विश्लेषो विभागस्तद्धेतुत्वाद् अपायहेतोः गतिविशेषश्चेह विवक्षितस्तस्मिन् साध्येऽवधिभूतमपादानसंज्ञं स्यात् इति, परन्तु नवीनाः प्रकृतसूत्रस्य अपाये इति शब्दस्य भिन्नम् अर्थं प्रतिपाद्य भिन्नाश्रयं प्रदर्शयन्ति यथा- 'अपाये' इत्यस्य 'गतिविशेषे' इत्यर्थः। 'गतिर्विना त्ववधिना नापाय इति कथ्यते' इति हर्युक्तेः। 'ध्रुवम्' इत्यस्य च 'अवधिभावोपगमाश्रयत्वे सति तदतिरिक्तस्यावधित्वोपयोगिव्यापारस्यानाश्रयम्' इत्यर्थः। तेन 'शब्दभेदादर्थभेदः' इति नियमेन 'परस्परस्मात् मेषौ अपसरतः' इति प्रयोगसिद्धिः। अत्र

[50] पा.सू., १-४-२३.

[51] पा.सू. १-४-२४.

यद्यपि नवीनमतं समीचीनं, परन्तु वास्तविकदृष्ट्या प्राचीनमतं अपि न त्याज्यं, महाभाष्यप्रमाणात्। अत उभयोः मतं युक्तिपूर्णं इति मे मतम्। भीत्रार्थानां भयहेतुः[52] इति सूत्रे तु चौरात् बिभेति इत्यत्र क्रियां प्रति जनकत्वेन विवक्षायां अपादानत्वम्, षष्ठ्यां तु न, नवीनास्तु अरण्ये बिभेति इत्यत्र यदि भयहेतुः अरण्यं न, तर्हि अपादानत्वं नैव सिद्ध्यति। अर्थात् अपादानत्वं नाम क्रियां प्रति जनकत्वाबोधेन एव संज्ञा प्राप्नोति इति निष्कर्षः समायाति। प्राचीनाचार्याः यथा श्रीमद्भट्टोजिदीक्षितप्रभृतयः क्रियान्वयित्वमेव कारकत्वं प्रतिपादयन्ति, परन्तु नवीनाः तु जन्यजनकभावेन एव कारकसंज्ञां प्रतिपादयन्ति इति मम आशयः इति शिवम्।

[52] पा.सू. १-४-२५.

# चतुर्थोऽध्यायः

## अधिकरणात् कर्तृकारकपर्यन्तं समीक्षणम्

### 4.1. आधारोऽधिकरणम् (१-४-४५)।

"अधिक्रियतेऽस्मिन् क्रिया इत्याधारः। "अध्यायन्यायोद्यावसंहारावायाश्च"[1] इत्यादिना करणे घञ्। क्रियाश्रययोः कर्तृकर्मणोर्धारणात् परम्परया क्रियां प्रति आधारः तत्कारकमधिकरणं स्यात्। कटे आस्ते, स्थाल्यां पचति। स्यादेतत्। साक्षात्क्रियाधारयोः कर्तृकर्मणोरेव कुतो नेयं संज्ञेति चेत्, न, पराभ्यां कर्तृकर्मसंज्ञाभ्यां बाधितात्[2]" इति *शब्दकौस्तुभ*कारस्य कथनम्। प्रकृतसूत्रे 'अवहाराधार' इत्युपसंख्यानात्। आधीयतेऽस्मिन्नित्याधारः। आधारः– आश्रयः। किन्निष्ठाधेयतानिरूपिताधारतावान् इति नियमेनाकाङ्क्षोदयात्, कर्तृकर्मान्यतरवृत्तिक्रियाधारत्वं लभ्यते। अतः 'कटे आस्ते चैत्रः' इति उदाहरणे स्वम्– कट इति तदाश्रयः चैत्रः, तद्वृत्तिः स्थितिक्रिया। स्थाल्या पचति तण्डुलान्। स्वम्– स्थाली तन्निष्ठाः तण्डुलास्तद् वृत्तिः विक्लित्तिः। तथा चेत्थं फलति साक्षात् क्रियाधाराधारयोरधिकरणसंज्ञा भवति। अत एव प्रोक्तम्– "कर्तृकर्मद्वारा तन्निष्ठक्रियया आधारः कारकमधिकरणसंज्ञः स्यात्"[3] इति।

अधिकरणं त्रिप्रकारकम् इति सर्वैरेव वैयाकरणैः स्वीक्रियते। तथा चोक्तं भगवता पतञ्जलिना अधिकरणं नाम त्रिप्रकारकम्- "अभिव्यापकम्, औपश्लेषिकं वैषयिकं चेति

---

[1] पा. सू. ३/३/१२२.

[2] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. १२७.

[3] वै. सि. कौ., प्र. भा., सम्पा. गिरिधरशर्मा परमेश्वरानन्दश्च, पृ. ७९६.

इति"[4]। भट्टोजिदीक्षितेनापि त्रयो भेदाः स्वीकृता अधिकरणस्य, उक्तं च तैः "औपश्लेषिको वैषयिकोऽभिव्यापकश्चेत्याधारस्त्रिधा"[5]।

कौण्डभट्टेनापि वैयाकणभूषणसारे सुबर्थप्रकरणे सप्तम्यर्थनिरूपणे अधिकरणस्य त्रैविध्यमेव स्वीकृतम्। नागेशेनापि *परमलघुमञ्जूषा*यां कारकप्रकरणे अधिकरणस्वरूपवर्णने अधिकरणस्य त्रैविध्यमेव प्रतिपादितम्। अतः स्पष्टमेव यद् वैयाकरणाः त्रैविधमधिकरणं स्वीकुर्वन्ति।

सर्वावयवावच्छेदेन यत्र क्रियाश्रयस्य सम्बन्धः तदेव अभिव्यापकाधिकरणम्। यथा– तिलेषु तैलम्, दध्नि सर्पिः इत्यादि। अत्र क्रियाश्रयस्य तैलम्, सर्वावयवावच्छेदेन तिलने सह विद्यते। अत एव कैयटेन प्रोक्तं– "दध्नि सर्पिः, तिलेषु तैलम्"[6] इति। नागेशेनापि प्रोक्तं– "तत्र सकलावयवव्याप्तौ व्यापकाधारत्वम्"[7] इति। अर्थात् "संयोगसम्बन्धावच्छिन्नाधेयतानिष्ठव्यापकतानिरूपिता या समवायसम्बन्धावच्छिन्नव्याप्यता, तद्विशिष्टाधारोऽभिव्यापकम्"[8] इति।

उपगतः श्लेषः उपश्लेषः, संयोगसम्बन्धः। ततः आगतं तत्कृतं वा औपश्लेषिकम् इति। यद्वा उप– समीपे श्लेषः। सामीप्यसम्बन्धः। तत आगतं, तत्कृतं वा औपश्लेषिकम्।

---

[4] पा. सू. ३/३/१२२.

[5] वै. सि. कौ., प्र. भा., सम्पा. गिरिधरशर्मा परमेश्वरानन्दश्च, पृ. ७९७.

[6] महा. भा. प्र., द्वि. ख., सम्पा. भार्गवशास्त्री जोशी, पृ. ३६५.

[7] वै. प. लु. म., कारकप्रकरणम्.

[8] ल. श. शे., का. प्र., सम्पा. तेजपालः शर्मा, भैरवीटीकायाम्, पृ. ३५२.

तथा च "संयोगादिसम्बन्धेन एकदेशावच्छेदेन यः क्रियाश्रयसम्बन्धी तत् औपश्लेषिकम् अधिकरणम्"[9] इति। कटे अस्ति तिष्ठति इति उदाहरणम्।

विषयाद् विषयसम्बन्धाद् आगतं वैषयिकं क्रियाश्रयविषयः इति यावत्। यथा 'मोक्षे इच्छा आस्ति' इत्यत्र 'मोक्षविषयिणी इच्छा' इति बोधेनात्र इच्छारूपक्रियाश्रयविषयो मोक्षः, अतस्तद्वैषयिकाधिकरणम्।

दीक्षितप्रभृतयः अधिकरणकारकस्य स्ववृत्तिवृत्तित्वरूपपम्परासम्बन्धेन साक्षादेव क्रियायामन्वय इति स्वीकुर्वन्ति। यथा देवदत्तः कटे आस्ते इत्यत्र स्वम्– अधिकरणम्, तद्वृत्तित्वं कर्तुः, तद्वृत्तित्वं कर्मणः, तद्वृत्तित्वं च क्रियायाम्। परन्तु तथा स्वीकारे "अक्षेषु शोण्डः, अक्षशौण्डः"[10] इत्यत्र अक्षरूपाधिकरणस्य स्ववृत्तिरूपसम्बन्धेन क्रियायामेवान्वयस्वीकारेण शौण्डपदार्थेन सहान्वयाभावेन अक्षशौण्डयोः परस्परमन्वयाभावात् सामर्थ्याभावेन अक्षस्य शौण्डेन सह समासो न स्यात् अतस्तत्र समासार्थं शौण्डपदस्य शौण्डासक्तक्रियारूपेऽक्षपदार्थान्वयं स्वीकृत्य लक्ष्यार्थे शौण्डपदार्थैकदेशे आसक्तिक्रियारूपेऽक्षपदार्थान्वयं स्वीकृत्य सामर्थ्यं व्युत्पाद्य समासं स्वीकुर्वन्ति।

तत्त्वबोधिनीकारेणाप्यत्र एवमेवोक्तम्- "इह आसक्तिरूपाक्रियावृत्तावन्तर्भवतीति तद्वारकं च सामर्थ्यम्। यथा दध्योदनगुणाधानादौ उपसेचनमिश्रीकरणादिद्वारा सामर्थ्यम्। तेन कारकाणां क्रिययैव सम्बन्ध इति नियमस्य न व्यभिचारः"[11]।

---

[9] तत्रैव.

[10] वै. सि. कौ., द्वि. भा., सम्पा. गिरिधरशर्मा परमेश्वरानन्दश्च, पृ. ६२.

[11] वै. सि. कौ., द्वि. भा., सम्पा. गिरिधरशर्मा परमेश्वरानन्दश्च, तत्त्वबोधिनीटीका, पृ. ६२.

अयं भावः –

“दध्ना-औदनः” इति विग्रहे अन्नेन व्यञ्जनम् इति सूत्रेण समासे सति “दध्योदनः” इति रूपं सिद्ध्यति। तत्रायं जायते सन्देहः दध्ना इत्यत्र करणे तृतीया तथा च कारकाणां क्रिययैव सह सम्बन्धात् उपसिक्तपदार्थबोध्यक्रियायामेवान्वयः स्यात्, तथा सति ओदनपदेन सह समासो न स्यात्, तथा अन्नेन व्यञ्जनम् इति सूत्रं व्यर्थं स्यादतस्तत्र सूत्रसामर्थ्याद् उपसेकक्रियाद्वारासामर्थ्यं सर्वैरपि स्वीक्रियते। तथा च तत्र सामर्थ्यं स्वीकृत्य समासो भवति। अत एवोक्तं भट्टोजिदीक्षितेन दध्ना उपसिक्त ओदनो दध्योदनः। इह वृत्तावुपसेकक्रियाऽन्तर्भवति स्वभावात्। तथैवान्यत्राप्युक्तं तैः इहान्तर्भूतोपसेकक्रियाद्वारा सामर्थ्यम्। अतः दध्योदनः इत्यादौ सर्वैरपि क्रियायामन्तर्भाव्यसामर्थ्यं स्वीकृत्य समासः स्वीकृतः तथैव प्राचीना अक्षशौण्डः इत्यादावपि स्वीकुर्वन्ति सप्तमी शौण्डः सूत्रसामर्थ्यात् अन्यथा सूत्रमिदं व्यर्थं स्यात्। किञ्च अक्षशौण्डस्य धनम् इत्यादौ शौण्डपदस्य शौण्डासक्तरूपार्थे लक्षणाऽवश्यमेव स्वीकरणीया।

अन्यथाऽत्र शौण्डस्य इत्यस्य धनपदार्थे एवान्वयेन कर्तृद्वाराऽपि अक्षरूपाधिकरणस्य क्रियायामन्वयो न सम्भवति। तस्माद् अक्षशौण्डस्य धनम् इत्यादौ लक्षणायाः सर्वैरिव स्वीकरणीयतया तथैव अक्षशौण्डः इत्यादौ निर्वाहे अधिकरणकारकस्य परम्परया क्रियायामन्वयस्वीकारे साक्षादेवान्वयः स्वीकरणीयः इति प्राचीनानामभिप्रायः।

भर्तृहरिणा साधनसमुद्देशे अधिकरणस्वरूपवर्णनप्रसङ्गे प्रोक्तम्–

**“कर्तृकर्मव्यवहितामसाक्षाद् धारयत्क्रियाम्।**

**उपकुर्वत्क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्॥”** इति।

अर्थात् कर्तृकर्मव्यवहिताम्, कर्तृकर्मद्वारिका क्रिया क्रियतेऽनया इति करणव्युत्पत्त्या व्यापाररूपाम्, क्रियते या सा इति। कर्मव्युत्पत्त्या फलरूपां वा असाक्षात् धारयत् सत् फलसिद्धिरूपायां क्रियासिद्धौ उपकुर्वत् कारकं शास्त्रे अधिकरणं स्मृतम् इति।

अथात्र कारिकायां व्यवहिताम् इति कथननैव असाक्षात् क्रियोपकारकमधिकरणम् इत्यर्थो स्वयमेव समायाति, एवं च व्यवहिताम् इत्युक्ते सति असाक्षात् इति किमर्थमुक्तम् इति चेदुच्यते– लोकानुसारेणाऽपि– अधिकरणपदार्थव्यवस्थायामधिकरणस्य क्रियाधारणं प्रति कर्तृकर्मव्यवधानस्य आवश्यकत्वमिति सूचनाय व्यवहितामित्युक्तेऽपि असाक्षादित्युक्तम्। अत एव प्रोक्तं हेलराजेन- व्यवहिताम् इत्युक्तेऽपि असाक्षात् इति वचनं लोकानुसारेणापि पदार्थव्यवस्थायामधिकरणस्य क्रियाधारणं प्रति व्यवधानपरिपोषणार्थम्।

नागेशभट्टानामाशयः नवीनास्तु न साक्षादधिकरणकारकस्य क्रियायामन्वयं स्वीकुर्वन्ति। अपि तु परम्परयैव क्रियायामन्वयं स्वीकुर्वन्ति। तेषां मते तु अधिकरणस्य स्ववृत्तित्वरूपसम्बन्धेन साक्षात् कर्तृकर्मणोरेवान्वयः तद्द्वारा च तस्य क्रियायामन्वयः। भणितञ्च नागेशेन- "एवञ्च क्रियान्वयोऽप्यस्य कर्त्राद्यन्वयद्वारैव। यस्य यद्द्वारा कारकत्वं तस्य तद्द्वारैव क्रियान्वय इति व्युत्पत्तेः"[12] भैरवमिश्रेणाप्युक्तम् "कारकाणां क्रियान्वयित्वमिति नियमोऽपि अधिकरणविषये परम्परयैव"[13]। एवञ्च नवीनमते 'अक्षशौण्डः' इत्यादौ अक्षपदार्थस्य शौण्डपदार्थे साक्षादेवान्वयस्य सत्त्वादेव लक्षणां विनैव समाससिद्धिः।

[12] ल. श. शे., का. प्र., पा. सू. १-४-४५, सम्पा. तेजपालः शर्मा, पृ. ३५०.

[13] ल. श. शे., का. प्र., पा. सू. १-४-४५, सम्पा. तेजपालः शर्मा, भैरवीटीकायाम्, पृ. ३५२.

अत्र विषये नवीनमतमेव समीचीनं प्रतिभाति। यतोहि– "अक्षशौण्डस्य धनम्" इत्यादौ उद्देश्यवाचके शौण्डादिपदे लक्षणाश्रयणेऽपि, 'अक्षशौण्डः' इत्यादौ विधेयबोधके शौण्डपदे लक्षणा न सम्भवति न विधौ परशब्दार्थः इति न्यायविरोधात्। किञ्च अत्र "दध्योदनः" इत्यत्र इव न आसक्त्यादिक्रियाबोधः, अतो न लक्षणा। एवं च लक्षणानाश्रयणे सति अधिकरणस्य साक्षात्क्रियान्वयस्वीकारे "अक्षशौण्डः" इत्यादौ समासो न स्यात् अतः, अधिकरणकारकस्य साक्षात्कर्तृकर्मणोरेवान्वयः स्वीकरणीयः।

### 4.2. अधिशीङ्स्थासां कर्म (१-४-४६)।

'अधिशीङ्-अधिस्था-अध्यास्' इति योगे आधारस्यैव कर्मत्वशक्तिमत्ताऽनेन बोध्यते। अत्र 'आधारः' इत्यनुवर्तनात्। द्वन्द्वान्ते इत्यत्रान्तपदं न चरमावयवपरं किन्तु समीपपरम्। समीप्यञ्च पूर्वत्वेन परत्वेन च। यथात्र पूर्वत्वेन। परत्वेन प्रातिपदिकार्थमात्रे... इति सूत्रे मात्रशब्दस्य प्रत्येकं योगबोधनेन। एतत् फलितार्थमादाय "द्वन्द्वान्ते द्वन्द्वादौ वा श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते" इति। उदाहरणम्– **अधिशेते, अधितिष्ठति, अध्यास्ते वा वैकुण्ठं हरिः** इति। अत्र वैकुण्ठपदं विशिष्टस्थानपरं तेन वैकुण्ठः धाम ग्राह्यम्। सूत्राभावे 'वैकुण्ठे' इति स्यात्। शीङ् स्वप्ने, ष्ठा गतिनिवृत्तौ, आस उपवेशने। अध्युपसर्गपूर्वकत्वेन त्रयाणां समानार्थकत्वम्। *महाभाष्य*कारेण सूत्रमिदं प्रत्याख्यातम्।

### 4.3. अभिनिविशश्च (१-४-४७)।

अभि च नि च इत्यनयोः द्वन्द्वः, द्वन्द्वे अल्पाच्तरम् इति निशब्दस्य पूर्वनिपाताकरणं ज्ञापयति 'अभिनि' इति संघातस्यैव ग्रहणम्। तेन 'निविशते यदि शूकशिखापदे'

इत्यत्राधारस्य नानेन कर्मत्वम्। उदाहरणम् यथा- **अभिनिविशते सन्मार्गम्** इत्यत्र सन्मार्गरूपाधारस्यानेन कर्मत्वशक्तिबोधनेन द्वितीया। सन्मार्गविषयकाग्रहानुकूल-ज्ञानानुकूलो व्यापारः इति बोधः। मण्डूकप्लुत्या "परिक्रयणे सम्प्रदानमन्यतरस्याम्" इत्यतः 'अन्यतरस्याम्' इति अनुवर्तते।

यद्यपि मण्डूकप्लुत्या अनुवृत्तौ अत्र सम्बद्धेति ज्ञाने क्लेशस्तथापि शिष्टोक्तव्याख्यानतः तज्ज्ञानं करणीयमेव। अपि च अस्य सूत्रस्य व्यवस्थितविभाषात्वम् अङ्गीकृत्य 'अभिनिविशते सन्मार्गम्' इत्यादौ नित्यकर्मसंज्ञा।

**पापे अभिनिवेशः** इत्यादिषु पापरूपाधारस्य न कर्मत्वं, तेन आधारस्य अधिकरणसंज्ञायां "सप्तम्यधिकरणे" इति पापशब्दादधिकरणवाचकात्सप्तमी इति। इदं सूत्रमपि भाष्ये प्रत्याख्यातम्।

### 4.4. उपान्वध्याङ्वसः (१-४-४८)।

व्यवधाने यत्कर्तृकदर्शनाभावस्य एतत्पूर्वकस्य वसतेराधारः कर्म स्यात्। उपवसति अनुवसति अधिवसत्यावसति वा ग्रामे सेना। वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः। अर्थशब्दो निवृत्तवचनः। व्यधिककरणे षष्ठ्यौ। वाच्यवाचकभावः षष्ठ्यर्थः। भोजननिवृत्तेर्वाचको यो वसिस्तस्य नेत्यर्थः। ग्रामे उपवसति इति। कथम् उपोष्य रजनीमेकाम् इति। कालाध्वनोः..(अष्टा. सू.- २-३-५) इति द्वितीया भविष्यति। कथम् एकादश्यां न भुञ्जीत इति, उपपदविभक्तेः कारकविभक्तिर्भविष्यति।

अर्थशब्दः उपपूर्वो वसिरश्नात्यर्थेऽप्रसिद्धः। अशिश्च तदर्थपर इत्यपि बोध्यम्। अश्यर्थनिवृत्तिवाचकस्य वसेरित्यक्षरार्थः, निवासार्थस्येति शेषः। तेनाच्छादनार्थस्य न

ग्रहणमिति फलितम्। अश्यर्थस्य न इति वचनस्य प्रत्याख्यानप्रकारमाह ग्रामे उपवसतीत्यत्रेति। उपपदस्य विभक्तिमित्यर्थः। षष्ठ्यर्थसम्बन्धश्च स्वयोगनिमित्तिकत्वम्।

### 4.5. कर्तुरीप्सिततमं कर्म (१-४-४९)।

सूत्रे कर्तृपदं प्रकृतधात्वर्थप्रधानीभूतव्यापाराश्रयरूपस्वतन्त्रपरम्, न तु कर्तृसंज्ञकपरम्। अत एव चैत्रः सार्थाद्धीयते इत्यत्र 'अपादाने चाहीयरूहोः' इति ज्ञापकेन कर्तृसंज्ञां बाधित्वाऽपादानसंज्ञायां सत्यामपि स्वातन्त्र्यस्य अक्षतत्वेन कर्तुरीप्सिततमं कर्म इत्यनेन चैत्रादेः कर्मसंज्ञायां कर्मणि लकारसिद्धिः। कर्त्रा यदाप्तुमिष्यते तत्कर्मसंज्ञं स्यात्। यद्व्यापाराश्रयत्वादसौ कर्ता तेनैव व्यापारेणाप्तुमिष्टमिति सन्निधानाल्लभ्यते। तेन क्रियाफलशालित्वं पर्यवस्यति। क्रिया हि फलेच्छापूर्वकेच्छाविषयः, फलमेव तु इष्टतमम्। तच्च धातुनोपात्तमिति एतद्विशिष्टत्वेनच्छाविषयोऽत्र संज्ञी।

नागेशभट्टेन तु "तद्धात्वर्थजन्यत्वे सति कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वम्।"[14] यथा देवदत्तः तण्डुलं पचति इत्यत्र विक्लित्तौ पच्धात्वर्थफूत्कारादिव्यापारजन्यत्वम् अस्ति। किञ्च कर्तृप्रत्ययसमभिव्याहारे नव्यमते फलप्रकारव्यापारविशेष्यकबोधस्यैवोदयेन तत्र तादृशप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्वम् अपि स्थास्यत्येव, अतस्तत्र लक्षणसमन्वयो बोध्यः। एवमन्यत्रापि ज्ञेयम्।

स एतच्च कर्म सप्तविधम्। निर्वर्त्यं-विकार्यं-प्राप्यम्-अनीप्सितम्-उदासीनं-देष्यं-संज्ञान्तरैरनाख्यातम्-अन्यपूर्वं च।

---

[14] वै. प. लु. म., धात्वर्थप्रकरणम्.

भणितं च भर्तृहरिणा–

**निर्वर्त्यञ्च विकार्यञ्च प्राप्यञ्चेति त्रिधा मतम्।**

**तत्रैप्सततमं कर्म चतुर्धाऽन्यत्तु कल्पितम्॥**

**औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम्।**

**संज्ञान्तरैनाख्यातं यद्यच्चाप्यन्यपूर्वकम्॥**

तथा च -

**यदसज्जायते सद्वा जन्मना यत्प्रकाशते।**

**तन्निर्वर्त्य विकार्यन्तु कर्म द्वेधा व्यवस्थितम्॥**

**प्रकृत्युच्छेदसम्भूतं किञ्चित्काष्ठादिभस्मवत्।**

**किञ्चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत्॥**

**क्रियाकृतविशेषाणां सिद्धिर्यत्र न गम्यते।**

**दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते॥** इति।

तत्र निर्वर्त्यं यथा-घटं करोति। विकार्यम्– काष्ठं भस्म करोति। प्राप्यं यथा– घटं पश्यति, ग्रामं गच्छति। उदासीनं- तृणं स्पृश्यति। द्वेष्यम्- विषं भुङ्क्ते। संज्ञान्तरैरनाख्यातम्– गा दोग्धि पयः। अन्यपूर्वकञ्च– क्रूरमधिक्रुद्ध्यति इति।

## 4.6. तथा युक्तं चानीप्सितम् (१-४-५०)।

ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कर्मसंज्ञं स्यात्। ग्रामं गच्छन् वृक्षमूलान्युपसर्पति। चौरान् पश्यति इति।

समभिव्याहृतधात्वर्थप्रधानव्यापारप्रयोज्यतत्तद्धात्वर्थफलाश्रयत्वरूपम्। पराधीनतया विषं भुञ्जानेऽपि भुजिक्रियाफलाश्रयत्वेननोद्देश्यत्वात् पूर्वसूत्रेणैव सिद्धम्, अत्र उपक्रमस्थभाष्योक्तमुदाहरणमन्यथा सिद्धं यद्यपि तथापि तत्रत्यम्मुख्यमेवोदाहरणं वक्तुमुपक्रमते। तदुक्तं भाष्ये आतश्च विषमीप्सितं यत्तद्वक्षयति इति तस्मात् "चौरान् पश्यति" इति द्वेष्योदाहरणम्। विषयेन्द्रियसम्बन्धाद् दृश्यमाना अपि न दर्शनोद्देश्याः, अपि तु अनिष्टदर्शना एवेति स्पष्टं भाष्यकैयटयोः।

अनीप्सितम् अनुद्देश्यम्। तच्च द्वेष्यमुदासीनञ्च। न दर्शनोद्देश्या इति। एतेन प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वेनोद्देश्यत्वाभावान्न पूर्वसूत्रेण कर्मत्वसिद्धिरिति बोधितम्।

### 4.7. अकथितञ्च (१-४-५१)।

"अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्। नटस्य शृणोति इत्यादौ अतिप्रसङ्गं वारयितुं परिगणनं कर्तव्यम्।

दुहियाचिरुधिप्रच्छिभक्षिचिञामुपयोकनिमित्तमपूर्वविधौ।

ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कविना।

नीवह्योर्हरतेश्चापि गत्यर्थानां तथैव च।

द्विकर्मकेषु ग्रहणं कर्तव्यमिति निश्चयः॥"[15] इति

अपि च पुनः *शब्दकौस्तुभे*– "इह प्रछीत्यत्र "छे च" (अष्टा. सू. ६-१-४३) इति तुङ् न कृतः, आगमशासनस्यानित्यत्वात् "सनाद्यन्ता धातवः" (अष्टा. सू. ३-१-३२), "इको

[15] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. १३०.

यणचि” (अष्टा. सू. ६-१-७७) इतिवत्। उपयुज्यते इत्युपयो गो मुख्यं कर्म क्षीरादि तस्य निमित्तिं गवादि दुह्यादीनां मुख्यकर्मणा सम्बन्धमानमिति यावत्। तथा ब्रुविशासिगुणेन कारकेण कर्मणेति यावत्। कारकाणां क्रियां प्रति विशेषणत्वात्। तत्रापि कर्मण एव प्रकृतत्वात्। यत्सचते सम्बन्धते। “षच् समवाये” (भ्वा. उ. ९९७) स्वरितेत्। केचित्तु परस्मैपदिभिः सहैनं धातुं पठन्ति। षच समवाये, रप लप व्यक्तायां वाचि इति। तन्मते “षच सेवने” (भ्वा. आ. १६३) इत्यास्यानुदात्तेतो धातूनामनेकार्थत्वात्समवाये वृत्तिर्बोध्या। उभयथापि सम्बध्नातेः कर्मव्यापारे सचिर्वर्तते। अत एव कर्तृपदस्य कर्मपदेनार्थकथनं न विरुध्यते। “राध्यत्योदनः” इत्यस्य पच्यते इत्यनेन यथा। उभयत्राप्योदननिष्ठविक्लित्तेर्भानाविशेषात्। कविना मेधाविना सूत्रकारेण तदकीर्तितमित्याचरितं व्यवहृतमित्यर्थः। अपूर्वविधाविति। पूर्वोक्तानामपादानादिसंज्ञानां विषयश्चेन्नास्तीत्यर्थः। न चैवं वक्ष्यमाणयोर्हेतुकर्तृसंज्ञयोर्विषयेऽतिप्रसङ्गः स्यादिति वाच्यम्, एकसंज्ञाधिकारेण पराभ्यां हेतुकर्तृसंज्ञाभ्यां कर्मसंज्ञाया बाधात्। प्राञ्चस्तु पूर्वग्रहणमन्यमात्रोपलक्षणम्। तेन वक्ष्यमाणयोर्हेतुकर्तृसंज्ञयोर्विषये नातिप्रसङ्गः। सूत्रेऽप्यकथितमिति कथननिवृत्तिपरायणादत्र भूतकालो न विवक्ष्यते। यथा “पराजेरसोढः” (अष्टा. सू. १-४-२६) इत्यत्रासहिष्यमाणस्याप्यपादानसंज्ञा भवति अध्ययनात्पराजेष्यते इति तथेहापीत्याहुः। तच्चिन्त्यम्, उक्तरीत्या यथाश्रुतेऽपि सर्वसामञ्जस्यात्। “नीवह्योः” इति श्लोके गत्यर्थानामित्युत्तरसूत्रोपात्तानामुपलक्षणम्। चकारेण जयत्यादयो गृह्यन्ते इति कैयटः।

माधवोप्याह–

**“जयतेः कर्षतेर्मन्थेर्मुषेर्द्दण्डयतेः पचेः।**

**तारेर्ग्रहेस्तथा मोचेस्त्यार्जेदार्पिश्च संङ्ग्रहः॥**

**कारिकायाञ्चशब्देन सुधाकरमुखैः कृतः॥”**[16] इति।

अत्र ‘अकथितम्’ इति शब्दोऽसंकीर्तितपरः। असंकीर्तितत्वञ्च क्वचित् प्रसक्तस्यापादानत्वादेरप्यपादानत्वादिरूपेणाविवक्षिततत्वरूपम्। क्वचिच्च सर्वथाऽपादानत्वाप्राप्तिरूपम्। आद्यम् ‘गां दोग्धि पयः’ इति। द्वितीयं ‘बलिं याचते वसुधाम्’ इति। एवञ्च पूर्वविधिविषयप्रसक्तिपूर्वकं तदविवक्षायाम्, सर्वथा पूर्वविधेरप्रसक्तौ चैतत्प्रवृत्तिरिति। यदि अपादानत्वादिना विवक्षा तदा तु पञ्चम्याद्येव। तेन रूपेणाविवक्षा, कर्मत्वेन यदा विवक्षा तदेदं सूत्रं प्रवर्तते इति भावः।

अयं भावः– विवक्षातः कारकाणि भवन्ति कर्मादिषु निश्चयो नास्ति।

उक्तञ्च–

**वस्तुतस्तदनिर्देश्यं न हि वस्तु व्यवस्थितम्।**

**स्थाल्येषा पच्यते ह्येषा विवक्षा दृश्यते यतः॥** इति।

स्थ्याल्यां पचति, स्थाल्या पचति, स्थाली पचति इत्येवमादाय प्रयोगाः भवन्ति। दुहादिषोडशधातुवाच्यव्यापारजन्यफलाश्रयप्रधानकर्मसम्बन्धाकथितकारकस्य कर्मसंज्ञा विधीयते। कर्मयुक्तं धात्वर्थव्यापारात् प्राक् तदनन्तरं वा तत्सम्बन्धत्वम्। तत्र ब्रुविशास्यतिरिक्ते धात्वर्थव्यापारात्प्रागेव तत्सम्बद्धत्वम्। तद्विषये तु तदनन्तरं तत्सम्बद्धत्वं बोद्धव्यम् ‘गां दोग्धि पयः’ इति। अत्र अपादानत्वेन गोशब्दात्पञ्चमी प्राप्ता, किन्तु

---

[16] तत्रैव.

अपादानत्वेनाविवक्षया कर्मत्वेन विवक्षया चानेन कर्मसंज्ञा विधीयते। पय इति प्रधानं कर्म। तस्य कर्तुरिति कर्मसंज्ञा। द्रवद्-द्रव्यविभागानुकूलव्यापारो दुहेरर्थः। अत्राप्रधानं कर्म गौरिति। तेन पूर्वोक्तषोडशधातूनां द्विकर्मकत्वम्। अकथितञ्चेति सूत्रविहितकर्मणो गौणत्वम्। पयस्सम्बन्धि-गोकर्मकं दोहनमिति बोधः।

ननु द्विकर्मकधातूनां कस्मिन् कर्मणि प्रत्ययः, इति जिज्ञासायाम्

उक्तम्–

**"गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्।**

**बुद्धिभक्षार्थयोः शब्दकर्मणाञ्च निजेच्छया॥**

**प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः।"**[17] इति।

वस्तुतस्तु दुहादिषोडशधातूनां तत्समानार्थकान्यधातूनाञ्च व्यापारद्वयार्थकत्वं स्वीकृत्याकथितञ्चेति सूत्रं न करणीयमिति वदन्ति नव्याः। तथाहि- 'गां दोग्धि' इत्यत्र गौः पयस्त्यजति, गवा पयस्त्याजयति इत्यर्थप्रतीत्या दुह् धातोः द्रवद्-द्रव्यविभागानुकूलव्यापारानुकूलव्यापारोऽर्थः। एवञ्च नव्यमते प्रधानकर्मत्वं गवादीनामेवेति तत्रैव कर्मणि लादिसिद्धिः। प्रधानकर्मत्वञ्च कर्तृप्रत्ययसमभिव्याहारे कर्तृनिष्ठप्रधानव्यापारस्य शाब्दबोधीयविशेष्यत्वरूपप्राधान्यम्।

**बलिं याचते वसुधाम्** इत्यत्र परस्वत्वनिवृत्तिपूर्वकस्वस्वत्वोत्पत्त्यनुकूलव्यापारो याचेरर्थः। स्वत्वे बलेः निरूपकतयाऽन्वय इति नागेशः। वस्तुतस्तु अत्र व्यापारद्वयार्थकत्वं स्वीकृत्य पूर्वेणैव कर्मसंज्ञेति नेदं सूत्रमावश्यकमिति। अत्र बलेः अपादानत्वेनाविवक्षा, कर्मत्वेन विवक्षा बोध्या।

---

[17] वै. क. का. (*कारिकाकरः*), सं. २४२.

**अविनीतं विनयं याचते** इत्यत्र अविनीतं विनयाननुनयतीत्यर्थः। विनयस्यानेन कर्मत्वम्। अविनीतस्य पूर्वेण। अनुनयानुकूलव्यापारानुकूलव्यापारर्थकत्वे तु पूर्वेण गतार्थता।

**तण्डुलानोदनं पचति** इत्यत्र पच् धातोः अर्थद्वयम्। विक्लित्त्यनुकूलव्यापारवाचको यदा तण्डुलः कर्म तदा। ओदनरूपं कर्म तदा सिद्ध्यनुकूलव्यापारः। तण्डुलानां करणत्वाविवक्षायामनेन कर्मसंज्ञा। अत्रापि विक्लित्त्यनुकूलव्यापारानुकूलव्यापारवाचकत्वं पचेस्तदा पूर्वेण कर्मत्वम्।

**गर्गान् शतं दण्डयति** इत्यत्र अपादानत्वेनाविवक्षायां गर्गाणामनेन कर्मसंज्ञा। शतस्य पूर्वेण। बलात् परस्वत्वनिवृत्तिपूर्वकस्वस्वत्वोत्पत्त्यनुकूलव्यापारो दण्डेरर्थः। अत्र गर्गपदं गर्गगोत्रवतां पुरुषाणां बोधकम्। तेभ्यः शतकर्मकं दण्डनम्, न तु प्रत्येकस्मात् शतकर्मकं दण्डनम्।

**व्रजमवरुणद्धि गाम्** इत्यत्र व्रजस्याधिकरणत्वाविवक्षायां कर्मसंज्ञाऽनेन। निर्गमप्रतिबन्धपूर्वकयत्किञ्चिदधिकरणकचिरस्थित्यनुकूलव्यापारो रुधेरर्थः। व्रजे गौः तिष्ठति, तत्र वा निर्गमप्रतिबन्धकपूर्वकं चिरं स्थापयतीति सम्प्रत्ययात्। अत्रापि व्यापारद्वयार्थकत्वे तु पूर्वेण कर्तुरित्यनेन कर्मत्वम्।

**माणवकं पन्थानं पृच्छति** इत्यत्र जिज्ञासाविषयार्थज्ञानानुकूलव्यापारः पृच्छेरर्थः। जिज्ञासा च केन पथा गन्तव्यमित्येवंरूपा। अत्र ज्ञानविषयत्वेन पथः कर्मत्वम्। माणवकेन च तज्ज्ञानाश्रयत्वं सम्बन्धः। अपादानत्वन्तु नात्र, 'न प्रश्नादेवापायो भवति पृष्टोऽसौ यद्याचष्टे तदाऽपायेन युज्यते' इति। सम्प्रदानत्वमपि न, कर्मसम्बन्धवत्त्वेनेच्छाविषयत्वाभावात्। व्यापारद्वयार्थकत्वे तु कर्तुरिति कर्मत्वम्।

**वृक्षमवचिनोति फलानि** इत्यत्र विभागपूर्वकादानुकूलो व्यापारः चिञ् इत्यस्य अर्थः। वृक्षात् फलानि आदत्ते। अपादानत्वविवक्षायामनेन कर्मत्वम्।

**माणवकं धर्मं ब्रूते शास्ति** इत्यत्र कण्ठताल्वाद्यभिघातपूर्वकज्ञानजनकशब्द-प्रयोगरूपव्यापारो ब्रूञर्थः। प्रवृत्तिपर्य्यवसायी शासेरर्थः। अध्ययनं कुरु इति शिष्योपदेशरूपः। सम्प्रदानत्वाविवक्षायामनेन कर्मत्वम्, उपदेशानुकूलधर्मसम्बन्धकरणपरीक्षणमपि आचार्यस्येति कर्तव्यतायामागच्छति। न केवलोपदेशदानेन आचार्यस्य कृतार्थतेति दिक्। शतं जयति देवदत्तम्। अपादानत्वाविवक्षायां देवदत्तस्यानेन कर्मत्वम्। पराक्रमप्रदर्शनपूर्वकपरस्वत्वनिवृत्तिस्वस्वत्वोत्पत्त्यनुकूलव्यापारो जिधात्वर्थः। व्यापारद्वयार्थकत्वे तु पूर्वेण कर्मत्वम्।

**सुधां क्षीरनिधिं मथ्नाति** इत्यत्र सुधायै इति प्राप्ते सम्प्रदानत्वविवक्षायामनेन कर्मत्वम्। अन्तःस्थितसारभूतद्रव्यबहिःप्रकाशनाय विलोडनानुकूलव्यापारार्थकत्वं मथेः।

**देवदत्तं शतं मुष्णाति** इत्यत्र गुप्तप्रकारेणान्यायेन परस्वत्वस्वाधीनीकरणरूपव्यापारो मुषेरर्थः। व्यापारद्वयार्थकत्वे कर्तुरिति कर्मत्वम्।

**ग्राममजां नयति हरति कर्षति वहति वा** इत्यत्र नयतेः संयोगानुकूलो व्यापारः। स्कन्धादिग्रहणपूर्वकोत्तरदेशसंयोगानुकूलो व्यापारो वहेरर्थः। गत्यनुकूलव्यापारविशेषः कृषेरर्थः। बलाद् ग्रहणपूर्वकं देशान्तरप्रापणं हरतेरर्थः।

वस्तुतः द्विकर्मकधातुनां विषये यः श्लोकः भगवता पतञ्जलिना उक्तमस्ति तत्र पच्धातोः पाठः नास्ति, अतः नागेशमते दुह् याच् प्रभृतिषु पच्धातोः पाठः अप्रामाणिकः, परन्तु व्यापारस्य द्व्यर्थकत्वस्वीकारे पच् धातुः द्विकर्मकः इति। हरदत्तः कैयटादीनां

व्याख्यानमते च श्लोके ‘च’ शब्दस्य व्यवहारे ‘जि’ प्रभृतिधातूनां ग्रहणं भवति। यथा– जि, मष्, दण्ड्, कुष्।

अर्थनिबन्धनेयं संज्ञा अत्र भवति यतो हि “अकथितं च” इति सूत्रे कर्मसंज्ञा अर्थाश्रया भवति न तु स्वरूपाश्रया। तेन षोडशधातुपर्य्यायवाचकधातुयोगेऽपि “अकथितञ्च” इति सूत्रं प्रवर्तते एव। अत्रार्थे ‘तद्राजस्य तेनैवास्त्रियाम्’ (२-४-६२) इति सूत्रभाष्ये पृच्छिपर्य्यायस्य चुदेरपि द्विकर्मत्वबोधनपरं भाष्यमेव। तथाहि- ‘यो हि उभयोर्दोषो न तत्रैकश्चोद्यः’ इत्यर्थमुषक्रम्य ‘अचोद्यं मां त्वं चोदयसि’ अहमपि त्वां किमचोद्यं चोदयामि इति कर्तरि प्रत्यये प्रयोगः। कर्मणि प्रत्यये ‘अहमपीदमचोद्यं चोद्ये’ इति।

तथा हि भट्टिः–

**स्थाणुं रणे स्मेरमुखो जगाद मारीचमुच्चैर्वचनं महार्थम्।** इति।

महाकविः कालिदासः–

**शिलोच्चयोऽपि क्षितिपालमुच्चैः प्रीत्या तमेवार्थमभाषतेव।** इति

भारविः अपि–

**उदारचेता गिरिमित्युदारां द्वैपायनेनाभिदधे नरेन्द्रः।** इति।

एवं पूर्वोक्तधातुसमानार्थकानेकधातूनां द्विकर्मकत्वं ज्ञेयम्।

परन्तु आचार्यः नागेशः अत्र अर्थाश्रयं न स्वीकरोति। यतो हि अर्थाश्रये सति *भाष्य*कारस्य दुहि-याचि इत्यादिश्लोके याचि तथा भिक्षि इति एतयोः समानार्थकरूपेण ग्रहणं न स्यात्।

याचि अथवा भिक्षि इत्यत्र एकेन अपरस्य ग्रहणं स्यात्। कैयटः हरदत्तश्च वाचि इत्यस्य अनुनयम् तथा भिक्षि इत्यत्र याचनम् इत्यर्थं स्वीकरोति, अतः नैव एकः अपरस्य परिपूरकं भवितुमर्हति।

परन्तु पुनः आचार्यः नागेशः कथयति भिक्ष-धातुः यदि अनुनयम् इति अर्थे 'अविनीतं विनयं भिक्षते' इति प्रयोगः स्यात्, तेन अत्र एवं वक्तव्यं याच् धातुः भिक्ष-धातुः उभयोः उभयार्थकः अतः कर्मसंज्ञा अपि प्राप्नोति, तदर्थं भाष्यकारस्य श्लोके समानार्थकरूपेण धातोः ग्रहणं नैव आवश्यकम्।

किन्तु आचार्यः भट्टोजिदीक्षितः अर्थाश्रयं स्वीकरोति, केवलं ग्रह्-धातोः द्विकर्मकत्वं नैव स्वीकरोति। अतः "जग्राह द्युतरुंशत्रुम्" इत्यत्र "अकथितञ्च" इति सूत्रेण ग्रह्-धातोः असाधुप्रयोगः इति मनोरमायाम्। किन्तु यदि 'दुह्-याच्..' इत्यस्मिन् श्लोके ग्रह्-धातोः पाठः स्यात् तर्हि कथं ग्रह्-धातोः द्विकर्मकता न इत्येव चिन्तनीयम्।

**अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्।**

धातवः द्वेधा भवन्ति सकर्मकाः अकर्मकाश्च। स्वार्थफलव्यधिकरणव्यापारवाचकत्वं सकर्मत्वम्। स्वार्थफलसमानाधिकरणव्यापारवाचकत्वमकर्मकत्वम्। स्वम्– धातुः। धातुत्वञ्च क्रियावाचकत्वरूपम्। क्रियात्वञ्च गुणत्वानाश्रयत्वे सति विभागासमवायिकारणत्वम्। क्रिया अपि द्वेधा विभज्यते, साध्यरूपा पचति इति उदाहरणम्। साधनरूपा च पाकः इति उदाहरणम्। साध्यत्वञ्च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मवत्त्वम्। पचति इत्युक्ते साधन-(कारक)विषयिणी आकाङ्क्षा नियमेन भवति इति। क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकत्वं सिद्धत्वम्। नास्ति कर्म येषां ते अकर्मकाः।

अकर्मकाश्च ते धातवस्तेषां योगे- सम्बन्धे, देशः-कुरुपाञ्चालादिः तस्य कर्मसंज्ञा भवति। तेन "अधिशीङ्स्थासां कर्म" इत्यस्य न वैयर्थ्यम्।

उदाहरणेषु यथा देशः- कुरुन् स्वपिति अत्र अभावप्रत्ययालम्बननिद्रारूपः स्वापः, कालः- मासमास्ते अत्र कालस्य कर्मसंज्ञा। कालशब्देन प्रसिद्धस्यैव मासादेर्ग्रहणम्, न तु गोदोहनादिकालस्य। भावः– गोदोहमास्ते। गन्तव्योऽध्वा– गन्तव्यत्वेन विशेषितः। गन्तव्यत्वेन प्रसिद्धो नियतपरिमाणः क्रोशादिरिति। उदाहरणम् क्रोशमास्ते। कर्मसंज्ञक इति। अत एव "आस्यते मासः" इति कर्मणि लादयोऽपि। कर्मपदे निषेध्यसमर्पककर्मपदेन कालादिरूपकर्मणामग्रहणेनाकर्मत्वाभावेन लादय इति बोध्यम् इति प्राचीनाः। नव्यास्तु स्वकरणव्यापने वृत्त्या व्याप्तिरूपफलाश्रयत्वेन कर्तुरिति कर्मत्वम्।

यथा च *शब्दकौस्तुभे*– "न चैवं सकर्मकेष्वप्यतिप्रसङ्गः, लक्ष्यानुरोधेनाकर्मकाणामेवोक्तप्रकाराभ्युपगमात्।

आह च-

**कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः।**

**सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते॥** इति।

हेलराजस्त्वाह। सकर्मकेष्वपि मासमोदनं पचतीति भवत्येव। अत एवोक्तं सर्वैरिति। अकर्मकैरिति त्वविवक्षितमिति। कैयटोऽप्येवम्। अस्मिन्पक्षे "मासमास्ते कटे" इति कटादेरपि द्वितीया प्राप्ता तथापि कालादेरेव व्यापनकर्मत्वं न तु कटादेरिति हेलराजः। अनभिधानञ्चेह शरणम्। "अधिशीङ्" इत्यादिज्ञापकं वा बोध्यम्। इह च कर्मणि भावे च लकारे "देवदत्तेन आस्यते मासौ मासं वा" इति रूपद्वयमपीष्टम्।

स्यादेतत्, भावे चाकर्मकेभ्य इति वचनान्मासादिकर्मकात्कथं भावे ल इति चेत्, उच्यते, अकर्मकेभ्यः इत्यनेनान्तरङ्गं द्रव्यकर्म व्युदस्यते न तु बहिरङ्गं कालादिकर्म। कर्मणीत्यत्र तु व्यक्तिपक्षाश्रयणादन्तरङ्गासन्निधौ बहिरङ्गे कालादिकर्मण्यपि प्रतिविरुद्धा, जातिव्यक्तिपक्षयोर्लक्ष्यानुरोधेन व्यवस्थेति सिद्धान्तात्।

उक्तं च हरिणा–

**शक्तिप्रमाणसंख्यादेर्द्रव्यधर्माद्विशिष्यते।**

**क्रियासु कालयोगोऽतः प्राग्योगो द्रव्यकर्मभा॥** इति।

**अतस्तैः कर्मभिर्धातुर्युक्तो द्रव्यैरकर्मकः।**

**लस्य कर्मणि भावे च निमित्तत्वाय कल्पते॥** इति च।

एतेन–

सस्तेमामघाभिधानि यमुना गङ्गोघसङ्गे यया। इति श्रीहर्षप्रयोगो व्याख्यातः”[18]।

## 4.8. गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ (१-४-५२)।

“गत्यार्थानां शब्दकर्मकाणामकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यात्। नियमार्थमिदम्। गत्यर्थादीनामेवेति। तेन “पाचयति देवदत्तो यज्ञदत्तेन” इत्यत्र प्रयोज्ये पूर्वप्रवृत्तकर्तृसञ्ज्ञाया एव निरपवादत्वेन अवस्थानात्तृतीया सिद्ध्यति। आह च–

“गुणक्रियायां स्वातन्त्र्यात्प्रेषणे कर्मताङ्गताः।

नियमात्कर्मसंज्ञायाः स्वधर्मेणाभिधीयते॥” इति।[19]

---

[18] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. १३६, १३७.

[19] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. १३७.

अत्र "गुणप्रधानसन्निधौ प्रधानस्य प्रयोजकत्वे सम्भवति सति पृथग्गुणस्तद्विरुद्धं स्वकार्यमत्र प्रयुज्यते। ततश्च सिद्धायां प्रयोज्यस्य कर्मसंज्ञायां गत्यर्थादीनामेवाण्यन्तानां कर्ता कर्मसंज्ञो भवति नान्येषामिति नियमः क्रियते। तेन पाचयत्योदनं देवदत्तो यज्ञदत्तेनेत्यत्र कर्मसंज्ञा न भवति" इति कैयटः इति प्रकृतसूत्रे *शब्देन्दुशेखरे* भैरवमिश्रटीकायाम्।

कर्तुः स्वधर्मेण तृतीययेत्यर्थः। "गामयति माणवकं ग्रामं" ग्रामकर्मकं यत् गमनं तदनुकुलव्यापाराश्रयः इत्यर्थः।

अन्यानधीनत्वलक्षणार्थप्राधान्यशाब्दप्राधान्ययोः प्रयोजकव्यापारे सत्त्वेन तदनुरोधिकर्मत्वस्यान्तरङ्गादपि कर्तृत्वाद् बलवत्त्वेन कर्त्तुरित्येव सिद्धे गत्यर्थादीनामेवेति नियमार्थमिदम्। तेन पाचयत्यादियोगे नेति हेतुमति चेति सूत्रे भाष्यकृतः। अन्तरङ्गादपीत्यपिना परत्वोपजीव्यत्वयोः समुच्चयः।

अत्र हि कथमिदं विज्ञायते हेतुमत्यभिधेये णिज् भवतीति आहोस्विद्धेतुमति यो धातुर्वर्त्तते इति रीत्या विचारे अस्तु प्रकृत्यर्थविशेषणम् इत्युक्तम्। अत्र कैयटः– "विनापि णिजा पञ्चभिर्हलैः कर्षतीति प्रयोजकव्यापारावगमात् प्रकृत्यर्थत्वं हेतुमत उपपद्यते" इति। को दोषः। इह हि उक्तः करोति। प्रैषितः करोतीति णिज् भवति। एवमुक्तप्रेषितादिशब्दाभिहिते प्राप्नोति। हेतुमद्विषयत्ववता करोत्यर्थस्य। प्रत्ययार्थविशेषणत्वे तु उक्तार्थत्वात् णिजभावः। "इह तर्हि पाचयति ओदनं देवदत्तो यज्ञदत्तेनेति उभयोः कर्त्रोः लेनाभिधानम्प्राप्नोति। प्रत्ययार्थविशेषणसत्त्वेन दोषः। प्रधानकर्तरि लादयो भवन्ति। प्रधानकर्त्ता लेनाभिधीयते। यश्चात्राप्रधानं सिद्धा तत्र तृतीया कर्त्तरीत्येव[20]" इत्युक्तम्। अत्र प्रधानकर्त्ता लेनाभिधीयत इत्युक्त्या प्रधानाऽप्रधानसन्निधौ

---

[20] तत्रैव.

प्रधानकार्यस्य बलवत्त्वं सूचितम्। ततोऽग्रे प्रत्ययार्थविशेषणत्वपक्ष एव पाचयत्योदनं देवदत्तो यज्ञदत्तेनेति प्रयोज्ये कर्त्तरि कर्मसंज्ञा प्राप्नोतीति शङ्कायामेवं समाहितम्।

गतिबुद्धिप्रत्यवसानार्थशब्दकर्मकाणामणीत्येतन्नियमार्थम्भविष्यति। एतेषामेवाण्यन्तानां यः कर्त्ता स णौ कर्मसंज्ञो भवति नान्येषामिति एवमुक्तम्भाष्ये। अत्र कैयटः– "ण्यर्थस्य प्राधान्यात्तेनेप्सितस्य प्रयोज्यस्य सिद्धा कर्मसंज्ञा। न च स्वव्यापारपेक्षया स्वातन्त्र्यात् परत्वात् कर्तृसंज्ञा प्राप्नोतीति युक्तं वक्तुम्। प्रयोज्यव्यापारस्याप्रधानप्रधान-व्यापारसन्निधौ च प्रधाननिमित्तस्य कार्यस्य युक्तत्वाभिन्ननियमेन तु प्रधानकार्यव्यावृत्तौ गुणनिमित्तकार्यसद्भावात् कर्त्तृत्वम्भवत्येव"[21] इति।

**नीवह्योः प्रतिषेधो वक्तव्यः॥**

यद्यप्येत्ययोः प्रापणमर्थो न तु गतिस्तथापि विशेषणतया गतिरपि वाच्यकोटिनिविष्टेत्येतावन्मात्रेण प्राप्तिं मत्वा प्रतिषेध उक्तः। नाययति वाहयति वा भारं देवदत्तेन। वहेरनियन्तृकर्तृकस्यैव प्रतिषेधः। नियन्तृकर्तृकस्य प्रयोज्यः कर्मेति वक्तव्यमिति फलितोऽर्थः। वहन्ति वाहाः वाहयति वाहान् रथिनं सूतः। या प्रापणे इत्यत्र तु गतिरेव प्रापणशब्दार्थः। याति गच्छतीत्येकार्थप्रतीतेः। तेन कालं पाचयति इत्यादौ प्रयोज्यस्य कर्मता बोध्या। बुध्यर्थग्रहणेन ज्ञानसामान्यवाचिन एव गृह्यन्ते न तु तद्विशेषवाचिनः स्मरत्यादयः। अत एव श्रुदृशोरुपसङ्ख्यानं करिष्यते। बोधयति माणवकं धर्मम्। प्रत्यवसानं भक्षणम्। भोजयति आशयति माणवकमोदनम्।

प्रापणं हि प्राप्त्यानुकूलव्यापारानुकूलव्यापारः। प्राप्तिश्च सम्बन्धमात्रन्न तु संयोग एव। सुखम्प्राप्तो विद्याम्प्राप्तः इत्यादौ संयोगाभावेऽपि प्राप्तिव्यवहारादिति भावः। अत एव

---

[21] तत्रैव.

प्राप्तर्थकस्य गत्यर्थकत्वाभावादेव इत्येवेति एव अत्र गत्यर्थत्वाभावेन नियमेन कर्मत्वाप्राप्तेः। ध्वनितं “न गति[22]” इति। तत्र ह्युक्तं न हृक्रोरित्युभयत्र विभाषेत्युक्त्वा प्राप्तेऽभ्यवहरतिमुदाहृत्याप्राप्ते हरति भारं देवदत्तो हारयति भारं देवदत्तम् इत्युक्तम्। अत्राप्राप्त इत्यनेन प्राप्तर्थस्य गत्यर्थत्वाभावः सूचित एव। नन्वेवन्नीवह्योर्नेत्यनेन नयतेरण्यन्तावस्थायां यः कर्त्ता तस्य ण्यन्तावस्थायां कर्मसंज्ञाप्राप्तिरेव नेति नीग्रहणं व्यर्थमत आह– नयतेस्त्विवति तस्यापि न गत्यर्थत्वमिति नीग्रहणमुक्तनियम-लब्धाप्राप्त्यानुवाद इति ।

**आदिखाद्योः प्रतिषेधो वक्तव्यः॥**

कुत्राचिद् आदि इति ण्यन्तस्यानुकरणं कृत्वा पाठस्त्वसङ्गत एव, धातुनिर्देशे ‘इक्’ प्रत्ययोत्पत्तेः। गतिबुद्धीति प्रत्यवसानार्थत्वेन भक्षणार्थत्वेन प्राप्तकर्मसंज्ञानिषेधकमिदं वार्त्तिकम्। “अद् भक्षणे” इत्यत्र गलबिलाधःसंयोगानुकूलव्यापाररूपं भक्षणम्। एवं “खादृ भक्षणे” इत्यत्रापि बोध्यम्। आदयति खादयति वा अन्नं बटुना। बटुरन्नमत्ति, खादयति वा, तं कमलेशः, रमेशो वा प्रेरयति इत्यर्थेः ण्यन्तस्य गलबिलाधःसंयोगानुकूलव्यापारार्थकत्वेन प्रथमव्यापाररूपफलाश्रयत्वेन बटोः प्राप्तकर्मत्वबाधेन प्रयोज्य कर्तरि कर्तृकरणयोरिति तृतीया। गतिबुद्धिसूत्रस्य नियमार्थत्वे तु कर्तुरीप्सिततममिति कर्मत्वनिषेधकमिदम्। ननु निगरणचलनार्थेभ्यश्च इति परस्मैपदनियमप्रवृत्त्या आदयते इति भाष्यम्, इति चेन्न, तस्य अदेः प्रतिषेधः निषेधात्। तथा च अकर्त्रभिप्राये क्रियाफले शेषात् इति परस्मैपदम्, कर्त्रभिप्राये तु ‘णिचश्च’ इति आत्मनेपदम्।

---

[22] पा. सू. १-३-१५.

**भक्षेरहिंसार्थस्य प्रतिषेधो वक्तव्यः॥**

हेतुमण्णिजन्ते विधिरिति प्रतिषेधोऽप्यणावित्ययं सन्निधानत्वाद् विषयः। तेन चुरादिणिजन्तेऽपि भक्षयतौ प्राप्तिसत्त्वात्प्रतिषेध उपसङ्ख्यातः। भक्षयत्यन्नं बटुना। अहिंसार्थस्येति किम्। भक्षयन्ति बलीवर्दाः सस्यम्। भक्षयति बलीवर्दान् सस्यम्। क्षेत्रस्थानां यवानां भक्ष्यमाणानां हिंसा द्रष्टव्या, तस्यामवस्थायान्तेषां चेतनत्वाभ्युपगमात्। शब्दः कर्मकारकं येषान्ते शब्दकर्मणः, न त्विह "कर्तरि कर्मव्यतिहारे" (अष्टा. सू. १-३-१४) इत्यत्र कर्मशब्दः क्रियापरः, गतिबुद्धिप्रत्यवसानशब्दार्थेति वक्तव्येऽर्थशब्दात्कर्मशब्दस्य पृथगुपादानात् अध्यापयति पाठयति माणवकं वेदम्।

हिंसाङ्गे भक्षणे भक्षेर्वृत्तिः। परकीयसस्यभक्षणे परो हिंसितो भवतीति। तत्स्वामिनोऽत्र हिंसा द्रष्टव्या। हिंसाङ्ग इति बहुव्रीहिः। हिंसा दुःखोत्पत्त्यनुकूलो व्यापारः साऽङ्गं फलं यस्येत्यर्थः।

**जल्पतिप्रभृतीनामुपसंङ्ख्यानम्॥**

जल्पयति विलापयति आभाषयति पुत्रं देवदत्तः।

जल्पयतीति पुत्रो धर्मं जल्पति तद्बोधकवाक्यानि कथयति। देवदत्तो जल्पयति धर्मं पुत्रमित्यर्थः।

**4.9. ह्रक्रोरन्यतरस्याम् (१-४-५३)।**

"हा च का चेति विग्रहः। हृश्च क्रुश्चेति वा। अनयोरणौ कर्त्ता णौ वा कर्म स्यात्। "न वेति विभाषा"[23] सूत्रे उभयत्रविभाषास्विदं वार्त्तिककृता पठितम्। तथाहि, अभ्यवहारयति

[23] पा. सू.

माणवकमोदनं माणवकेन वा इत्यत्र प्रत्यवसानार्थत्वात्प्राप्ते विकुर्वते छात्राः, विकारयति छात्रान् छात्रैर्वा इत्यत्राकर्मकत्वात्प्राप्ते इतरत्र त्वप्राप्ते विभाषेयम्।"[24]

"तत्राभ्यवपूर्वस्य हरतेर्भक्षणार्थत्वाद् विकारार्थरोतेश्चाकर्मकत्वात् प्राप्ते, अर्थान्तरे चाप्राप्ते उभयत्र विभाषेयम्"[25]। हृक्रोः सकर्मकत्वात् हृक्रोरिति सूत्रस्योभयत्र विभाषात्वव्यवहारानुपपत्तिरत आह-तत्राभ्यवेति। अभ्यवहारयति सैन्धवान् इत्यादौ। करोतेश्चाकर्मकत्वादिति- विकारयति सैन्धवान् इत्यादौ। अर्थान्तरे हरणार्थक-हरतेरुत्पत्त्यनुकूलव्यापारार्थककरोतेश्च प्रयोगे।

**अभिवादिदृशोरात्पनेपदे वेति वक्तव्यः॥**

"अभिवादयतेरप्राप्तिविभाषा। दृशेस्तु बुद्ध्याद्यर्थत्वादुपसङ्ख्यानाद्वा प्राप्ते। अभिवादयति गुरुं देवदत्तः, अभिवादयते गुरुं देवदत्त देवदत्तेन वा। "णिचश्च"[26] इत्यात्मनेपदम्। परस्मैपदे तु "अभिवादयति गुरुं देवदत्तेन"। दर्शयते राजानं भृत्यान् भृत्यैर्वा। कर्मसंज्ञाभावपक्षे कर्मान्तरस्याभावात् "णेरणौ"[27] इत्यात्मनेपदमन्यत्र तु "णिचश्च"[28] इतीति प्राञ्चः। वस्तुतस्तु "णिचश्च" इत्येव युक्तम्। "णेरणौ" इत्यस्य तु नायं विषयः, णिज्वाच्यप्रयुक्तिभेदादिति तत्रैवोपपादितम्।"[29]

---

[24] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. १३८.

[25] ल. श. शे., का. प्र., सम्पा. तेजपालः शर्मा, पृ. १२९.

[26] पा. सू. १-३-७४.

[27] पा. सू. १-३-६७.

[28] पा. सू. १-३-७४.

[29] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. १३९.

'अभिवादिदृशोः' इत्यस्य व्याख्यानावसरे "वद सन्देशवचने" इति धातोराधृषीयस्यायं निर्देश इत्याह तन्नेति सूचयन्नाह– हेतुमण्ण्यन्तस्येति। हेतुमण्ण्यन्तस्याभिवादे दृशिप्रकृतिण्यन्तस्य चेत्यर्थः। तेन "अभिवदति गुरुं देवदत्तः। अभिवादयति गुरुं देवदत्तम्"[30] इति भाष्यप्रयोगस्योपपत्तिः।

### 4.10. स्वतन्त्रः कर्ता (१-४-५४)।

क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्। स्वम्– आत्मा, तन्त्रम्– प्रधानम् अस्येति स्वतन्त्रः। एवं च अन्य-अनधीनत्वरूपप्रधानार्थकस्वतन्त्रशब्दः। धातूपात्तव्यापाराश्रयत्वं स्वातन्त्र्यम्।

आह च हरिः–

**धातुनोक्तक्रिये नित्यं कारके कर्तृत्वेष्यते।**

**स्थाल्या पच्यते इत्येषा विवक्षा दृश्यते यतः॥**[31] इति।

कर्मकर्तर्यप्यस्तीदम्। फलव्यापारयोर्वैयधिकरण्यमात्रस्य पचावौत्सर्गिकस्य परं त्यागः। विशकलितशक्तिपक्षे विशिष्टशक्तिपक्षे चेदं तुल्यम्। निवृत्तप्रेषणं कर्म स्वक्रियावयवे स्थितमिति पक्षे तु प्रधानभूतधात्वर्थ एवेह क्रिया, धातुत्वं तु भूतपूर्वभावनार्थत्वात्। एतेन कारकाणां क्रियान्वयनियमोऽपि द्वेधा व्याख्यातः। देवदत्तः पचति। स्थाली पचति। अनन्यलभ्यस्य शब्दार्थत्वादाश्रयो लकारार्थः। देवदत्तेन पच्यते।

---

[30] महा. भा., द्वि. ख., सम्पा. भार्गवशास्त्री जोशी, पृ. २७७.

[31] हरिप्रवचनमात्रम्, प्रकृष्टरूपेण नास्ति कुत्रापि.

देवदत्तरूपो य आश्रयस्तद्विशिष्टो विक्लित्त्यनुकूलव्यापार इत्यर्थः। वैशिष्ट्यं चाधेयतारूपं संसर्गमर्यादया भासते।[32]

कारकाधिकारात् क्रियाजनने स्वतन्त्र इत्यर्थः। तदाह– क्रियायामिति। 'विवक्षितोऽर्थः' इत्यत्र विवक्षाधीनत्वं कर्तृत्वकर्मत्वादिकं न हि निश्चप्रचमिति भावः। कर्तृकर्मादिसंज्ञा प्राचीनवैयाकरणवृत्तिः अत्रापि स्वीकृतास्ति। स्वतन्त्रमन्यानधीनव्यापाराश्रयपरम्। स च व्यापारो न शब्दवाच्यः, किन्तु कारकाधिकारादुपस्थितक्रियारूप इत्याह– कारकाधिकारादिति।

स्वातन्त्र्यञ्च कर्तृप्रत्ययसमभिव्याहारे प्रधानीभूतधात्वर्थाश्रयत्वम्। कमलेशः पुस्तकं पठति। रमेशः विद्यालयं गच्छति इत्यादौ कर्तृसंज्ञया प्रथमाविभक्तिः। पक्वस्तण्डुलो देवदत्तेनेत्यत्र फलस्य प्राधान्येऽपि देवदत्तस्य कर्तृत्वसिद्धये कर्तृप्रत्ययसमभिव्याहारे इति।

णिचस्तु वाचकत्वमेव। अतस्तत्र ण्यन्तधातुतत्प्रकृतिधातु-एतदुभयवाच्यव्यापारयोः स्वस्वार्थं प्रति प्राधान्यारद् देवदत्तेन यज्ञदत्तः पाचयति इत्यादौ प्रयोज्यव्यापाराश्रयस्यापि कर्तृत्वसिद्धिः। द्योतकत्वे तु नैतत् सिध्येत्।

"कारके"[33] इति सूत्रभाष्यात् स्वक्रियाकारकप्रवर्त्तकत्वे स्वातन्त्र्यमिति लभ्यते प्रकृतसूत्रभाष्याच्चेति *मञ्जूषायां* निरूपितम्।

---

[32] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. १३९.

[33] पा. सू. १-४-२३.

### 4.11. तत्प्रयोजकहेतुश्च (१-४-५५)।

"तत्र निर्वर्त्यं यथा- घटं करोति तस्य कर्तुः प्रयोजको हेतुसञ्ज्ञः स्याच्चात्कर्तृसञ्ज्ञः। संज्ञासमावेशार्थश्चकारः। कुर्वन्तं प्रेरयति कारयति हरिः। हेतुत्वात्तद्व्यापारे "हेतुमति च"[34] इति णिच्। कर्तृत्वात्कर्तरि लकारः।"[35]

पूर्वसूत्रस्य प्रयोज्यस्य स्वातन्त्र्यमुपपादितुं तत् किमर्थं चेत् सूत्रमिदम् एवं मन्यते प्रैषादूर्ध्वं प्रयोज्यस्य स्वव्यापारे प्रवर्तनात् स्वातन्त्र्यम्। प्रैष्यकाले तु स्वव्यापाराप्रवर्तनात् प्रवृत्तौ प्रैषवैयर्थ्यात् स्वातन्त्र्यं नास्ति। तस्य च प्रयोजको न हेतुः स्यात्। ततश्च नात्र णिज् भवेत्। शेषषष्ठ्या समासः। प्रवर्त्तनात् स्वातन्त्र्यमित्यस्यास्तु नामेति शेषः। प्रयोजकसन्निधौ पारतन्त्र्येण स्वातन्त्र्यस्य तिरस्कृतत्वात् यौगपद्यानुपपत्तिरिति भावः।

## अध्यायसमीक्षणम्

"अधिकरणात् कर्तृकारकपर्यन्तं समीक्षणम्" इति चतुर्थाध्याये अस्मिन् आदौ आधारोऽधिकरणम्[36] इति सूत्रे अधिकरणस्य विषये चर्चा विहिता, तत्र अधिकरणस्य कथं अन्वयः भवति, तत्र श्रीमद्भट्टोजिदीक्षितस्य मतं अधिकरणकारकस्य स्ववृत्तिवृत्तित्वरूपपम्परासम्बन्धेन साक्षादेव क्रियायामन्वय इति स्वीकुर्वन्ति। यथा देवदत्तः कटे आस्ते इत्यत्र स्वम्– अधिकरणम्, तद्वृत्तित्वं कर्तुः, तद्वृत्तित्वं कर्मणः, तद्वृत्तित्वं च क्रियायाम्। परन्तु नवीनाः श्रीमन्नागेशभट्टप्रभृतयः न साक्षादधिकरणकारकस्य

---

[34] पा. सू. ३-१-२६.

[35] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. १३९.

[36] पा.सू. १-४-४५.

क्रियायामन्वयं स्वीकुर्वन्ति। अपि तु परम्परयैव क्रियायामन्वयं स्वीकुर्वन्ति। तेषां मते तु अधिकरणस्य स्ववृत्तित्वरूपसम्बन्धेन साक्षात् कर्तृकर्मणोरेवान्वयः तद्द्वारा च तस्य क्रियायामन्वयः। वस्तुतः प्राचीनाः क्रियान्वयत्वम् इति वदन्ति। नवीनानां नये तु जनकत्वं यत् परम्परासम्बन्धेन समन्वयः इत्येव विमर्शः। अत्र स्वस्वदृष्ट्या उभययोः मतं साधु इति मे मतिः। ततः अधिशीङ्स्थासां कर्म[37], अभिनिविशश्च[38] इति सूत्रद्वयं *महाभाष्य*कारेण प्रत्याख्यातम्, अतः श्रीमन्नागेशभट्टेन *उद्द्योते* एतस्मिन् विषये किमपि न उक्तम्। कर्तुरीप्सिततमं कर्म[39] इत्यादिसूत्रेऽपि व्यापारेण क्रियाफलशालित्वम् अर्थात् फलस्य कर्मसंज्ञात्वेन बोधः प्राचीनानां मते, किन्तु नवीनाः तद्धात्वर्थजन्यत्वे सति कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वम् इत्येव आशयं स्वीकुर्वन्ति। ततः अकथितञ्च[40] इति सूत्रे द्विकर्मकधातूनां विषये आचार्यः नागेशः कथयति भिक्ष-धातुः यदि अनुनयः इति अर्थे 'अविनीतं विनयं भिक्षते' इति प्रयोगः स्यात्, तेन अत्र एवं वक्तव्यम्, याच्-धातुः भिक्ष-धातुः चेति उभययोः उभयार्थकः अतः कर्मसंज्ञा अपि प्राप्नोति, तदर्थं भाष्यकारस्य श्लोके समानार्थकरूपेण धातोः ग्रहणं नैव आवश्यकमिति वदति।

किन्तु आचार्यः भट्टोजिदीक्षितः अर्थाश्रयं स्वीकरोति, केवलं ग्रह्-धातोः द्विकर्मकत्वं नैव स्वीकरोति। अतः "जग्राह द्युतरुंशत्रुम्" इत्यत्र "अकथितञ्च" इति सूत्रेण ग्रह्-धातोः

---

[37] पा.सू. १-४-४६.

[38] पा.सू. १-४-४७.

[39] पा.सू. १-४-४९.

[40] पा. सू. १-४-५१.

असाधुप्रयोगः इति मनोरमायाम्। किन्तु यदि 'दुह्-याच्......' इत्यस्मिन् श्लोके ग्रह्-धातोः पाठः स्यात् तर्हि कथं ग्रह्-धातोः द्विकर्मकता न इत्येव चिन्तनीयम्।

यद्यपि प्राचीनवैयाकरणः श्रीमद्भट्टोजिदीक्षितः *महाभाष्यस्य* सारभूतग्रन्थे *शब्दकौस्तुभे* स्वमतं प्रतिपादयति, किन्तु नवीनाचार्यः श्रीमन्नागेशोऽपि स्वयुक्त्या प्रकटयति। अत्र केषां मतं साधु केषां मतम् असाधु इति स्पष्टं वक्तुं न शक्यते तथापि विचार्यमाणे उभयत्र मम समर्थनमस्ति इति शिवम्।

# पञ्चमोऽध्यायः

## विभक्त्यर्थप्रथमाह्निकविमर्शः

### 5.1. अनभिहिते (२-३-१)।

इदमधिकारसूत्रम्। तिङ्कृत्तद्धितसमासैश्च कर्मादीनामर्थानाम् अनुक्तौ सत्यां द्वितीयादयो विभक्तयः भवन्ति इत्यर्थः। अतः *शब्दकौस्तुभे* आचार्येण भट्टोजिदीक्षितेन प्रोक्तं– "तिङ्कृत्तद्धितसमासैरिति वक्तव्यम् (का.वा.)। तेन तिङाद्युक्ते कर्मणि द्वितीया न"।[1] अपि च प्रोक्तं– "अभिहिते कर्मणि प्रातिपदिकार्थमात्र इति प्रथमैव। अभिधानं च प्रायेण तिङ्कृत्तद्धितसमासैः"।[2] तिङा कर्मणि अभिधानं यथा– सेव्यते हरिः इत्यत्र सेव्-धातोः "लः कर्मणि च भावे चाकर्मकेभ्यः"[3] इति कर्मणि लकारः। भावकर्मणोरित्यात्मनेपदसंज्ञायां लट्-स्थाने तङ्। अत्र हरिरूपकर्म सेव्यते इत्यस्य तिङा उक्तम्, अतः हरिशब्दात् अभिहिते प्रथमा इत्येव भवति। कृता कर्मणः अभिधानं यथा– लक्ष्म्या सेवितः हरिः इत्यत्र सेव्-धातोः भूते कर्मणि क्त-प्रत्ययो भवति। कृता क्त-प्रत्ययेन कर्मणः उक्तत्त्वात् न भवति हरिरूपकर्मणो द्वितीया, अपि तु प्रथमैव भवति। कृता च लक्ष्मी इति। कर्तुः अनुक्तत्त्वाद् अनुक्ते कर्तरि कर्तृकरणयोस्तृतीया इति तृतीया भवति। अस्माद् वाक्यात् लक्ष्मीनिष्ठपरिचरणजनिततुष्ट्याश्रयः हरिः इति प्रथमान्तविशेष्यकः शाब्दबोधः भवति। यतो हि "सत्त्वप्रधानानि नामानि"[4] इति यास्कवचनात् प्रातिपदिकेषु प्रथमान्तोपात्तविशेष्यकबोध

---

[1] श. कौ., द्वि. ख., पा.सू. २-३-१, सम्पा. गोपालशास्त्री, पृ. २२०.

[2] वै. सि. कौ., पा.सू. २-३-२.

[3] पा.सू. ३-४-६९.

[4] निरुक्ते, १/१.

एव स्वीक्रियते। तद्धितेन कर्मणः अभिधानं यथा– शतेन क्रीतः शत्यः पटादिः इत्यत्र शत-शब्दात् "शताच्च ठन्यतावशते"[5] इति तद्धितः यत्-प्रत्ययः भवति। अत्र पटादिरूपकर्मणः यत्-प्रत्ययेन तद्धितेन अभिधानम्। अतः कर्मणि उक्ते सति अभिहिते प्रथमा इति प्रातिपदिकार्थमात्रे प्रथमा भवति, न तु कर्मणि द्वितीया इति द्वितीया। समासेन कर्मणः अभिधानं यथा– प्राप्तः आनन्दः यं सः प्राप्तानन्दः देवदत्तादिः इत्यत्र यम् इति अन्यपदार्थः कर्म। अन्यपदार्थे कर्मणि "अनेकमन्यपदार्थे"[6] इति बहुव्रीहिसमासो भवति। समासेन कर्मणः उक्तत्त्वाद् प्राप्तानन्द इत्यस्मात् न भवति द्वितीया, अपि तु प्रथमैव। शाब्दबोधस्तु आनन्दकर्तृप्राप्तिकर्मीभूतो देवदत्तादिरिति।

ननु 'बहुपटुः' इत्यत्र बहुचा उक्तत्वेन यथा कल्पप् न भवति तथैव क्रियते कटः इत्यादावपि तिङादिभिरुक्तत्वाद् द्वितीया न भविष्यति। किञ्च कटं करोति इत्यत्र सावकाशा द्वितीया 'कृतः कटः' इत्यादौ प्रथमया बाधिष्यते, निरवकाशत्वात्। न च वृक्षः इत्यादिरवकाशः, तथापि प्रतीयमानामस्तिक्रियाम्प्रति कर्तृत्वेन तृतीयाप्रसङ्गात् इति।

एवञ्च अनभिहिताधिकारः व्यर्थः, इति चेत् मैवम्। संख्या विभक्त्यर्थः इति पक्षे सूत्रारम्भात्। तथा च अनभिहिते कर्मणि यदेकत्वं तत्र द्वितीयैकवचनमित्यर्थः। अनभिहिते इति सूत्राभावे कर्मणि यदेकत्वं तत्र द्वितीयैकवचनमिति वाक्यार्थस्तथा इति 'कृतः कटः' इत्यादौ क्तेन कर्ममात्रोक्तावपि तदेकत्वस्यानुक्ततया अम् दुर्वारः। परत्वात् प्रथमा इत्यपि न, ततोऽपि परत्वात् कृद्योगलक्षणषष्ठीप्रसङ्गात्। कारकं विभक्त्यर्थः इति पक्षे सूत्रमिदं भाष्ये प्रत्याख्यातम्।

---

[5] पा.सू. ५-१-२१.

[6] पा.सू. २-२-२४.

तथा च *उद्द्योते* प्रोक्तम्– "उक्तार्थानामिति न्यायः शास्त्रोपात्तप्रधानार्थविषय एव, कारकस्य प्राधान्येन तत्त्वे तु व्यर्थम्। ननु तदपि द्योतकसमावेशस्य दृष्टत्वात् 'कृतः कट' शत्यादौ क्रियते 'कट' इत्यादौ च तद्वारणाय च आवश्यक इति चेन्न। आद्ये विशेष्यत्वेन भानेन तस्य द्योत्यत्वासंभवात्। अन्त्ये क्रियां प्रति तस्य विशेषणत्वेऽपि कटपदार्थे तत्त्वाभावेन तदुत्तरद्वितीयाद्योत्यताया असम्भवाच्चेति दिक्"।[7]

'विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुम् असाम्प्रतम्' इति वाक्ये विषवृक्षोऽपि इति पदम् 'असाम्प्रतम्' इत्यनेन सह अन्वेति, न तु संवर्ध्य इत्यनेन, छेत्तुमित्यनेन सह, तथा अन्वये सति विषवृक्षशब्दात् द्वितीया स्यात्।

'विषवृक्ष' इत्येतद् पदं कर्म, किन्तु असाम्प्रतम् इति निपातेन विषवृक्षरूपकर्मणः अर्थस्य अभिधानं जायते, अतः तस्माद् द्वितीया न भवति, अपि तु प्रथमैव भवति। यतो हि 'असाम्प्रतम्' इत्यत्र साम्प्रतम् इत्यस्यार्थः उचितः औचित्ययुक्तः इत। युक्ते द्वे साम्प्रतम् इति कोशवचनम्। न साम्प्रतम् असाम्प्रतमिति नञ्-समासः। तथा च– विषवृक्षोऽपि सम्बर्द्ध्य स्वयं छेत्तुम् उचितः औचित्ययुक्तः न भवति इत्यर्थः। तत्र वृक्षस्य कर्मणः निपातेन न भवति वृक्षशब्दाद् द्वितीया, अपि तु प्रथमैव। दीक्षितस्तु साम्प्रतमित्यस्य युज्यते इत्यर्थम् आह। तथा सति– युज्-धातोः कर्मवाच्ये लट्-स्थाने तिङि कृते तेनैव तिङा वृक्षरूपकर्मणः अर्थस्य अभिहितत्त्वात् तत्र प्रथमा भवितुमर्हति। जनः इति कर्तुः अध्याहारं कृत्वा विषवृक्षम् अपि सम्बर्द्ध्य स्वयं छेत्तुं न युनक्ति (जनः) इति कर्तृवाच्ये भविष्यति। पुनः कर्मवाच्ये विषवृक्षोऽपि सम्बर्द्ध्य स्वयं छेत्तुं न युज्यते– असाम्प्रतम् (जनैः) इति भवति। अत्र निपातेनाभिधानाभावादपि तिङैवाभिधानात् प्रथमा स्यादतः प्रायेण इति पदं निष्फलम्।

---

[7] महा. भा. उ., द्वि. ख., पा.सू. २-३-१, सम्पा. भार्गवशास्त्री जोशी, पृ. ४८६.

नागेशस्तु छेत्तुमित्यत्र तुमुनः साधुत्वाय इष्यते इत्यध्याहृत्य विषवृक्षोऽपि सम्बर्ध्य छेत्तुम् इष्यते इति यत्, तत् असाम्प्रतम्– अयुक्तम् इत्याह। एवञ्च तिङैव कर्मणः अभिधानाद् द्वितीया न स्यात् अत्र, अतः परिगणवाक्ये प्रायेण इत्यस्य अध्याहारो विफलः इति *शब्देन्दुशेखरे* लिखितम्।

“अनभिहिते”[8] इत्यस्मिन् सूत्रे यः प्रतिधेषः, सः पर्युदास एव, न तु प्रसज्यः। तथा च उक्तं *शब्दकौस्तुभे*– “आरब्धे तु सूत्रे पर्युदासोऽयं, न तु प्रसज्यप्रतिषेधः, असमर्थसमासापत्तेः वाक्यभेदापत्तेश्च। प्रासादे आस्ते इत्यत्र सदिक्रियाया आसिक्रियायाश्चैकमधिकरणं प्रासादाख्यं, तच्च सदेः परेण यञा अभिहितमिति सप्तमीनिषेधापत्तेश्च। पर्युदासे तु आसिक्रियानिरूपितमाधिकरणशक्तिमनभिहितामाश्रित्य सप्तमीविधिः प्रवर्त्तते। आसने आस्ते, शयने शेते इत्यादौ तु लटः प्रकृतिभ्यां क्रियोपस्थितौ तद्योग्यम् अनुद्भूतशक्तिकं वस्तुमात्रं कृता उच्यते। तस्य च वर्त्तमानैककर्कृकतिङ्कृत्युपस्थाप्यक्रियानिरूपितशक्त्युद्भवप्रतिपादनाय सप्तमीति दिक्”[9]। यदि प्रतिषेधोऽयं पर्युदासः स्यात् तर्हि पक्त्वौदनो भुज्यते इति न सिद्ध्येत्। भुञ्जिप्रत्ययेन अभिहितेऽपि ओदने क्त्वाप्रत्ययेन अनभिधानम् आश्रित्य द्वितीयापत्तेः।

श्रीमता भट्टोजिदीक्षितेन उच्यते– “प्रधाननिरूपितशक्त्यभिधाने प्रथमैव, अभिहिते नेति प्रसज्यप्रतिषेधात्। आसने आस्ते, शयने शेते इत्यत्र तु न प्रधानशक्तेरभिधानं, येन प्रथमा स्यात्”।[10]

---

[8] पा. सू. २-३-१.

[9] श. कौ., द्वि. ख., पा. सू. २-३-१, सम्पा. गोपालशास्त्री, पृ. २२१.

[10] तत्रैव.

वाक्यपदीयकारः भर्तृहरिरपि प्राह–

**“प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्।**

**शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते”॥**[11]

**“प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते।**

**यदा गुणे तदा तद्वदनुक्तापि प्रतीयते”॥**[12]

अर्थाद् यत्र एकस्य द्रव्यस्य कृते प्रधानेतरयोः द्वयोः क्रिययोः उपस्थितिः, तत्र गुणाश्रया शक्तिः अर्थाद् अप्रधानक्रियानिरूपितकर्मत्वमपि प्रधानक्रियाम् अनुसरति। अतः प्रधानक्रियया अभिहिताद् अनभिहिताद् गौणशक्तेरपि अभिहितत्वम् अनभिहितत्वं वा स्वीक्रियते। पुनश्च यदा लकारेण प्रधानक्रियानिरूपितकर्मत्वशक्तिः प्रकाशते तदा गुणक्रियानिरूपितकर्मत्वशक्तिः अनुक्ताऽपि अभिहितवद् प्रकाशते। अत्र दृष्टान्तस्तावद्– ‘इष्यते ग्रामो गन्तुम्’। अत्र उभे कर्मणी, गमेर्ग्राम एवेति ग्रामस्येषिविषयायां कर्मशक्तौ अभिहितायां ग्रामविषयापि तद्वत् प्रकाशते। गमनार्थमेषणम्। तथा च क्रियायां क्रियार्थायाम् उपपदे तुमुन् इति फलभूता अत्र गमिक्रिया प्रधानं नेषिरिति शङ्कायाम् अयं दृष्टान्तः। ‘पक्त्वा भुज्यते’ इत्यत्रापि त्वार्थमपि प्राधान्यं वर्तते, पाकस्य भोजनार्थत्वात्।

## 5.2. कर्मणि द्वितीया (२-३-२)।

कर्मवाचकाद् शब्दाद् द्वितीया इत्यर्थः। कर्मवाचकादित्युक्ते क्रियाजन्यफलाश्रयवाचकाद् इति। किञ्च द्वितीयायाः आश्रयरूपः अर्थः, फलस्य

---

[11] वा. प., सा. समु., का. ८१.

*वा. प., सा. समु., का. ८२ इत्यत्र ‘प्रतीयते’ इत्यस्य स्थाने पाठान्तरं ‘प्रकाशते’ इति वर्तते।

धातुलभ्यत्वात्। 'हरिं भजति' इत्यत्र तिङन्ते भज्-धातोः अर्थः तुष्ट्यनुकूलसेवात्मकव्यापारः। पूजादिक्रियया हरिं तोषयतीत्यर्थो भवति 'हरिं भजति' इत्यस्य वाक्यस्य। अत्र देवदत्तः इति कर्तुः अध्याहारो विधेयः। देवदत्तकर्तृनिष्ठपूजनादिव्यापारजन्यतुष्टिरूपफलस्य आश्रयो हरिः, कर्म विद्यते। तस्माद् द्वितीया भवति।

**"उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।**

**द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते"।।**[13] इति।

अर्थाद् उभशब्दप्रकृतिकतसन्तस्य सर्वशब्दप्रकृतिकतसन्तस्य च प्रयोगे द्वितीया करणीया, धिक्-शब्दस्य प्रयोगे चापि द्वितीया कर्तव्या। द्विरुक्तस्य परं रूपम् आम्रेडितमित्युच्यते, "तस्य परमाम्रेडितमि"ति[14] सूत्रेण। आम्रेडितान्तेषु– कृतद्विर्वचनेषु, उपर्यादिषु त्रिषु– उपरि उपरि, अधि अधि, अधः अधः इत्येतेषु प्रयुज्यमानेषु द्वितीया कर्तव्या। "उपर्यध्यधसस्सामीप्ये"[15] इति सूत्रोक्तानि उपरि अधि अधः इत्येतानि अव्ययानि अत्र स्वीक्रियन्ते। ततोऽन्यत्रापि– उक्तप्रदेशात् भिन्नस्थलेऽपि द्वितीया दृश्यते।

उभशब्देन अत्र उभयशब्दः लक्ष्यते, अन्यथा तसिलसम्भवात्। 'उभयतः कृष्णं गोपाः'। कृष्णस्य उभयोः पार्श्वयोः गोपाः वर्तन्ते इत्यर्थः। 'सर्वतः कृष्णं गोपाः'। कृष्णस्य सर्वेषु भागेषु गोपाः विद्यन्ते इत्यर्थः। धिक् इत्यत्र सप्तम्या लुक्, प्रकृतिवदनुकरणाद् (प.भा.) इति अतिदेशात्। धिगिति निन्दायामर्थे वर्तते। 'धिक् कृष्णाभक्तम्'। कृष्णाभक्तस्य निन्दा इत्यर्थः। 'उपर्युपरि लोकं हरिः'। लोकस्य समीपे उपरि हरिः अस्तीत्यर्थः। उपरि

---

[13] महा. भा., श्लो. वा., पा.सू. २-३-२, सम्पा. भार्गवशास्त्री जोशी, पृ. ४८७.

[14] पा. सू. ८-१-२.

[15] पा. सू. ८-१-७.

इत्यस्य “उपर्यध्यधसस्सामीप्ये”[16] इत्यनेन सूत्रेण सामीप्ये अर्थे द्वित्वं भवति। ‘अध्यधि लोकं हरिः’। हरिः लोकस्य समीपदेशे वर्तते इत्यर्थः। ‘अधोऽधो लोकं हरिः’। लोकस्य समीपे अधोदेशे हरिः विद्यते इत्यर्थः।

ततोऽन्यत्रापि इत्युक्तम्, तान् परिगणयति वृत्तिकारः भट्टोजिदीक्षितः– “अभितः परितः समयानिकषाहाप्रतियोगेऽपि”।[17] अभितः, परितः इत्यादीनां योगे द्वितीया कार्या। ‘अभितः कृष्णं गोपाः’। अभितः इत्यस्यार्थः उभयतः। ‘परितः कृष्णं गोपाः’। परितः इत्यस्यार्थः सर्वतः। “पर्यभिभ्याञ्च”[18] इत्यनेन सूत्रेण तसिल्-प्रत्ययः। समयानिकषाशब्दाभ्यां समीपपर्यायौ भवतः। ‘ग्रामं समया निकषा वा’। हा इति अव्ययं खेदे विषादे च वर्तते। *शब्दकौस्तुभे* प्रोक्तञ्च– “हृ-शब्दः शोकवृत्तिः”।[19] ‘हा कृष्णाभक्तम्’। कृष्णाभक्तस्य शोच्यते, कृष्णाभक्तः शोच्यः वा इत्यर्थः।

ननु ‘धिङ् मूर्ख’ इत्यत्र इत्यत्र द्वितीया न दृश्यते इति चेद्, उच्यते अत्र त्वाम् इत्यधिक्रियते। ‘मूर्ख! त्वां धिक्’ इति वाक्यं भवति। अथवा निषिद्धाचरणमित्यस्य अध्याहारः भवति।

‘बुभुक्षितं न प्रतिभाति किञ्चिद्’ इत्यत्र प्रति इत्युपसर्गयोगात् भा-दीप्तौ इति धातुः स्फुरणेऽर्थे विद्यते। अतः लक्षणादौ अर्थे प्रति इत्यस्य अविद्यमानत्वात् न तस्य

---

[16] पा. सू. ८-१-७.

[17] वै. सि. कौ., का. प्र., वार्त्तिकम्.

[18] पा. सू. ५-३-९.

[19] श. कौ., द्वि. ख., पा. सू. २-३-२, सम्पा. गोपालशास्त्री, पृ. २२४.

कर्मप्रवचनीयसंज्ञा भवति। इत्थं "कर्मप्रवचनीययुक्ते द्वितीया"[20] इत्यनेन गतार्थता न भवति। क्षुधापीडितस्य किमपि न स्फुरति इति वाक्यार्थः। प्रति इत्यस्य योगे बुभुक्षित-शब्दाद् द्वितीया भवति।

### 5.3. तृतीया च होश्छन्दसि (२-३-३)।

अत्र "कर्मणि द्वितीया"[21] इत्यस्मात् कर्मणीति अनुवर्तते। द्वितीयायां प्राप्तायां तृतीया विधीयते, चशब्दात् सापि भवति इत्यर्थः। *शब्दकौस्तुभे*ऽपि आह– "जुहोतेः कर्मणि तृतीया स्यात् द्वितीया च छन्दसि"।[22] उदाहरणं तावद्– 'यवाग्वाऽग्निहोत्रं जुहोति'। यवाग्वभिन्नं हविः अग्नौ प्रक्षिपति इत्यर्थः। यवागूशब्दात् तृतीया अग्निहोत्रशब्दात् च द्वितीया। अग्निहोत्रशब्दः हविर्वाचकः, जुहोतिश्च प्रक्षेपणम् इत्यर्थः।

अयम् अग्निहोत्रशब्दः ज्योतिषि अर्थेऽपि अस्ति, अग्निहोत्रं प्रज्वलितम् इति दर्शनात्। यदा यवागूशब्दात् तृतीया विभक्तिः भवति तदा अग्निहोत्रशब्दः ज्योतिषि अर्थे भवति, जुहोतिश्च प्रीणात्यर्थे भवति। अस्मिन् पक्षे उदाहरणवाक्यस्य यवाग्वाग्निं प्रीणयति इत्यर्थः। यदा यवागूशब्दात् द्वितीया विभक्तिः, तदा अग्निहोत्रशब्दः हविषि अर्थे वर्तते, जुहोतिश्च प्रक्षेपणे अर्थे वर्तते। अस्मिन् पक्षे वाक्यं भवति– यवागूमग्निहोत्रं जुहोति। यवागूहविः अग्नौ प्रक्षिपति इत्यर्थः।

---

[20] पा. सू. २-३-८.

[21] पा. सू. २-३-२.

[22] श. कौ., द्वि. ख., पा. सू. २-३-३, सम्पा. गोपालशास्त्री, पृ. २२४.

अत्र *उद्द्योत*कारः मीमांसकानां मतमुल्लिख्य आह– “यत्तु मीमांसका अग्निहोत्रशब्दस्य कर्मनामधेयत्वं तत्प्रख्यन्यायात् स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासायिति दर्शनाच्च। एवं च करणभूते होमे समानाधिकरणस्याग्निहोत्रस्य करणत्वात् तृतीयायां प्राप्तायां पक्षे द्वितीयार्थमिदम्। यवाग्वा अपि करणत्वादेव तृतीया सिद्धेति। तन्न सूत्रानुगुणम्, नापि भाष्यानुगुणं कर्मणीत्यनुवृत्तेः। पाणिनीयस्मृतेर्वचनरूपत्वेन जैमिनीयाया न्यायरूपत्वेन तद्बाधकताया अस्याभ्युचितत्वाच्च। एवं च यवाग्वाग्निहोत्रं जुहोतीत्यादिवाक्ये नामधेयत्वाभावः। अत एव यवागूमग्निहोत्रं जुहोतीत्यादिसिद्धिरिति दिक्”।[23] अतः अत्र वक्तुं शक्यते यत्, मीमांसकाभिमते *शब्दकौस्तुभ*कार-*उद्द्योत*कारयोः समं मतम् अस्ति।

### 5.4. अन्तरान्तरेण युक्ते (२-३-४)।

अन्तरा इति आकारान्तम् अव्ययपदमस्ति, न तु टाप्प्रत्ययान्तम्। अन्तरेण इत्यपि अव्ययं, न तु तृतीयान्तम्। तयोः द्वन्द्वे अन्तरान्तरेण इति। ताभ्यां युक्तः इत्यर्थे युक्तशब्देन समासे सप्तम्येकवचने अन्तरान्तरेणयुक्ते इति। “कर्मणि द्वितीया”[24] इत्यतः द्वितीयेति अनुवर्तते। अन्तरा इत्यस्यार्थो भवति मध्ये। अन्तरेण इत्यस्यार्थो भवति वर्जनं, विना, ऋते इत्यादि। अन्तरा, अन्तरेण इत्याभ्याम् अव्ययाभ्यां योगे द्वितीया स्यात्।

‘अन्तरा त्वां मां हरिः’। तव मम मध्ये साक्षिरूपः श्रीहरिरेव इत्यर्थः। ‘अन्तरेण हरिं न सुखम्’। जनानां हरिसाक्षात्कारं विना सुखं नास्ति इत्यर्थः। सूत्रे युक्तग्रहाणाद् ‘अन्तरा त्वां

---

[23] महा. भा., द्वि. ख., पा. सू. २-३-३, सम्पा. भार्गवशास्त्री जोशी, पृ. ४८८.

[24] पा. सू. २-३-२.

मां वा कृष्णस्य मूर्तिः' इत्यत्र कृष्णशब्दार्थेन सहान्तरापदार्थस्यानन्वयाद् कृष्णाद् न द्वितीया, किन्तु सम्बन्धे षष्ठी। 'अन्तरा त्वां माञ्च कमण्डलुः' इत्यत्र कारकविभक्तित्वेन प्रथमया बाधान्न कमण्डलुशब्दाद् द्वितीया। एवञ्च अन्तरान्तरेण युक्तानामप्रधानग्रहणं कर्तव्यमिति वार्तिकं न कार्य्यमिति। कमण्डलुरस्ति इति योज्यम्। तेन तिङ्बोध्यकर्तृकारकबोधकत्वेन तिङ्समानाधिकरणे प्रथमा, उपपदविभक्तेः कारकविभक्तिर्बलीयसी इति न्यायात्। *उद्द्योत*कारेणापि प्रोक्तं– "सर्वत्र सम्बन्धस्य किञ्चित्क्रियाकारकभावमूलत्वात् यथा स्वत्वं क्रयादिनिबन्धनमिति भावः। युक्तिरत्र शिथिला सर्वत्र प्रथमाया एवापत्तेर्युष्मदाद्यर्थेऽपि सत्ताकर्तृत्वस्याव्यभिचारात्। न चैवं सूत्राणां वैयर्थ्यं न्यायानुगतेऽर्थे किं कुर्मः। तस्माद्वचनमेवेदम्। अत एव नमस्यति देवानित्यत्रानेन न्यायेन द्वितीयां वक्ष्यति भाष्यकृत्। तत्र हि क्रियाकारकभावेनैवान्वयादित्यन्ये। न च विशेषेण संबन्धस्योद्भूततया प्रतीतेस्तत्रैव षष्ठ्यपवादत्वेन सम्बन्धार्थिकैव द्वितीयेति वाच्यम्। प्रथमापवादत्वस्यापि सम्भव इत्याशयात्। उपपदविभक्तेरिति वचनात्तु षष्ठ्यपवादत्वमेव न प्रथमापवादत्वमित्युत्तराशयः। प्रथमाया अपि कारकविभक्तित्वं क्रियाजनकेऽर्थे तस्या अपि विधानादिति बोध्यम्। तदुक्तम्– कमण्डलोः कर्तृत्वं तिङाभिहितमिति"।[25]

*शब्दकौस्तुभे* एका शङ्का उदिता– "टाबन्तेनान्तराशब्देन तृतीयान्तेनान्तरेणेत्यनेन च योगो कुतो न"[26]। अर्थात् टाप-प्रत्ययान्तेन अन्तराशब्देन तृतीयाविभक्त्यन्तेन अन्तरेणशब्देन योगे द्वितीया विभक्तिः किमर्थं न जायते तदोच्यते– "प्रतिपदोक्ततया तयोरेवेह ग्रहणात् परस्परसाहचर्याच्च। तद्यथा– गुरुभार्गवावित्युक्ते ग्रहयोरेव

[25] महा. भा. उ., द्वि. ख., पा. सू. २-३-४ 'अन्तरान्तरेण युक्ते', सम्पा. भार्गवशास्त्री जोशी.

[26] श. कौ., द्वि. ख., पा. सू. २-३-४, सम्पा. गोपालशास्त्री, पृ. २२४.

प्रतीतिर्नत्वाचार्यपरशुरामयोः। तेन किमनयोरन्तरेण गतेनेति सिद्धम्। किमनयोर्विशेषेण ज्ञातेनेत्यर्थः"।[27]

किमनयोः अन्तरेण गतेन इत्यत्र यः अन्तरशब्दः सः विशेषवाचकः। किम् अनयोः अन्तरेण इत्यस्यार्थः भवति विशेषेण ज्ञातेन। अत्र अन्तरेण इति तृतीयान्तं पदं, न तु अव्ययपदम्, अव्ययत्वाभावान्न तद्योगे द्वितीया भवति। न च "हलोऽनन्तराः संयोगः" (पा.सू. १-१-७ ) इति सूत्रे भाष्ये द्वयोरन्तरा कश्चिद् इति वाक्ये अन्तरायोगे द्वयोः इति पदे द्वितीयाभावात् भाष्यप्रयोगोऽसङ्गतः स्यादिति वाच्यं, ययोः मध्यतानिमित्तमवधित्वं निर्णीयते तत्रैव अन्तरायोगे द्वितीया भवति। यत्र तु न तन्निर्णयः तत्र सम्बन्धसामान्येऽर्थे षष्ठी एव भवति।

### 5.5. कालाध्वनोरत्यन्तसंयोगे (२-३-५)।

अनेकार्थकः कालशब्दः। कलयति नाशयति आयुः इति कालः 'कल संख्याने' इति पचाद्यत्। कालो दण्डधरः श्राद्धदेवो वैवस्वतोऽन्तकः इति समवाचकः कालशब्दः। तत्र कालस्य परमेश्वरस्वरूपत्वम् अथर्ववेदान्तर्गतं कालसूत्रं भर्तृहरिसिद्धान्तमूलभूतम्। कालव्यवहारस्य सर्वजनप्रसिद्धत्वेऽपि कालस्वरूपे विवदन्ते वादिनः। प्रकृतसूत्रे कालः कालवाचकः। अध्वा च मार्गवाचकः। अत्यन्तसंयोगः क्व भवेदित्याकाङ्क्षायां 'गुणक्रियाद्रव्यैः' इति औचित्यात् प्रतीयते। तथा च– गुणक्रियाद्रव्यैः सह कालाध्वनोः अत्यन्तसंयोगे सति कालाध्ववाचकशब्दाभ्यां द्वितीया स्यात्। मासं कल्याणी। मासं निरन्तरं मङ्गलवान् इत्यर्थः। मासमधीते। मासं यावत् निरन्तरमधीते इत्यर्थः। मासं गुडधानाः। मासे प्रतिदिनं निरन्तरं

---

[27] तदेव, पृ. २२५.

गुडधानाः वर्तन्ते इत्यर्थः। *शब्दकौस्तुभ*कारेण शङ्का उदिता– सूत्रे अत्यन्तसंयोगे इति पदस्य किं प्रयोजनम्, तदोच्यते– मासस्य द्वि अधीते। मासमध्ये द्वयोः दिनयोः अधीते इत्यर्थः। क्रोशस्यैकदेशे पर्वतः। क्रोशस्य भागे एकस्मिन् पर्वतः इत्यर्थः। उभयत्रोदाहरणे मासशब्दस्य क्रियया तथा च क्रोशशब्दस्य द्रव्येण पर्वतेन सह अत्यन्तसंयोगः नास्ति। अतः द्वितीया विभक्तिः न भवति। यदि अत्यन्तसंयोगे इति नोचेद् तदा तदभावेऽपि उभयोः उदाहरणयोः द्वितीयापत्तिः स्यात्। वस्तुतः उभयत्रोदाहरणे कृत्वोऽर्थप्रयोगे “कालेऽधिकरणे”[28] इत्यनेन सूत्रेण षष्ठी विभक्तिः।

### 5.6. अपवर्गे तृतीया (२-३-६)।

अत्र “कालाध्वनोरत्यन्तसंयोगे”[29] इत्यनुवर्तते। अपवर्गस्य सामान्यार्थः समाप्तिः इत्यस्ति। प्रायः क्रियायाः फलप्राप्तिपर्यन्तं दर्शनात् समाप्ति इत्यनेन फलप्राप्तिः विवक्ष्यते। अतः *शब्दकौस्तुभे* मूले उक्तम्– अपवर्गः फलप्राप्तिः इति। फलप्राप्तौ अर्थे द्योत्ये कालवाचकाद् अध्ववाचकाच्च शब्दाद् अत्यन्तसंयोगे सति तृतीया विभक्तिः भवति। *महाभाष्य*कारेण पतञ्जलिना प्रोक्तं– “क्रियापवर्गे”[30] इति। अर्थात् अपवर्गः इत्यनेन क्रियापवर्गः बोध्यः, न तु साधनापवर्गः। अतः अनेन ज्ञायते यद्, अपवर्गः द्विविधः– क्रियापवर्गः साधनापवर्गश्च। *उद्द्योत*कारः द्वयोः अपवर्गयोः स्वरूपमाह– “साधने आलस्यादिरहिते सत्यपि प्रयोजनलाभेन क्रियायाः समाप्तिः स क्रियापवर्गः। प्रयोजनालाभेन

[28] पा. सू. २-३-६४.

[29] पा. सू. २-३-५.

[30] महा. भा., द्वि. ख., पा.सू. २-३-६, सम्पा. भार्गवशास्त्री जोशी, पृ. ४९१.

क्रियाया आवृत्त्यावश्यकत्वेऽपि आलस्यादिना क्रियातो निवृत्तिः साधनापवर्गः इति"।[31] "यद्यपि साधनापवर्गे क्रियापवर्गोऽस्ति तथापि विशेषणोपादानसामर्थ्याद् विशेष आश्रीयते क्रियाया एव योऽवर्गो, न तु साधनानामशक्त्यादिनिमित्तः"[32] इति *प्रदीपे* । साधनापवर्गे तृतीया मा भूत् इत्येतदर्थं मासमधीतोऽनुवाको न चानेन गृहीत इति।

शब्दकौस्तुभापेक्षया *उद्द्योत*टीकायाः व्याख्यानतः अपवर्गविषये विशेषप्रतिपत्तिः उत्पद्यते इति वक्तुं शक्यते।

## 5.7. सप्तमीपञ्चम्यौ कारकमध्ये (२-३-७)।

"कालाध्वनोरत्यन्तसंयोगे"[33] इत्यस्मात् कालाध्वनोः इत्यनुवर्तते, तच्च पञ्चम्यन्ततया विपरिणम्यते। अत्र कारकशब्दः कर्तृत्वादिशक्तिपरः बोध्यः, न तु कर्त्रादिपरः। अवधिद्वयसापेक्षं 'मध्य' भवति। तस्यार्थो भवति– द्वयोः कारकशक्त्योः मध्ये इति। तथा च *शब्दकौस्तुभे*– "शक्तिद्वयमध्ये यौ कालाध्वनौ ताभ्यां सप्तमीपञ्चम्यौ स्तः।"[34] अर्थात् कालवाची अध्ववाची च शब्दः यदा द्वयोः कारकशक्त्योः मध्यस्य समयं स्थानं सूचयतस्तदा कालवाचकाद् स्थानवाचकाच्च शब्दाद् सप्तमीपञ्चम्यौ भवतः।

---

[31] तदेव, पृ. ४९२.

[32] तदेव. पृ. ४९१.

[33] पा. सू. २-३-५.

[34] श. कौ., द्वि. ख., पा. सू. २-३-७, सम्पा. गोपालशास्त्री, पृ. २२५.

‘अद्य भुक्त्वा द्व्यहे द्व्यहाद्वा भोक्ता’ इत्यत्र कर्तृशक्त्योः मध्ये द्व्यहशब्दः कालवाचकः, तस्माद् “सप्तमीपञ्चम्यौ कारकमध्ये”[35] इत्यनेन सप्तमीपञ्चम्यौ भवतः। अद्य भुक्त्वा द्व्यहे द्व्यहसमीपे तृतीये दिवसे भोक्तेत्यर्थः। अद्यतनभोजनक्रियानिरूपितकर्तृत्वस्य द्व्यहोत्तरदिनगतभोजनक्रियानिरूपितकर्तृत्वस्य च मध्ये द्व्यहशब्दः कालवाची। कर्तृशक्तिः भुज् क्रियाभेदाद् भिन्ना भवति।

इहस्थोऽयं क्रोशे क्रोशाद्वा लक्ष्यं विध्येत् इत्यत्र कर्तृशक्त्योः कर्मशक्तेश्च मध्ये स्थानवाची– अध्ववाची क्रोशशब्दः अस्ति, तस्माद् सप्तमीपञ्चम्यौ भवतः। अत्र सामीप्यकमधिकरणत्वं पञ्चमीसप्तम्योः अर्थः।

ननु अत्र एक कर्ता एव, तत्कथं कारकमध्ये कालः? अत्रोच्यते– नात्र शक्त्याश्रयं द्रव्यं कारकमिति व्यवह्रियते, किन्तु शक्तिरेव। सा च कालभेदात् भिद्यते एव। एका हि अद्य भुजेः क्रेशे क्रोशाद्वेति एकस्मिन् देशे स्थितः सन् लक्ष्यं विध्येत्। कर्तृकर्मशक्त्योर्मध्ये काल इति। क्रोशशब्दात् सप्तमी विभक्तिः, पक्षे पञ्चमी विभक्तिः।

ननु शक्तिः कारकम् इति पक्षे प्रमाणाभावः, इति चेन्न, “सप्तमीपञ्चम्यौ कारकमध्ये”[36] इति सूत्रभाष्ये तत्र हि क्रियामध्ये इति वक्तव्यम्, इहापि यथा स्याद् – ‘अद्य देवदत्तो भुक्त्वा द्व्यहात् भोक्ता’ इति। अत्र अयं भावः यद्, द्रव्यं कारकं तच्च देवदत्तरूपम् अद्य द्व्यहानन्तरञ्चैकमेव, भेदनिबन्धनो हि मध्यव्यवहार इति द्व्यहस्य द्वयोः कारकयोर्मध्यवाचकत्वाभावात् सप्तमीपञ्चम्यौ न प्राप्नुतः। क्रियामध्ये इति कथने तु भुजिक्रियायाः कालभेदेन भेदाद् भुजिक्रिययोर्मध्ये द्व्यहरूपः कालो भवतीति न दोष इति

[35] पा. सू. २-३-७.

[36] पा. सू. २-३-७.

भाष्यवार्तिकाशयः। कारकमध्ये इत्युच्यमाने इहैव स्यात्– इहस्थोऽयम् इष्वासः क्रोशाद् लक्ष्यं विध्यति, क्रोशे लक्ष्यं विध्यतीति। यं विध्यति, यतश्च विध्यति तयोः तन्मध्यं भवति। अत्र भाष्ये यं यतः इत्युक्त्या कर्मापादानयोर्मध्यत्वं भाष्यकृदभिप्रेतं प्रतीयते। कैयटोऽप्याह – "लक्ष्यप्रदेशयोः कर्मापादानयोर्भेदान्मध्यव्यपदेशोऽस्त्येवेति"। एवञ्च 'शक्तिः कारकम्' इति पक्षम् अवलम्ब्य भगवता– क्रियामध्य इति वार्त्तिकं प्रत्याख्यातम्। इति एतस्य पक्षस्य प्रामाणिकत्वात्। "अनभिहिते"[37] इति सूत्रेऽपि 'शक्तिः कारकम्' इति पक्षः प्रतीयते– प्रासादे आस्ते, शयने आस्ते, अत्र सप्तमी न प्राप्नोति, अभिहितत्वात्, इत्युपक्रम्य 'शक्तिः कारकम्' इति पक्षमाश्रित्य समाधीयते भाष्यकारेण– अत्राधिकरणत्वशक्तिद्वयम्– सदिनिरूपितम्, आसिनिरूपितञ्च। तत्राभिहितं यत्सदिनिरूपितमधिकरणत्वं तद्भिन्नं यदासिनिरूपिताधिकरणत्वं तदाश्रया सप्तमी निर्बाधा इति तेन शक्तिः कारकमिति पक्षः प्रामाणिकः।

### 5.8. कर्मप्रवचनीययुक्ते द्वितीया (२-३-८)।

कर्म-पूर्वकं प्रपूर्वकं वच्-धातोः अनीयर्-प्रत्यये भूतकाले कर्तर्यर्थे कर्मप्रवचनीय इति सिद्ध्यति। कर्म प्रोक्तवन्तः कर्मप्रवचनीयाः[38] भाष्यकाराभिमतम्। कर्मप्रवचनीयसंज्ञा अन्वर्थसंज्ञा अर्थात् अर्थानुसारिणी संज्ञा बोध्या इति तु भाष्यकारस्य अभिमतमस्ति। कर्मप्रवचनीय इत्यत्र कर्मपदेन क्रिया बोध्या। अतिक्रान्तक्रियागतसम्बन्धं कर्मप्रवचनीयः द्योतयति न तु वर्तमानक्रियाम्। अर्थात् एवं वक्तुं शक्यते यद्, कर्मप्रवचनीयेन सह

---

[37] पा. सू. २-३-१.

[38] महा. भा., द्वि. ख., पा. सू. १-४-८३, सम्पा. भार्गवशास्त्री जोशी.

क्रियाजनितसम्बन्धस्य प्रतीतिः भवति। स्वरूपतः निपातोपसर्गयोः सदृशः कर्मप्रवचनीयः, तथापि उपसर्गाद् भिन्नः, किन्तु उपसर्गस्य इव कर्मप्रवचनीयस्यापि क्रियायाः पूर्वंप्रयोगः दृश्यते। अत्र विशेषता अस्ति यत्, सन्धिकार्यं धातूपसर्गयोः मध्ये अनिवार्यं, परन्तु कर्मप्रवचीये षत्वणत्वादिसन्धिकार्यम् अनिवार्यं नास्ति। अतः उपसर्गाणां स्वतन्त्रप्रयोगः न सम्भवति। कर्मप्रवचनीयानां तु स्वतन्त्रप्रयोगः भवति। कर्मप्रवचनीयसंज्ञा उपसर्गसंज्ञा गतिसंज्ञां च बाधते।

कर्मप्रवचनीयविषये आचार्येण भर्त्तृहरिणा उक्तं–

**“क्रियाया द्योतको नायं सम्बन्धस्य न वाचकः।**

**नापि क्रियापदापेक्षी सम्बन्धस्य तु बोधकः”॥**[39] इति।

अर्थात् कर्मप्रवचनीयः प्रपचति इत्यत्र उपसर्गवद् क्रियां नैव द्योतयति। पुनः सम्बन्धस्य वाचकोऽपि न भवति। अपरञ्च प्रादेशं विपरिलिखति इत्यत्र वि-शब्दः यथा क्रियापदस्य आक्षेपं करोति तद्वद् कर्मप्रवचनीयः क्रियापदस्य नैव आक्षेपं करोति। अतः कर्मप्रवचनीयस्तु विशिष्टक्रियाजनितसम्बन्धस्य भेदकः अर्थाद् विशेषकः अस्ति।

*अष्टाध्याय्याम्* अनु, उप, अप, परि, आङ्, प्रति, अभि, अधि, सु, अति, अपि इति एकादशानां कर्मप्रवचनीयानाम् उल्लेखः वर्तते। एते कर्मप्रवचनीयाः हेतुलक्षण-सहार्थ-हीनता-आनर्थक्य-पूजाधिक्रमण-पदार्थसम्भावन-अन्ववसर्ग-गर्हा-समुच्चय-स्वाम्य-अधिकारार्थानां सम्बन्धं जनयन्ति। क्रियानिरूपितसम्बन्धविशेषं ये द्योतयन्ति ते कर्मप्रवचनीयसंज्ञकाः भवन्ति। कर्मप्रवचनीयानां योगे वस्तुतः द्वितीया-पञ्चमी-

---

[39] वा. प., प. का., श्लो. २०४.

सप्तमीविभक्तयः भवन्ति। अत्र "कर्मप्रवचनीययुक्ते द्वितीया"[40] सूत्रेण कर्मप्रवचनीययोगे द्वितीया विभक्तिः विधीयते। यथा– 'हरिं प्रति पर्यनु वा'। "गतिश्च"[41], "उपसर्गाः क्रियायोगे"[42] इति सूत्राभ्यां प्रति, परि, अनु इत्यादीनां विधीयमानायाः गतिसंज्ञायाः उपसर्गसंज्ञायाः च अपवादत्वात् बाधिका कर्मप्रवचनीयसंज्ञेयम्। वस्तुतः कर्मप्रवचनीयेति अन्वर्थसंज्ञाबलात् संज्ञेयं न केवलं क्रियां द्योतयति अपि तु क्रियाजनितसम्बन्धविशेषं द्योतयति। एवं प्रति, परि, अनु इत्यादिषु क्रियानिरूपितसम्बन्धस्य द्योत्यभावेन अन्वयात् गतिसंज्ञायाः उपसर्गसंज्ञायाः च प्राप्तिः भवति, तयोः बाधिका इयं कर्मप्रवचनीयसंज्ञा।

### 5.9. यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी (२-३-९)।

अत्र "कर्मप्रवचनीययुक्ते द्वितीया"[43] इत्यस्यात् कर्मप्रवचनीययुक्ते इत्यनुवर्तते। यस्माद् अधिकं वर्तते इत्यर्थे सप्तमी, तथा च यस्य चेश्वरवचनम् इत्यस्यार्थः– यत्सम्बन्धी ईश्वरः उच्यते सः। यत्पदेन स्वम्– वस्तु इत्युच्यते। स्ववाचकाद् अपि अनेन सप्तमी भवति। यस्य ईश्वरत्वमुच्यते तस्मादपि सप्तमी भवति इति यस्य चेश्वरवचनं तत्र सप्तमीत्यस्य अर्थः। इत्थं द्विधा सप्तमी विधीयते। यस्मादधिकमित्यर्थे, यस्य चेश्वरवचनमित्यर्थे च। सूत्रार्थस्तावद्– यस्मादधिकम् इत्यर्थे कर्मप्रवचनीययुक्ते सप्तमी भवति, तथा च यस्य ईश्वरवचनं तस्मादपि– स्ववाचकाद् ईश्वरवाचकाच्च कर्मप्रवचनीययुक्ते सप्तमी भवति।

---

[40] पा. सू. २-३-८.

[41] पा. सू. १-४-६०.

[42] पा. सू. १-४-५९.

[43] पा. सू. २-३-८.

‘उपपरार्धे हरेर्गुणाः’। पदार्थादपि अधिकाः हरिगुणाः सन्तीत्यर्थः। परार्ध इति परा संख्या। तदपेक्षया सर्वाः संख्याः न्यूनैव। अत्र “उपोऽधिके”[44] सूत्रेण अधिके अर्थे उप इत्यस्य कर्मप्रवचनीयसंज्ञा। ततः यस्मादधिकं तत्र सप्तमी इत्यनेन परार्धशब्दात् सप्तमी। ‘अधि भुवि रामः’। रामः भुवः स्वामी इत्यर्थः। ‘भूः स्वभूता’। तस्याः स्वामी रामः। इत्थं स्वस्वामिभावसम्बन्धे “अधिरीश्वरे”[45] इत्यनेन अधि इत्यस्य कर्मप्रवचनीयसंज्ञा। अत्र अधि इति ईश्वरपर्यायः। ‘यस्य चेश्वरवचनं तत्र सप्तमी’ इत्यनेन स्ववाचकात् भू-शब्दात् कर्मप्रवचनीयस्य अधि इत्यस्य योगे सप्तमी भवति। ‘अधि रामे भूः’। रामस्य स्वभूता भूः इत्यर्थः। स्वामिवाचकः राम इति। “अधिरीश्वरे”[46] इत्यनेन अधि इत्यस्य कर्मप्रवचनीयसंज्ञा। तद्योगे ‘यस्य चेश्वरवचनं तत्र सप्तमी’ इत्यनेन ईश्वरवाचकाद् राम इत्यस्माद् सप्तमी भवति।

सप्तमी शौण्डैः इति समासपक्षे – रामाधिना – अधि इत्यस्य शौण्डादिगणे पाठाद् रामे अधि इत्यनयोः सप्तमी शौण्डैः इति समासे प्रातिपदिकात् “सुपो धातुप्रातिपदिकयोः”[47] इति सुपो लुकि रामाधिशब्दाद् “अषडक्षाशितङ्ग्वलंकर्मालंपुरुषाऽध्युत्तरपदात् खः”[48] इत्यादिना ख-प्रत्यये खस्य ईनादेशे स्त्रियां टापि रामाधीना इति भवति। विभक्त्यर्थेऽव्ययीभावसमासे तु अधि इत्युत्तरपदाभावात् ख-प्रत्ययः न स्यात्, ‘अधि रामं भूः’ इत्येव स्यात्।

---

[44] पा. सू. १-४-८७.

[45] पा. सू. १-४-९७.

[46] पा. सू. १-४-९७.

[47] पा. सू. २-४-७१.

[48] पा. सू. ५-४-७.

"सप्तमीपञ्चम्यौ कारकमध्ये"[49] इति सूत्रेण अधिकशब्देन योगे सप्तमीपञ्चम्याविष्येते। तेन 'लोके लोकाद्वा अधिको हरिः' इति भवति। उदाहरणेऽस्मिन् सप्तमीसाधनाय "तदस्मिन्नधिकमिति दशान्ताड्डः"[50] इति सूत्रं प्रमाणरूपेण उद्धृतम्, अपि च पञ्चमीसाधनाय "यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी"[51] इति सूत्रं प्रमाणरूपेण उद्धृतम्। आचार्यस्य नागेशभट्टस्य अभिप्रायः तावत् – अधि-आङ्-पूर्वकं रुह्-धातोः कर्त्तरि अर्थे क्त-प्रत्यययोगेन अध्यारूढ इति शब्दः निष्पन्नः। अत्र कर्त्तरि क्तप्रत्ययान्तस्य अध्यारूढशब्दस्य वाचकः अधिकशब्दः। अध्यारूढशब्दाद् स्वार्थे कन्-प्रत्यये, आरूढ इति उत्तरपदस्य निपातनात् लोपे च अधिकशब्दः निष्पद्यते। अधिकशब्दयोगेन "कर्तृकर्मणोः कृतिः"[52] इति सूत्रेण लोकशब्दाद् षष्ठ्याः प्राप्तिः, अतः "तदस्मिन्नधिकमिति दशान्ताड्डः"[53], "यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी"[54] इति सूत्राभ्यां सप्तमीपञ्चम्यौ इष्येते। उक्तञ्च आचार्येण नागेशेन– "कर्त्तरि क्तप्रत्ययान्ताध्यान्ताध्यारूढशब्दार्थकावधिकशब्दयोगे लोकशब्दात् षष्ठ्यां प्राप्तायां ज्ञापकादिमे इष्येते"।[55] अतः *शब्दकौस्तुभे* "यस्मादधिकं यस्य चेश्वरवचनं

---

[49] पा. सू. २-३-७.

[50] पा. सू. ४-२-६७.

[51] पा. सू. २-३-९.

[52] पा. सू. २-३-६५.

[53] पा. सू. ४-२-६७.

[54] पा. सू. २-३-९.

[55] ल. श. शे., का. प्र., सम्पा. तेजपालः शर्मा, पृ. ४८५.

तत्र सप्तमी”[56] इति सूत्रस्य विशेषार्थः प्रोक्तः– “यस्मादधिकं तदस्मिन्नधिकमिति च निर्देशादधिकशब्दयोगे पर्यायेण पञ्चमीसप्तम्यौ स्तः”।[57]

## 5.10. पञ्चम्याङ्परिभिः (२-३-१०)।

“अपपरी वर्जने”[58], “आङ्मर्यादावचने”[59] इति सूत्राभ्यां यत् बोधितकर्मप्रवचनीयसंज्ञाफलं तत् “पञ्चम्यपाङ्परिभिः”[60] इति सूत्रेण प्रदर्श्यते। अप-आङ्-परिभिः कर्मप्रवचनीयैः योगे पञ्चमी भवति।

‘अपहरेः, परि हरेः संसारः’। हरिं वर्जयित्वा जन्ममृत्युचक्ररूपं संसरणमस्ति इति वाक्यार्थः। वर्जने अर्थे अप परि इत्यनयोः “अपपरी वर्जने”[61] इति सूत्रेण कर्मप्रवचनीयसंज्ञायां “कर्मप्रवचनीययुक्ते द्वितीया”[62] इति सूत्रं प्रबाध्य “पञ्चम्यपाङ्परिभिः”[63] इत्यनेन सूत्रेण हरिशब्दात् पञ्चमी भवति। यदा तु लक्षणादौ अर्थे परि इत्यस्ति, तदा लक्षणेत्थम्भूताख्यानेत्यनेन कर्मप्रवचनीयसंज्ञायां द्वितीयैव भवति।

---

[56] पा. सू. २-३-९.

[57] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. २२५.

[58] पा. सू. १-४-८८.

[59] पा. सू. १-४-८९.

[60] पा. सू. २-३-१०.

[61] पा. सू. १-४-८८.

[62] पा. सू. २-३-८.

[63] पा. सू. २-३-१०.

‘आमुक्तेः संसारः’। मुक्तेः प्राक् जन्ममृत्युरूपं संसरणं भवति इत्यर्थः। अत्र मर्यादायाम् अर्थे आ-इत्यस्य “आङ्मर्यादावचने”[64] सूत्रेण कर्मप्रवचनीयसंज्ञायां तद्योगे पञ्चम्यपाङ्परिभिरिति मुक्तिशब्दात् पञ्चमी विभक्तिः।

‘आ सकलाद् ब्रह्म’। सकलम् अभिव्याप्य ब्रह्म विद्यते इत्यर्थः। अत्र वाक्ये आ-इत्यस्य अभिविधौ अर्थे “आङ्मर्यादावचने”[65] इत्यनेन सूत्रेण कर्मप्रवचनीयसंज्ञायां पञ्चम्यपाङ्परिभिरिति सकलशब्दात् पञ्चमी।

### 5.11. प्रतिनिधिप्रतिदाने च यस्मात् (२-३-११)।

“प्रतिनिधिप्रतिदाने च यस्मात्”[66] इति सूत्रे पञ्चम्यन्तः यः यस्मात्-शब्दः, तस्य अर्थः सम्बन्धः। निपातनात् षष्ठ्यर्थे पञ्चमी। प्रतिनिधिः इत्युक्ते सदृशः। प्रतिनिधीयते असौ प्रतिनिधिः “उपसर्गे घोः किः”[67] इति सूत्रेण कर्मणि किप्रत्ययः आलोपश्च। प्रतिदानम् इत्युक्ते दत्ततुल्यमूल्यस्य वस्तुनः प्रत्यर्पणम्। प्रतिदानशब्दः भावल्युडन्तः। एवञ्च सूत्रार्थः– प्रतिनिधिप्रतिदाने यत्सम्बन्धिनी, ततः कर्मप्रवचनीययुक्तात् पञ्चमी।

‘प्रद्युम्नः कृष्णात् प्रति’। प्रद्युम्नः युद्धादौ कृष्णस्य सदृशो गुणवान् इत्यर्थः। तत्र प्रति प्रतिनिधिप्रतिदानयोः इति प्रतेः कर्मप्रवचनीयसंज्ञायां तद्योगे कृष्णशब्दात् प्रतिनिधिप्रतिदाने

---

[64] पा. सू. १-४-८९.

[65] पा. सू. १-४-८९.

[66] पा. सू. २-३-११.

[67] पा. सू. ३-३-९२.

च यस्मात् इति पञ्चमी विभक्तिः। यतो हि प्रद्युम्नः कृष्णसम्बन्धी प्रतिनिधिः अस्ति। अत्र पञ्चम्यर्थः सादृस्यम्। प्रतिः तद्द्योतकः।

'तिलेभ्यः प्रतियच्छति माषा'न्। गृहीतान् तिलान् माषविनिमयेन प्रत्यर्पयति इत्यर्थः। अत्रापि प्रतीत्यस्य कर्मप्रवचनीयसंज्ञायां तद्योगे प्रतिनिधिप्रतिदाने च यस्मादिति तिलशब्दात् पञ्चमी विभक्तिः। अत्र तिलसम्बन्धि प्रतिदानमस्ति अतस्तस्मात् कर्मणि पञ्चमी भवति।

### 5.12. गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि (२-३-१२)।

गत्यर्थकाः ये धातवः, तद्वाच्यधातुजन्यफलाश्रयवाचकात् अध्वभिन्नाद् द्वितीयाचतुर्थ्यौ च भवतः चेष्टायाम्। अत्र अध्वपदेन न स्वरूपस्य ग्रहणम् अपि तु अर्थग्रहणं सप्तमीनिर्देशात्, कर्मणि इत्यनेन अनेकार्थबोधकत्वरूपसामानाधिकरण्याच्च। शब्दस्वरूपस्य ग्रहणे तु अनध्वनः इत्येव अवक्ष्यत्। लघुशब्देन्दुशेखरे उक्तम्– "अध्वपदेन गन्तृव्याप्योऽर्थ उच्यते, तेन गन्तृयुक्तस्त्रियां स्त्रियं गच्छति इत्यादौ न"।[68]

'ग्रामं ग्रामाय वा गच्छति' इत्यत्र गत्यर्थकगम्-धातोः कर्म ग्राम इति वर्तते। गतौ शरीरव्यापारोऽपि भवति। अतः चेष्टाऽपि विद्यते। गत्यर्थकर्मणि इत्यनेन ग्राम-शब्दात् चतुर्थ्यां कृतायां ग्रामाय इति भवति। पक्षेऽनेनैव द्वितीयायां कृतायां ग्रामम् इत्यपि भवति।

सूत्रे 'गत्यर्थे'ति पदाभावे 'ओदनं पचति' इत्यादौ ओदनशब्दात् चतुर्थ्यापत्तिः स्यात्। 'चेष्टायाम्' इति पदाभावे 'मनसा हरिं व्रजति' इत्यादौ हरिशब्दादपि चतुर्थी स्यात्। अत्र मानसिकक्रियया हरिं प्राप्नोति, अतः शरीरक्रियायाः अभावो वर्तते। 'अनध्वनि' इति

---

[68] ल. श. शे., का. प्र., सम्पा. तेजपालः शर्मा, पृ. ३६७.

पदाभावे गत्यर्थकधातूनां कर्मणि द्वितीयाचतुर्थ्यौ स्यातां, तदा 'पन्थानं गच्छति' इत्यत्र पथिन्-शब्दादपि चतुर्थी प्रसज्येत। अत्र पथिन् इति मार्गवाची एव। अतः सूत्रं न प्रवर्तते।

वस्तुतः गन्त्रा आक्रान्ते अध्वनि– मार्गे एव अनध्वनि इति निषेधो प्रवर्तते। यदा उत्पथात्– अमार्गात्, पन्थाः– मार्ग एव, आक्रमितुम्– गन्तुं प्रवेष्टुं वा, इष्यते, तदा मार्गवाचकादपि चतुर्थी भवत्येव। यथा– 'उत्पथेन पथे गच्छति'। अमार्गं परित्यज्य समीचीनं मार्गम् प्रवेष्टुं वाञ्छति इत्यर्थः। अत्र पथिन्-शब्दात् चतुर्थी भवत्येव। यतो हि अत्र गन्ता मार्गं न आक्रान्तवान्, अपि तु आक्रमितुमेव इच्छति। अतः मार्गवाचिकर्मण्यपि चतुर्थी भवत्येव।

अत्र वार्त्तिककाराः आहुः– 'अध्वन्यर्थग्रहणम्', 'आस्थितप्रतिषेधो वक्तव्यः'। आस्थितः– सम्प्राप्तः। 'पन्थानं गच्छति' इत्यत्र पन्था प्राप्त एवेति न पक्षे चतुर्थी। यदा अप्राप्तत्वेन विवक्षा तदैवेदं सूत्रं प्रवर्तते इति भावः। अत्र केचित् 'अनध्वनि' इत्यपनीय असंप्राप्ते न्यस्यते तेन 'स्त्रियं गच्छति' इत्यत्र सा प्राप्ता एवेति न चतुर्थी। "असंप्राप्तं यद्वस्तु गमनेन संप्रेप्स्यते तस्मिन् कर्मणि इत्यर्थः। स्त्री तु संप्राप्तेति चतुर्थ्यभावः। अजां नयतीत्यत्राप्यजायाः संप्रापणाच्चतुर्थ्यभावः। अथवा नयतिर्गत्यर्थ एव न भवति। प्रतीयते ह्यत्र गतिः न ह्यसौ नयतेरर्थः। तस्य प्रापणवाचित्वात्"[69] इति *प्रदीपे* सूत्रे द्वितीयाग्रहणमपवादविषयेऽपि कृद्योगलक्षणषष्ठीप्रतिषेधार्थम्। तेन ग्रामं गन्ता इत्यत्र न षष्ठी। अत्र चेष्टापदेन शरीरक्रियाया एव ग्रहणम्। अत्र अधिष्ठितपदेन शब्दप्रयोगसमकालिकगन्तृव्यापारजन्यफलाश्रय इत्यर्थः।

[69] महा. भा., द्वि. ख., पा. सू. २-३-१२, सम्पा. भार्गवशास्त्री जोशी, पृ. ४९६.

## 5.13. चतुर्थी सम्प्रदाने (२-३-१३)।

दानक्रियाकर्मणा कर्ता यमभिप्रैति संबध्नाति ईप्सति वा तद् कारकं सम्प्रदानसंज्ञकम्। वाक्यपदीये उक्तं– "याच्ञापूर्वके च दाने प्रेरणम्, अभ्यर्थनया प्रवर्त्तनमपि सम्प्रदानव्यापारः"।[70] तेन 'अजां नयति ग्रामम्', 'हस्तं निदधाति वृक्षः' इत्यादौ नातिप्रसङ्गः। दानञ्च स्वस्वत्वध्वंसपूर्वकपरस्वत्वोत्पत्त्यनुकूलव्यापाररूपम्। अत एव रजकस्य वस्त्रं ददाति इत्यादौ न सम्प्रदानसंज्ञा, सम्प्रदानसंज्ञायां चतुर्थी विभक्तिः भवति। सम्प्रदानादिसंज्ञा अर्थस्य बोध्या, न तु शब्दस्य। एवञ्च सम्प्रदानार्थबोधकात् प्रातिपदिकाद् चतुर्थी विभक्तिः कार्या। 'विप्राय गां ददाति (राजा)' इत्यत्र क्रिया - स्वस्वत्वध्वंसविशिष्टपरस्वत्वानुकूलेच्छारूपा, तत्कर्मस्वस्वत्वध्वंसविशिष्टपरस्वत्वरूप-फलाश्रयः गौः। कर्मणः करणञ्च अभिसम्बन्धक्रियाम्प्रति, करणस्य च व्यापारवत्त्वनियमात् कर्मत्वप्रयोजकत्वेन उपस्थितस्य फलस्यैव व्यापारवत्त्वं कल्प्यते। गोपदोत्तरद्वितीयाया आश्रयः अर्थः। तथा च विप्रस्य अभेदेन चतुर्थ्यर्थोद्देश्यस्य स्वनिष्ठोद्देश्यतानिरूपकत्वसम्बन्धेन दाधात्वर्थेच्छायाम् अन्वयः भवति। गोपदार्थस्य द्वितीयार्थाश्रये अभेदेन, तस्याधेयतासम्बन्धेने इच्छायाम् अन्वयः जायते। एवञ्च विप्रोद्देशिका गवाभिन्नाश्रयनिष्ठस्वस्वत्वध्वंससमानाधिकरणपरस्वत्वानुकूला राजाभिन्नाश्रयनिष्ठा वर्तमानकालावच्छिन्ना इति 'राजा विप्राय गां ददाति' इत्यस्मात् बोधः जायते।

सम्प्रदाने या चतुर्थी विभक्तिः भवति, तस्याः उद्देश्योऽर्थः। उद्देश्यश्च धात्वर्थोपस्थापितव्यापारोत्पाद्यफलाश्रयरूपकर्मसम्बन्धनाय कर्ता यमिच्छति सः इति बोध्यः। इदमेव उद्देश्यभूतं कारकं सम्प्रदानसंज्ञकम्। भवति च चतुर्थी सम्प्रदाने। तेन चतुर्थ्याः उद्देश्य

---

[70] वा. प., सा. समु., सम्पा. के. ए. सुब्रमान्यः, Vol.-3, पृ. ३३२.

एवार्थः। सम्प्रदानत्वशक्तिमान् सम्प्रदानचतुर्थ्यर्थः। स एवोद्देश्य इत्युच्यते। तथा च परलघुमञ्जूषायां प्राह आचार्यः नागेशः– "सम्प्रदानचातुर्थ्यर्थ उद्देश्यः। तथा च ब्राह्मणोद्देश्यकं गोकर्मकं दानमिति बोधः। मैत्रोद्देश्यकं वार्ताकर्मकं कथनमिति च"।[71] तथा च लक्षणान्तरमपि उक्तं नागेशेन– "अकर्मकक्रियोद्देश्यत्वं सम्प्रदानत्वम् इति"।[72] अर्थात् अकर्मिका फलसामानाधिकरणव्यापारशालिनी या क्रिया तस्याः लक्ष्यत्वं सम्प्रदानकारकत्वम्। यथा– 'पत्ये शेते' इत्यादौ पत्युद्देश्यकं नायिकाकर्तृकं शयनमिति बोधः भवति।

**तादर्थ्ये उपसंख्यानम् (का.वा.)।**

चतुर्थी विभक्तिः विधाने तादर्थ्ये उपसंख्यानं कर्तव्यम्। तच्छब्देन अत्र कार्यं निर्दिश्यते। तस्मै इदं तदर्थमिति समासेन विशिष्टकार्यप्रयोजनं कारणम् अभिधीयते। इत्थं तदर्थस्य सम्बन्धो येन भवति तस्मात् चतुर्थी भवति इति सिद्ध्यति। 'मुक्तये हरिं भजति' इत्यत्र भजनं मुक्तिप्रयोजनम्। तादर्थ्यम् अत्र मुक्तिः। उपकारकं भजनम्, उपकार्यञ्च मुक्तिरित्यवधेयम्। भाष्ये च यूपाय दारू, कुण्डलाय हिरण्यमित्याद्युदाहृतम्। 'यूपाय दारु' इत्यत्र दारुशब्दात् "हेतौ"[73] इत्यनेन तृतीया विभक्तिः तु न भवति। प्रातिपदिकार्थमात्रे प्रथमा विभक्तिः भवति। *शब्दकौस्तुभ*कारेण शङ्का उदिता– ननु उपसंख्यानस्य आवश्यकत्वे सूत्रं व्यर्थमेव।[74] उत्तरे *शब्दकौस्तुभ*कार आह– नैव सूत्रं व्यर्थं, हरये रोचते

---

[71] वै. प. ल. म., का. प्र., सम्पा. जयशङ्करलालत्रिपाठी, पृ. २७६.

[72] तत्रैव.

[73] पा. सू. २-३-२३.

[74] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. २२७.

इत्याद्यर्थं तस्याप्यावश्यकत्वात्। अयमेव विषयः *परलघुमञ्जूषायां* स्पष्टीकृतः। तथा चेत्थं– दानादीनाम् उद्देश्यपरकत्वात् ब्राह्मणाय गां ददाति इत्यत्र तादर्थ्ये चतुर्थी विभक्तिः एव सिद्धौ "कर्मणा यमभिप्रैति स सम्प्रदानम्"[75] सूत्रं व्यर्थमेव स्यात्। "चतुर्थी सम्प्रदाने"[76] इति सूत्रं तु "रुच्यर्थानां प्रीयमाणः"[77] इत्यादिसूत्रविहितसम्प्रदानसंज्ञाविषये चतुर्थीनिमित्तम् इति उच्यते चेत्, न समीचीनं भवति। दानक्रियाकर्मभूतस्य गवादेर्ब्राह्मणार्थत्वेन तत्र तादर्थ्ये चतुर्थी विभक्तिः तु भवत्येव, किन्तु दानक्रियायाः परलोकाद्यर्थत्वात् ब्राह्मणार्थत्वाभावेन न हि तस्य चतुर्थ्यन्तार्थस्य क्रियायामन्वय इति न तस्य कारकत्वम् इति "कर्मणा यमभिप्रैति स सम्प्रदानम्"[78] इत्येतस्य पाठोपपत्तिः भवति। तादर्थ्यचतुर्थ्यर्थः तु उपकार्योपकारकत्वसम्बन्धः, सम्प्रदानस्य हि उद्देश्यः। ब्राह्मणाय दधि इत्यादौ ब्राह्मणोपकारकं दधि इति बोधः जायते।

**क्लृपि सम्पद्यमाने च (का.वा.)।**

विकारवाचकाद् चतुर्थी विभक्तिः इत्यर्थः। सम्पद्यमाने इत्यत्र सम्पूर्वकस्य पद्-धातोः अर्थः विकाररूपेण उत्पत्तिः परिणामो वा भवति। क्लृपिः अत्र तदर्थकः। वार्त्तिकस्यास्य निष्कर्षः अर्थः– क्लृप्-धातौ प्रयुज्यमाने सति तदर्थके धातौ च प्रयुज्यमाने सति विकाररूपेण उत्पद्यमाने परिणामिनि वा अर्थे वर्त्तमानात् चतुर्थी विभक्तिः भवति। सम्पद्यते इत्यस्य अर्थः *शब्दकौस्तुभे* उक्तं– 'प्रादुर्भवति' इति। 'भक्तिः ज्ञानाय कल्पते,

[75] पा. सू. १-४-३२.

[76] पा. सू. २-३-१३.

[77] पा. सू. १-४-३३.

[78] पा. सू. १-४-३२.

सम्पद्यते, जायते'। भक्तिः ज्ञानात्मना परिणमते इत्यर्थः। प्रकृतिविकारयोः भेदविवक्षायां चतुर्थी भवति। अभेदविवक्षायां प्रथमा विभक्तिः भवत्येव। एतदेव मूत्राय कल्पते यवागूः इत्यस्मिन् उदाहरणे *उद्द्योते* स्पष्टीकृतं– "कल्पत इत्यादेः परिणमत इत्यर्थः। परिणामश्च रूपान्तरप्राप्तिः। तदेकदेशे रूपान्तरे मूत्रादेर्विकारस्याभेदेनान्वयेन ततो द्वितायायां प्राप्तायां तद्बाधेन चरितार्था चतुर्थी अभेदविवक्षायां परत्वाद् प्रथमया बाध्यते। यवागूर्मूत्रं कल्पते इत्येव हि तदा ध्वनितं चेदं हरदत्तेन। कल्पेरुत्पत्त्यर्थत्वे जनिकर्तुरिति प्रकृतेः पञ्चम्यामपि विकृतिवाचकात्परत्वादुपपदविभक्तेरिति न्यायाच्च प्रथमैवेति दिक्"।[79]

**उत्पातने ज्ञापिते च (का.वा.)।**

उत्पातेन ज्ञाप्यमाने चतुर्थी विभक्तिः वक्तव्या इत्यर्थः। प्राणिनां शुभाशुभयोः सूचकः भूतविकारः उत्पातः।

*महाभाष्ये* उदाहृतं–

**"वाताय कपिला विद्युदातपायातिलोहिनी।**

**कृष्णा सर्वविनाशाय दुर्भिक्षाय सिता भवेत्"॥**[80]

वातस्य ज्ञापिका कपिला विद्युत्। कपिः वर्णविशेषः। यद्वा कपिः मर्कटः तद्वर्णत्वात्।

**हितयोगे च (का.वा.)।**

हितयोगे चतुर्थी विभक्तिः वक्तव्या इत्यर्थः। "चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः" इत्यनेन हितशब्देन सह चतुर्थ्यन्तस्य समासविधानमेव हितयोगे चतुर्थ्यां प्रमाणमस्ति। 'ब्राह्मणाय हितम्'। याजनादिकार्यं ब्राह्मणस्य सुखकारि इत्यर्थः।

---

[79] महा. भा. उ., द्वि. ख., वा., 'क्लृपि सम्पद्यमाने', सम्पा. भार्गवशास्त्री जोशी, पृ. ४९८.

[80] महा. भा., द्वि. ख., वा., 'उत्पातने ज्ञाप्यमाने', सम्पा. भार्गवशास्त्री जोशी, पृ. ४९८.

### 5.14. क्रियार्थोपपदस्य च कर्मणि स्थानिनः (२-३-१४)।

सूत्रेऽस्मिन् "चतुर्थी सम्प्रदाने" (पा.सू. २-३-१३) इत्यस्यानुवृत्तिः आयाति। 'अनभिहिते' इत्यस्य अधिकारः वर्तते। क्रियात्वञ्च गुणत्वानाश्रयत्वे सति विभागासमवायिकारणत्वम् इति। साध्यसाधनभेदेन क्रिया द्विविधा। तथा च– 'पचति' इत्यादौ साध्यरूपा। 'पाकः' इत्यादौ साधनरूपा। साध्यत्वञ्च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकधर्मवत्त्वम्। पचतीत्यादिपदे उच्चारिते साधनविषयिणी आकाङ्क्षा अवश्यमुदिता भवति, नान्यक्रियाविषयिणी आकाङ्क्षा। पाकादिपदोच्चरिते पाको जातो नष्टो वेति आकाङ्क्षोदयेन तत्र साधनरूपा क्रिया। साधनत्वञ्च क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकधर्मवत्त्वम् इति।

ननु क्रियावाचकधातोरुपोच्चरितपदरूपोपपदत्वं न सम्भवति, सुबन्ततिङन्तस्यैव पदत्वादिति चेन्न, क्रियावाचकं धातुरूपं प्रकृतिर्यस्येति क्रियावाचकप्रकृतिकमित्यर्थेनादोपात्। एवञ्च तादृशमुपपदं यस्य तुमुन्नन्तस्य तस्य कर्मणि चतुर्थी। "स्थानिशब्दश्च अप्रयुज्यमानवाची वैयाकरणानां निकाये प्रसिद्धः"।[81]

सूत्रस्यास्य निष्कर्षः अर्थः क्रियार्था क्रिया उपपदं यस्य अप्रयुज्यमानस्य तुमुन्-प्रत्यायान्तस्य, तस्य तुमुन्प्रत्ययान्तस्य कर्मणि चतुर्थी भवति। अत्र सूत्रे "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्"[82] इति तुमुन्-विधानसामर्थ्यात् उपपदं क्रियाफलकं क्रियावाचकमेव गृह्यते। 'फलेभ्यो याति'। फलानि आहर्तुं याति इत्यर्थः। अत्र आहरणक्रियायाः उपपदं याति इति क्रियापदम्। यतो हि यानक्रिया आहरणक्रियायै एव भवति। अतः क्रियार्थोपपदस्य

---

[81] ल. श. शे., का. प्र., पा. सू. २-३-१४, सम्पा. तेजपालः शर्मा, पृ. ३५४.

[82] पा. सू. ३-३-१०.

अप्रयुज्यमानस्य तुमुन्प्रत्ययान्तस्य अप्रयोगे सत्यपि तस्य कर्मणि फलशब्दे 'कर्मणि द्वितीये'ति प्राप्तां द्वितीयां प्रबाध्य प्रकृतसूत्रेण फलशब्दात् चतुर्थी विधीयते। अत्र तादर्थ्ये चतुर्थ्याः शङ्का न करणीया, यतो हि यानक्रिया फलाय नास्ति, अपि तु फलाहरणाय अस्ति। अतः नो तादर्थ्ये चतुर्थ्याः प्रसक्तिः।

'नमस्कुर्मो नृसिंहाय'। नृसिंहमनुकूलयितुं नमस्कुर्मः इत्यर्थः। अत्रापि तुमुन्प्रत्ययान्तस्य प्रयोगो न कृतः। किन्तु तस्यार्थः प्रतीयते। प्रतीयमानायाः अनुकूलक्रियायाः कर्म नृसिंह इत्यस्ति। तस्माच्चतुर्थी क्रियते। अत्र नमःस्वस्तीत्यनेन चतुर्थी न सम्भाव्यते। यतो हि "उपपदविभक्तेः कारकविभक्तिः बलीयसी" इति परिभाषया कर्मणि द्वितीया एव प्राप्ता आसीत्। तस्याः द्वितीयायाः अनेन बाधो विधीयते।

### 5.15. तुमर्थाच्च भाववचनात् (२-३-१५)।

"तुमर्थाच्च भाववचनात्" इत्यत्र तुमुनः अर्थ इव अर्थो यस्येति विग्रहः। तेन "तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्"[83] इत्यनेन सूत्रेण क्रियार्थक्रियायाम् उपपदभूतायां भविष्यति काले अर्थे यथा प्रत्ययौ भवतः तद्वदर्थे अर्थे एव, अर्थात् क्रियार्थकक्रियोपपदभूतायां सूत्रस्यास्य प्रवृत्तिः। भावः क्रिया इति उच्यते। उच्यते अनेन इति वचनः। भावस्य वचनः भाववचनः, तस्मात् अर्थात् क्रियावाचिनः प्रत्ययात् इत्यर्थो भवति भाववचनात् इत्यस्य। अव्ययकृतो भावे इति नियमात् तुमुनो भाव एव विहितत्वेन तदर्थकस्यापि भाववचनत्वं सिद्ध्यति, पुनरत्र भाववचनग्रहणं भाववचनाश्च इति सूत्रे ग्रहणार्थमस्ति इति ज्ञाप्यते।

[83] पा. सू. ३-३-१०.

भाववचनाश्च इत्यस्यार्थः भवति– भावे इत्यधिकारे ये घञादिप्रत्ययाः विहिताः सन्ति, ते क्रियार्थकक्रियायामुपपदभूतायां स्युः इति। इत्थं तुमर्थात् इति भाववचनात् इत्यस्य विशेषणं भवति।

सूत्रस्यास्य निष्कर्षः अर्थस्तावत्  तुमुनः अर्थ इव अर्थो यस्य तादृशो यः भाववचनाश्चेति सूत्रेण क्रियार्थकक्रियोपपदभूतायां सत्यां विहितो घञादिप्रत्ययस्तदन्ताच्चतुर्थी भवतीति। 'यागाय याति'। यष्टुं याति इत्यर्थः। अत्र यज्-धातोः घञ्-प्रत्यये याग इति। याति इति क्रियार्थकक्रियोपपदम्। अस्मिन् प्रयोगे तादर्थ्यस्य घञ्-प्रत्ययेन उक्तत्वात् उक्तार्थानामप्रयोगः इति न्यायात् तादर्थ्यचतुर्थ्याः अप्राप्तौ यागशब्दात् प्रथमायाः प्राप्तिः आसीत्। प्रथमां प्रबाध्यं चतुर्थी विधानाय इदं सूत्रम्।

### 5.16. नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च (२-३-१६)।

चतुर्थी इत्यनुवर्तते। युज्यते इति कर्मणि घञि योगः इति भवति। पञ्चम्येकवचने योगात् इति। युक्तात् इत्यर्थः। योगशब्दस्य प्रत्येकं योगः अर्थात् सम्बन्धः। नमःस्वस्तिस्वाहास्वधा अलं वषट् एभिर्युक्तात् शब्दात् चतुर्थी स्यात् इति सूत्रार्थः। तादर्थ्यचतुर्थी अस्य सूत्रस्य गतार्थता न भवितुमर्हति। यतो हि शेषत्वविवक्षायां तादर्थ्यचतुर्थी षष्ठीनिवारणाय अस्ति। तादर्थ्यं नाम उपकार्योपकारकभावः, यदा अस्य सम्बन्धत्वेन प्रतीतिः तदा षष्ठी भवति, यथा गुरोरिदं गुर्वर्थम् इति। नमः, स्वस्ति इत्यादियोगे तादर्थ्यस्य शेषत्वविवक्षायामपि चतुर्थीविधानाय इदं सूत्रम्।

'हरये नमः'। नमःपदप्रयोज्यविषयानिरूपितविषयताप्रयोजकात् चतुर्थी विभक्तिः। नमःपदप्रयोज्या विषयता नमस्कारत्वावच्छिन्ना विधेयताख्या विषयता,

तादृशविषयतानिरूपिता विषयता हरित्वावच्छिन्ना उद्देश्यताख्या विषयता तादृशविषयताप्रयोजकं प्रातिपदिकं शब्दस्वरूपं हरिरिति तस्माद् चतुर्थीविभक्तिः। अत्र हरिम् उद्दिश्य नमस्कारो विधीयते। नमस्करोति देवान्। अत्र द्वितीयाचतुर्थ्योः प्राप्तयोः “उपपदविभक्तेः कारकविभक्तिर्बलीयसी” इति न्यायेन द्वितीया विभक्तिः एव। केचित्तु उद्देशनक्रियावगतौ विलम्ब इति कारकविभक्तिर्बलीयसीत्याहुः। अन्ये तु उपपदविभक्त्या सम्बन्धसामान्यम् अवगम्यते, सम्बन्धविशेषावगमस्तु प्रकरणादिपर्य्यालोचनाधीनः, कारकविभक्त्या तु कर्मत्वादिसम्बन्धविशेषो झटित्येव अवगम्यते इति तस्याः बलीयस्त्वम् अन्तरङ्गत्वात्। वस्तुतस्तु उपपदविभक्तेः इति परिभाषा न ज्ञापकसिद्धा, नापि अन्तरङ्गपरिभाषामूला, किन्तुत वाचनिक्येव। अत एव भाष्ये इयं वाचनिकी इत्येव उक्तम्।

‘प्रजाभ्यः स्वस्ति’[84]। प्रजासम्बन्धिकुशलम् इत्यर्थः। तथा च आधेयत्वं चतुर्थ्यर्थ इति भावः। कल्याणार्थकस्वस्तिशब्दः अव्ययसंज्ञकः भवति। “प्रतिगृह्णामि ते धेनुं कुटुम्बार्थे विशेषतः। स्वस्तिर्भवतु ते नित्यं सुखं चानुत्तमं तथा”॥ इति भविष्योत्तरपुराणात् स्वस्तिशब्दः अनव्ययोऽपि दृश्यते। ‘अग्नये स्वाहा’। अग्न्युद्देश्यकं द्रव्यदानम् इत्यर्थः। ‘पितृभ्यः स्वधा’। पित्र्युद्देश्यकं द्रव्यदानम् इत्यर्थः। पित्रादेः उद्देश्यत्वं प्रीतिद्वारा बोध्यम्। “स्वस्वकरणको हविस्त्यागः स्वधास्वाहयोरर्थः” इति *शब्दशक्तिप्रकाशिका*याम्।

ननु सूत्रे पठितस्य अलंशब्दस्यैव स्वं रूपमित्यनेन ग्रहणे सति कुमारीणाम् अलङ्कारः इत्यत्र अलंयोगे कुमारीशब्दात् चतुर्थ्याः आपत्तिः स्यात्, ‘दैत्येभ्यो हरिः प्रभु’रित्यत्र च अनेन सूत्रेण चतुर्थी न स्यादिति दोषो भवति। अतः वार्त्तिकमिदं दीक्षितेन पठ्यते– “अलमिति

---

[84] श. श. प्र., कारकेषूपपदविभक्तिप्रकरणे, “प्रजानिष्ठं कुशलमित्यर्थः, स्वस्तिशब्दस्य कुशलवाचित्वात्।”, सम्पा. श्रीगङ्गाधरन्यायाचार्यः, पृ. ३७६.

पर्याप्त्यर्थग्रहणम्"।[85] अर्थात् "नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च"[86] सूत्रे अलंशब्दः पर्याप्त्यर्थकशब्दानां ग्रहणाय अस्ति। अलमित्यस्य भूषणादयः अर्थाः अपि सन्ति, परन्तु यदा पर्याप्तिः अर्थः अस्य स्यात् तदैव अलमित्यस्यापि योगे चतुर्थी विभक्तिः स्यादेव इत्येव आशयः। तेन 'दैत्येभ्यो हरिः अलम्'। दैत्येभ्यो हरिरलं समर्थः प्रभुः शक्त इति। प्रभ्वादियोगे षष्ठी अपि साधुर्भवति। भगवता पाणिनिना "तस्मै प्रभवति"[87] "स एषां ग्रामणीः"[88] इति सूत्रे च चतुर्थ्याः षष्ठ्याः प्रयोगः निर्दिष्टः। अतः तस्मै प्रभवति, तस्य प्रभवति इत्युभयमपि साधुप्रयोगः। तेन शिशुपालवधम् इति महाकाव्ये 'प्रभुर्बुभूषुर्भुवनत्रयस्य'[89] इत्यत्र षष्ठी भवति।

'इन्द्राय वषट्'। परमैश्वर्य्यवान् दैवाधिपतिरिन्द्रः। तं देवदेवमुद्दिश्य हविषो दानं तत्प्रीतये सम्पाद्यते यजमानेन। अस्मिन् सूत्रे 'च' इति पृथक् सूत्रं योगविभागेन। तेन शुभाशंसनरूपाशीर्विवक्षायां 'नमः स्वस्ति' इति चतुर्थीं बाधित्वा परत्वात् "चतुर्थी चाशिषि" इति षष्ठी स्वस्ति गोभ्यो भूयात् इत्यत्र गोशब्दात् प्राप्ता, किन्तु बाधकबाधनार्थं योगविभागेन कृतं 'च' इति षष्ठीं बाधित्वा चतुर्थी सम्पादयति।

---

[85] वै. सि. कौ., का. प्र., पा. सू. २-३-१६.

[86] पा. सू. २-३-१६.

[87] पा. सू. ५-१-१०१.

[88] पा. सू. ५-२-७८.

[89] **प्रभुर्बुभूषुर्भुवनत्रयस्य यः शिरोऽतिरागात् दशमं चिकर्तिषुः।**

**अतर्कयद् विघ्नमिवेष्टसाहसः प्रसादमिच्छासदृशं पिनाकिनः॥** इति सम्पूर्णश्लोकः।

## 5.17. मन्यकर्मण्यनादरे विभाषाऽप्राणिषु (२-३-१७)।

सूत्रेऽस्मिन् 'मन्य' इति श्यन्विकरणघटितनिर्देशः वर्तते, न तु यक्घटितनिर्शेशः। कर्मणि यकि कर्मण उक्तत्वाद् अस्मिन् सूत्रे 'अनभिहिते' इत्यस्य अधिकारसत्त्वेन अनभिहितं कर्म न संभवेत्। अतो न यका निर्देशः, श्यन्विकरणघटितमनधातुयोगे एवेदं प्रवर्तते इति तु न, श्यनः उपलक्षणत्वेन दैवादिकमन धातुयोगे अनेन चतुर्थी विभक्तिः। न च यक्प्रत्ययस्याप्युपलक्षणत्वेन न स्वयं यक् विवक्षित इति दैवादिकतानादिकयोः उभयोर्ग्रहणमिति वाच्यम्। मनधातुवाच्यव्यापारनिष्ठजनकता-निरूपितजन्यतावज्ज्ञानरूप-फलाश्रयकर्मणीत्यर्थः। तथा च सूत्रार्थः फलति– प्राणित्वावच्छिन्नप्रतियोगिताक-भेदवन्मनधातुवाच्यव्यापारजन्यज्ञानरूपफलाश्रयरूपकर्मवाचकात् तिरस्काररूपार्थे प्रतीयमाने विकल्पेन चतुर्थी विभक्तिः भवति, तदभावे तु "कर्मणि द्वितीया"[90] इत्यनेन द्वितीया भवति।

'न त्वां तृणं मन्ये तृणाय वा'। न त्वां तृणत्वेनापि मन्ये इति भावः। तृणादपि अधमस्त्वमिति अनादराधिक्यं प्रतीतं भवति। अतः अत्र "कर्मणि द्वितीया"[91] इत्यनेन सूत्रेण तृणशब्दात् प्राप्तां द्वितीयां प्रबाध्य प्रकृतसूत्रेण विकल्पेन चतुर्थी भवति, तृणाय इति। पक्षे कर्मणि द्वितीया, तृणमिति।

श्यन्विकरणस्याविवक्षितत्वेन "तृणाय मत्वा रघुनन्दनोऽपि बाणेन रक्षः प्रधनान् निरास्थत्" इति भट्टिप्रयोगः सङ्गच्छते। अनादरे इत्यत्र विरुद्धार्थो नञ् तेन तिरस्कारे विद्यमानत्वञ्च तद्द्योतकत्वेनेति युष्मदस्तिरस्काराद्योतकत्वेन न चतुर्थी। ननु एवमपि 'त्वां तृणं मन्ये तृणाय वा' इत्येवोदाह्रियतां कृतं नञः प्रयोगेण इति चेन्न, "मन्यकर्मणि प्रकृत्य

[90] पा. सू. २-३-२.

[91] पा. सू. २-३-२.

कुत्सितग्रहण्"[92] इति भाष्ये वार्त्तिकप्रामाण्येन यतः चतुर्थी विधीयते ततः प्रकर्षेण अर्थाद् अपकृष्टनिष्ठोपमानतानिरूपितोपमेयत्वाभाववत्त्वेन यदा कुत्सा प्रतिपाद्यते तदा चतुर्थी विभक्तिः, न तु साम्यविवक्षायामित्यर्थस्य विवक्षिततत्वात्। तादृशप्रतीतिश्च नञ्समभिव्याहारे एव। अत एव नञ्घटितमेव उदाहृतम्। एवं 'तृणाय मत्वा रघुनन्दनोऽपि' इत्यादौ अपि नञ्-पदम् अध्याहार्य्यम्।

मन्यकर्मण्यनादरे विभाषाऽप्राणिषु[93] इति सूत्रोदाहरणानि प्रदर्शयितुं नैयायिकः जगदीश-भट्टाचार्य्य आह *शब्दशक्तिप्रकाशिकायां*–

"मन्यतेः कर्मणो यस्मादयुक्तैवापकृष्टता।

नञ्बोध्याऽस्मात् द्वितीयावच्चतुर्थी प्राणिवर्जितात्"॥[94] इति।

इति भाष्यस्मृतेः मन्यतेः अनुक्तकर्मणि यत् अधिकापकृष्टत्वं नञा बोध्यं तत्र द्वितीया इव चतुर्थी अपि प्रमाणं भवति। तथा न त्वां तृणं मन्ये इत्यादौ इव न त्वां तृणाय मन्ये इत्यादौ अपि त्वां तृणात् अपकृष्टं मन्ये इत्यर्थः।

ननु प्राणिपरिभाषिताः के इत्याकाङ्क्षायाम् आह आचार्यः जगदीश-भट्टाचार्यः–

**"न नावं मन्यते योऽश्वं न काकं मन्यते शुकम्।**

**नान्नं स मन्यते सर्पिर्न शृगालं स मानुषः"**॥[95] इति।

[92] महा. भा., द्वि. ख., पा. सू. २-३-१७, सम्पा. भार्गवशास्त्री जोशी, पृ. ४९९.

[93] पा. सू. २-३-१७.

[94] श. श. प्र., कारकेषूपपदविभक्तिप्रकरणे, सम्पा. श्रीगङ्गाधरन्यायाचार्यः, पृ. ३७३.

[95] तदेव, पृ. ३७४.

ननु नञा तादृशार्थबोधने यदि चतुर्थी विभक्तिः 'तदा तृणाय मत्वा रघुनन्दनोऽथ' इत्यादिभट्टिग्रन्थानुपपत्तिः।

अतः आचार्येण जगदीशेन प्रोक्तम् आपिशलेर्मतं–

**"सदृशत्वं तृणादिनां मन्यकर्मण्यनुक्तके।**

**द्वितीयावच्चतुर्थ्यापि बोध्यते बाधितं यदि"**॥[96] इति।

तेन 'तृणाय त्वां मन्यते' इत्यत्र सादृश्यार्थेऽपि द्वितीयावत् चतुर्थी भवति। तृणसदृशं त्वां मन्यते इत्यर्थः। *उद्द्योते*ऽपि उक्तम्– "आपिशलिवाक्येनोपमानवाचकात्ततोऽपि तिरस्कारे चतुर्थीत्युच्यते"।[97] अतः अत्र निष्कर्षरूपेण वक्तुं शक्यते यत्, तिरस्कारार्थे सादृश्यार्थे च द्वितीयावत् चतुर्थी विभक्तिरपि भवति। पुनश्च अत्र मया विशेषप्रतिपत्तये नैयायिकाभिमतमुपस्थापितम्।

## अध्यायसमीक्षणम्

"विभक्त्यर्थप्रथमाह्निकविमर्शः" इत्याख्ये पञ्चमाध्यायेऽस्मिन् अनभिहिते[98] इति सूत्राद् मन्यकर्मण्यनादरे विभाषाऽप्राणिषु[99] इति सूत्रपर्यन्तं विश्लेषणं कृतमस्ति। अत्र अनभिहिते इति सूत्रे 'विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुम् असाम्प्रतम्' इति वाक्ये विषवृक्षोऽपि

---

[96] तदेव, पृ. ३७५.

[97] महा. भा. उ., द्वि. ख., पा. सू. २-३-१७, सम्पा. भार्गवशास्त्री जोशी, पृ. ५००.

[98] पा. सू. २-३-१.

[99] पा. सू. २-३-१७.

इति पदम् 'असाम्प्रतम्' इत्यनेन सह अन्वेति, न तु संवर्ध्य इत्यनेन, छेत्तुमित्यनेन सह, तथा अन्वये सति विषवृक्षशब्दाद् द्वितीया स्यात् इति प्राचीनमतम्।

परन्तु श्रीमन्नागेशः छेत्तुमित्यत्र तुमुनः साधुत्वम् इच्छति, इत्यध्याहृत्य विषवृक्षोऽपि सम्बर्ध्य छेत्तुम् इष्यते इति यत्, तत् असाम्प्रतम्– अयुक्तम् इत्याह। एवञ्च तिङैव कर्मणः अभिधानाद् द्वितीया न स्यात् अत्र, अतः परिगणवाक्ये प्रायेण इत्यस्य अध्याहारो विफलः इति *शब्देन्दुशेखरे* लिखितम्।

कर्मणि द्वितीया[100] इति सूत्रे तु उभयोः मतं समानं इति प्रतिभाति।

तृतीया च होश्छन्दसि[101] इति सूत्रे 'यवाग्वाऽग्निहोत्रं जुहोति' इति उदाहरणप्रसङ्गे *शब्दकौस्तुभ*कारः आहः यवाग्वभिन्नं हविः अग्नौ प्रक्षिपति इत्यर्थः। यवागूशब्दाद् तृतीया अग्निहोत्रशब्दाच्च द्वितीया। अग्निहोत्रशब्दः हविर्वाचकः, जुहोतिश्च प्रक्षेपणम् इत्यर्थः। तदेव *उद्द्योत*कारः मीमांसकानां मतमुल्लिख्य आह– "यत्तु मीमांसका अग्निहोत्रशब्दस्य कर्मनामधेयत्वं तत्प्रख्यन्यायात् स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासायिति दर्शनाच्च। एवं च करणभूते होमे समानाधिकरणस्याग्निहोत्रस्य करणत्वाद् तृतीयायां प्राप्तायां पक्षे द्वितीयार्थमिदम्। यवाग्वा अपि करणत्वादेव तृतीया सिद्धेति। तन्न सूत्रानुगुणम्, नापि भाष्यानुगुणं कर्मणीत्यनुवृत्तेः। एवं च यवाग्वाग्निहोत्रं जुहोतीत्यादिवाक्ये नामधेयत्वाभावः। अत एव यवागूमग्निहोत्रं जुहोतीत्यादिसिद्धिरिति दिक्"। अतः अत्र वक्तुं शक्यते यत्, मीमांसकाभिमते *शब्दकौस्तुभ*कार-*उद्द्योत*कारयोः समं मतम् अस्ति।

---

[100] पा. सू. २-३-२.

[101] पा. सू. २-३-३.

अन्तरान्तरेण युक्ते[102] इति सूत्रे 'अन्तरा त्वां माञ्च कमण्डलुः' इति उदाहरणे कारकविभक्तित्वेन प्रथमया बाधान्न कमण्डलुशब्दात् द्वितीया। एवञ्च अन्तरान्तरेण युक्तानामप्रधानग्रहणं कर्तव्यमिति वार्त्तिकं न कार्य्यमिति। कमण्डलुरस्ति इति योज्यम्। तेन तिङ्बोध्यकर्तृकारकबोधकत्वेन तिङ्समानाधिकरणे प्रथमा, उपपदविभक्तेः कारकविभक्तिर्बलीयसी इति न्यायात्। *उद्द्योत*कारेणापि प्रोक्तं– "सर्वत्र सम्बन्धस्य किञ्चित्क्रियाकारकभावमूलत्वात् यथा स्वत्वं क्रयादिनिबन्धनमिति भावः। युक्तिरत्र शिथिला सर्वत्र प्रथमाया एवापत्तेर्युष्मदाद्यर्थेऽपि सत्ताकर्तृत्वस्याव्यभिचारात्। न चैवं सूत्राणां वैयर्थ्यं न्यायानुगतेऽर्थे किं कुर्मः। तस्माद्वचनमेवेदम्। अत एव नमस्यति देवानित्यत्रानेन न्यायेन द्वितीयां वक्ष्यति भाष्यकृत्। तत्र हि क्रियाकारकभावेनैवान्वयादित्यन्ये। न च विशेषेण संबन्धस्योद्भूततया प्रतीतेस्तत्रैव षष्ठ्यपवादत्वेन सम्बन्धार्थिकैव द्वितीयेति वाच्यम्। प्रथमापवादत्वस्यापि सम्भव इत्याशयात्। उपपदविभक्तेरिति वचनात्तु षष्ठ्यपवादत्वमेव न प्रथमापवादत्वमित्युत्तराशयः। प्रथमाया अपि कारकविभक्तित्वं क्रियाजनकेऽर्थे तस्या अपि विधानादिति बोध्यम्। तदुक्तम्– कमण्डलोः कर्तृत्वं तिङाभिहितमिति" इति। अतः उभययोः मतं साधु इति निष्कर्षः।

कालाध्वनोरत्यन्तसंयोगे[103] इति सूत्रे तु *उद्द्योत*कारः *शब्दकौस्तुभ*कारस्य वचनमेव समर्थयति। अपवर्गे तृतीया[104] इति सूत्रे *शब्दकौस्तुभ*कारः अपवर्गः फलप्राप्तिः इति स्पष्टयति, भेदविषये किमपि नोक्तं, परन्तु *उद्द्योत*कारः द्वयोः अपवर्गयोः स्वरूपमाह–

[102] पा. सू. २-३-४.

[103] पा. सू. २-३-५.

[104] पा. सू. २-३-६.

“साधने आलस्यादिरहिते सत्यपि प्रयोजनलाभेन क्रियायाः समाप्तिः स क्रियापवर्गः। प्रयोजनालाभेन क्रियाया आवृत्त्यावश्यकत्वेऽपि आलस्यादिना क्रियातो निवृत्तिः साधनापवर्गः इति” इति। *शब्दकौस्तुभा*पेक्षया *उद्द्योत*टीकायाः व्याख्यानतः अपवर्गविषये विशेषप्रतिपत्तिः उत्पद्यते इति वक्तुं शक्यते। एवम् एन्येषां सूत्राणां विषये तथा किमपि मतभेदं नैव दृश्यते, उभययोः मतं मदीयज्ञानेन साधु प्रतिभाति इति शम्।

# षष्ठोऽध्यायः

## विभक्त्यर्थद्वितीयाह्निकविमर्शः

### 6.1. कर्तृकरणयोस्तृतीया (२-३-१८)।

वैयाकरणमते या या संज्ञा सा सा फलवती इति कर्तृकरणसंज्ञयोः फलम् आह– "कर्तृकरणयोस्तृतीया"[1]। अत्र उत्पत्त्यनुकूलव्यापारार्थककृधातोः कर्तरि तृच्-प्रत्यये गुणे, ततः रपरत्वे कर्तृशब्दः सम्पन्नः भवति। करणे ल्युट्-प्रत्यये करणशब्दः निष्पन्नः। "अनभिहिते"[2] इत्यनुवर्तते। अनुक्ते कर्तरि करणे च तृतीया विभक्तिर्भवति इत्यर्थः। कस्मात् तृतीया विधेया इत्याकाङ्क्षायां प्रत्यासत्त्या सूत्रे कर्तृकर्मणोरुपादानात् कर्तृसंज्ञावाचकात् प्रातिपदिकादित्यर्थः ज्ञेयः। कर्तृकर्मकरणादिसंज्ञाः न शब्दस्य परन्तु अर्थस्यैव, संज्ञावाचकत्वं शब्दे इति। 'रामेण बाणेन हतो वाली'। प्राणवियोगानुकूलव्यापारार्थकहन्धातुवाच्यव्यापाराश्रयत्वेन रामशब्दार्थस्य "स्वतन्त्रः कर्ता"[3] इत्यनेन कर्तृसंज्ञा भवति, तद्वाचकात् रामशब्दात् कर्तरि तृतीया विभक्तिः। शरार्थकबाणशब्दार्थस्य करणसंज्ञा। बाणव्यापारानन्तरमेव प्राणवियोगरूपं फलं जातमिति यद्व्यापारानन्तरं फलनिष्पत्तिस्तदेव प्रकृष्टोपकारकमिति बाणे तदस्ति। अस्य वाक्यस्य शाब्दबोधस्तावत् रामनिष्ठधनुष्कर्षणव्यापारजन्यो बाणनिष्ठशरीरभेदन व्यापारकरणकः प्राणवियोगरूपफलाश्रयो बाली। "प्रकृत्यादिभ्य उपसङ्ख्यानम्" (का.वा.)। प्रकृत्यादिगणपठितशब्देभ्यः तृतीया इत्यर्थः। भाष्यकारेणापि प्रोक्तं– "तृतीयाविधाने

---

[1] पा. सू. २-३-१८.

[2] पा. सू. २-३-१.

[3] पा. सू. १-४-५४.

प्रकृत्यादिभ्य उपसंख्यानं कर्त्तव्यम्”[4] इति। तृतीयाविभक्तिविधायकसूत्रसमीपे एतेषां प्रकृत्यादिशब्दानां ज्ञानं विधेयं तृतीयाविधानाय। आकृतिगणत्वाद् यत्र तृतीयाविभक्तिविधायकं वचनं नास्ति शिष्टप्रयुक्तश्च तृतीयान्तप्रयोगस्तत्रानेन तृतीया कार्य्या। ‘प्रकृत्या चारुः’। स्वभावेन सुन्दरोऽयं पुरुषः इत्यर्थः। प्रकृतिशब्दः स्वभाववाचकः। इदं तृतीयाविभक्तिविधायकं वार्त्तिकं सर्वविभक्तीनाम् अपवादभूतम्। अतः प्रकृतिसम्बन्धी चारुः इत्यर्थे षष्ठीं बाधित्वा तृतीया विभक्तिः। वस्तुतः प्रकृत्यादिभ्य उपसंख्यानम् इति वार्त्तिकम् अनारम्भणीयमेव, तथाहि– स्वभावेनायमभिरूपः कृतो न त्वलङ्कारादिना इत्यर्थे गम्यमानकृधातुवाच्यक्रियाकरणत्वात् करणतृतीयया ‘प्रकृत्या चारुः’ इति सिद्धं भवति। आचारादिबाहुल्येन याज्ञिकोऽयमिति जनैः ज्ञायते इति गम्यमानज्ञानक्रियां प्रति करणत्वेन ‘प्रायेण याज्ञिकः’ इति सिद्धम्। प्रायशब्दः बह्वर्थवाची। बहवः याज्ञिकाः इत्यर्थः। ‘गोत्रेण गार्ग्यः’। गोत्राभिन्नो गार्ग्यः इत्यर्थे प्रथमा, गोत्रसम्बन्धिगार्ग्यत्ववानित्यर्थे षष्ठी च न भवति। करणे तृतीया एव। ‘समेन पथा एति’, ‘विषमेण पथा एति’। उभयत्र समं यथा स्यात् तथा एति विषमं यथा स्यात् तथा एति इत्यत्र समार्थविषमार्थयोः क्रियाविशेषणत्वेन क्रियाविशेषणानां कर्मत्वं नपुंसकत्वमेकत्वञ्च इति द्वितीया प्राप्ता, पथोऽपि गमने करणत्वम्। ततः तृतीया। ‘द्विद्रोणेन धान्यं क्रीणाति’ इति परिच्छेद्य परिच्छेदकयोरभेदोपचारेण द्विद्रोणाभिन्नं धान्यमित्यर्थे द्वितीया प्राप्नोति। धान्ये परिच्छेद्यत्वम् द्रोणे परिच्छेदकत्वम्। द्वयोः द्रोणयोः समाहारः। पात्रादित्वात् स्त्रीत्वाभावः वर्तते। द्रोणद्वयसम्बन्धि धान्यम् इति वाक्यार्थः। द्विद्रोणपरिमितधान्यार्थे मूल्ये द्विद्रोणशब्दः। तस्य च क्रियां प्रति करणत्वेन अत्र तृतीया विभक्तिः सिद्धा। एवम् अन्यत्रापि करणे तृतीया

---

[4] महा. भा., द्वि. ख., पा. सू. २-३-१८, सम्पा. भार्गवशास्त्री जोशी, पृ. ५००.

बोध्या। *महाभाष्ये* तु वार्त्तिकमिदं प्रत्याख्यातम्। तथा चोक्तम् *उद्द्योते*– “सम्बन्धसामान्यविवक्षायां षष्ठीबाधनार्थम् आवश्यत्वाच्चेत्याहुः। अनभिधानेन भगवता प्रत्याख्यातमित्यन्ये”[5] इति।

### 6.2. सहयुक्तेऽप्रधाने (२-३-१९)।

सहेन अप्रधाने इति वक्तव्ये युक्तग्रहणसामर्थ्यात् सहार्थपरत्वं तेन सहशब्दसमानार्थकाः सहसाकसार्धप्रभृतयः ये शब्दाः, तेषां योगे अप्रधानवाचकशब्दात् तृतीया विभक्तिः। अतः *शब्दकौस्तुभ*कारेण प्रोक्तं– “सहार्थेन युक्ते”[6] इति। भाष्यकारेण अत्र उदाहृतं– ‘तिलैः सह माषान्वपति’। वाक्येऽस्मिन् माषा उप्यमानत्वात् प्रधानं कर्म। तिलास्तु तथायुक्ततया वृक्षमूलानीवोपसर्पणे अप्राधनकर्माणीति द्वितीयाप्राप्तायां तृतीया विभक्तिः। अत्र *भाष्य*कारः आक्षिपति यत्– “तिलैः मिश्रीकृत्य माषा उप्यन्ते। तत्र करणे इत्येव सिद्धम्”।[7] समाधानान्तरभाष्यमाह– “इदं तर्हि– पुत्रेण सहागतो देवदत्त इति। अप्रधाने कर्तरि हि तृतीया यथा स्यात्”।[8] देवदत्तस्य एव अत्र आगमनक्रियायां शाब्दं कर्तृत्वं न तु पुत्रस्येत्यप्राप्ता तृतीया विधीयते। *शब्दकौस्तुभे*- ‘पुत्रेण सहागतः पिता’ इत्युदाहृतम्। अत्र आगमनक्रियायां पितुः साक्षात् अन्वयः भवति, न तु पुत्रस्य। अतः पुत्रप्रतियोगिकसाहित्यानुयोग आगमनक्रियाश्रयः पिता इति बोधः। तथा चोक्तं

---

[5] महा. भा., द्वि. ख., पा. सू. २-३-१८, सम्पा. भार्गवशास्त्री जोशी, पृ. ५०१.

[6] श. कौ., द्वि. ख., पा. सू. २-३-१९, सम्पा. गोपालशास्त्री, पृ. २३०.

[7] महा. भा., द्वि. ख., पा. सू. २-३-१९, सम्पा. भार्गवशास्त्री जोशी, पृ. ५०१.

[8] तत्रैव.

*शब्दकौस्तुभ*कारेण- "पितुरत्र क्रियासम्बन्धः शाब्दः, पुत्रस्य तु आर्थ इति तस्याप्राधान्यम्। सहेऽप्रधाने इत्येव वाच्ये युक्तग्रहणादर्थग्रहणम्। पुत्रेण सार्धम्। विनापि सहशब्देन तदर्थावगतौ स्यादेव, तथा च सौत्रप्रयोगः।"[9] इति। तेन पुत्रेण इत्यपि सिद्ध्यति। सहशब्देन विना अपि सहार्थप्रतितौ तृतीया तु स्यादेव, तथा च पाणिनिप्रयोगः "वृद्धो यूना तल्लक्षणश्चेद्[10]"। सूत्रे प्रधानग्रहणं शक्यमकर्तुं, यदि च प्रधानग्रहणं न क्रियते तदा यथैव पुत्रशब्दात् तृतीया तथैव पितुरपि तृतीयापत्तिः स्यात्। किन्तु स दोषः नास्ति, यतो हि अल्पापेक्षा अन्तरङ्गं बह्वपेक्षा बहिरङ्गम् इति धिया प्रातिपदिकार्थमात्रापेक्षत्वात् अन्तरङ्गत्वेन पितृशब्दात् प्रथमोपत्तिः भविष्यति। एवञ्च शब्दकौस्तुभकाराशयेन प्रधानग्रहणम् अकर्तुं शक्यम् इति सिद्ध्यति।

सूत्रेऽस्मिन् अप्रधानग्रहणं न कार्यम्। न च तदभावे प्रधानात् तृतीयाविभक्तेः आपत्तिः, उपपदविभक्तेः कारकविभक्तिर्बलीयसी इति न्यायेन प्रथमया तृतीयाया बाधात्। प्रथमाया अपि कारकविभक्तित्वमस्त्येव। अत एव तिङ्बोध्यकारकबोधकत्वं प्रथमायास्तेन "तिङ्समानाधिकरणे प्रथमा" इति सङ्गतम्।

सूत्रस्यास्य प्रत्याख्यानवार्त्तिकं भाष्यकारेण प्रोक्तं– "सहयुक्तेऽप्रधान-वचनमनर्थकमुपपदविभक्तेः कारकविभक्तिर्बलीयस्त्वादन्यत्रापि"[11] इति। अर्थात् "अप्रधानवचनं प्रधाननिवृत्त्यर्थं क्रियते प्रधानस्य चान्तरङ्गत्वात् कारकविभक्तिर्भविष्यति इति नार्थस्तन्निवृत्त्यर्थेनाप्रधानवचनेनेत्यर्थः। शिष्येण सहोपाध्यायस्य गौरित्यत्रापि गवा

---

[9] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. २३०.

[10] पा. सू. १-२-६५.

[11] महा. भा., द्वि. ख., पा. सू. २-३-१९, सम्पा. भार्गवशास्त्री जोशी, पृ. ५०२.

संबन्धोऽन्तरङ्ग इति उपाध्यायात् षष्ठ्येव भविष्यति न तृतीया। गाः स्वामी व्रजतीति। अत्रापि व्रजिक्रियायां गवां कर्मत्वात्तन्निबन्धना द्वितीया स्वामीश्वरेति प्राप्ते उपपदविभक्ती षष्ठीसप्तम्यौ बाधित्वा प्रवर्तते"[12]।

### 6.3. येनाङ्गविकारः (२-३-२०)।

बुद्धिविशेषविषयत्वोपलक्षिततत्तद्धर्मावच्छिन्ने त्यदादिशब्दानां शक्तिः इति सन्निधानात् येन इति सर्वनाम्ना प्रकृत्यर्थविशेषणत्वेनोपस्थितावयवोऽत्र गृह्यते, स चार्थाद्विकृत एव अस्ति। अविकृतेनावयवेन शरीरस्य विकारः न सम्भवति। अङ्गशब्दः अत्र अर्शआद्यजन्तः, अतः अङ्गपदेन अङ्गिनो ग्रहणमस्ति। तत्राह *शब्दकौस्तुभे*– "येन शरीरविकारो लक्ष्यते ततस्तृतीया स्यात्"[13] इति। 'अक्ष्णा काणः' इत्यत्र अक्षि विकृतम्, तेन अङ्गिनो विकारः लक्ष्यते। अतः अक्षिशब्दात् तृतीया।

यद्यपि काणत्वं नेत्रस्य धर्मः अस्ति, व्यक्तेः नास्ति, तथापि अवयवस्य धर्मः शरीरे शरीरावच्छिन्ने आत्मनि चापि व्यवह्रियते। अतः *शब्दकौस्तुभ*कार आह– "यद्यप्यक्ष्येव काणं तथापि तद्योगाच्छरीरेऽपि व्यवहारो निरूढः"[14] इति। अक्ष्णा काणः इत्यस्यार्थः अक्षिसम्बन्धिकाणत्वदोषयुक्तः अयं जनः। काणत्वं[15] नाम लेशतोऽपि दर्शनशून्यत्वम्। 'काणेन चक्षुषा किं वा चक्षुः पीडैव केवलम्' इति प्रयोगदर्शनात्। किञ्च

---

[12] महा. भा. प्र., द्वि. ख., पा. सू. २-३-१९, सम्पा. भार्गवशास्त्री जोशी, पृ. ५०१.

[13] श. कौ., द्वि. ख., पा. सू. २-३-२०, सम्पा. गोपालशास्त्री, पृ. २३०.

[14] तत्रैव.

[15] ल. श. शे., का. प्र., सम्पा. तेजपालः शर्मा, "लेशतोऽपि दर्शनसामर्थ्यहीनत्वं काणत्वम्", पृ. ३२८.

शरीरावयवनेत्रसम्बन्धिकाणत्वं शरीरे आरोप्यते इति ‘चैत्रः काणः’ इति लोके व्यवहारः दृश्यते। ईदृशरीत्या साधुत्वे च इदं सूत्रमेव प्रमाणम्।

सूत्रेऽस्मिन् अङ्गविकारः इत्येतन्नोच्यते तदा को दोषः इति आकाङ्क्षायामुच्यते अक्षि काणमस्य इत्यत्र केवलम् अङ्गस्य अक्ष्णः विकारेऽपि तस्मात् तृतीया विभक्तिः प्रसज्येत। अत्र अङ्गिनो विकारः न लक्ष्यते। अतः तृतीया विभक्तिरपि न भवति। करणतृतीयान्तेन “येनावयवेन समुदायोऽङ्गी द्योत्यते तस्मिन् भवितव्यम्”[16] इति भाष्यकारीयव्याख्यानतः ‘अक्षि काणमस्य’ इत्यत्र तृतीया विभक्तिः न।

### 6.4. इत्थम्भूतलक्षणे (२-३-२१)।

अयं प्रकारः इत्यर्थे इदम्शब्दात् थमुप्रत्यये इत्थम् इति। तं प्राप्तः इत्यर्थे भू-प्राप्तौ इति चौरादिकाद्धातोः आधृषाद्वेति नियमेन णिचोऽभावपक्षे “गत्यर्थाकर्मकश्लिषशीङ्स्था-सवसजनरुहजीर्यतिभ्यश्च”[17] इत्यनेन कर्तरि क्तप्रत्यये कृते इत्थम्भूतः इति भवति। तथा चोक्तं *लघुशब्देन्दुशेखरे*– “इत्थंशब्दः प्रकारमात्रपरः। प्राप्त्यर्थाद् भुवः कर्तरि क्तः। कर्मविभक्त्यन्तेत्थंशब्देन समासः”[18]। लक्ष्यते अनेन इति करणे ल्युटि लक्षणं भवति। लक्षणम् इत्यस्य अर्थो भवति ज्ञापकम्। अतः प्रकारविशेषं प्राप्तस्य ज्ञापके तृतीया

---

[16] महा. भा., द्वि. ख., पा. सू. २-३-२०, सम्पा. भार्गवशास्त्री जोशी, पृ. ५०३.

[17] पा. सू. ३-४-७२.

[18] ल. श. शे., का. प्र., पा. सू. २-३-२१, सम्पा. तेजपालः शर्मा, पृ. ३२८.

विभक्तिः जायते। तथा च *शब्दकौस्तुभे*– “कञ्चित् प्रकारं प्राप्त इत्थम्भूतस्तल्लक्षणे तृतीया स्यात्”[19]।

‘जटाभिः तापसः’। वाक्येऽस्मिन् तापसत्वादिविशिष्टतापसादेर्ज्ञानं जटादिना इति तद्वाचकजटादिपदरूपलक्षणवाचकात् तृतीया विभक्तिः जाता। किञ्च स्वज्ञानजन्यज्ञानविषयत्वमर्थः। एवञ्च जटाज्ञानजन्यज्ञानविषयत्वं तापसत्वं तद्वानित्यर्थः। यद्यपि जटाभिस्तापसो ज्ञात इत्यर्थे ज्ञानक्रियायां करणत्वात् करणतृतीयया गतार्थत्वेऽपि करणत्वाविवक्षायां तृतीया विधानार्थं सूत्रमिदम्। किञ्च लक्ष्यलक्षणभावमात्रविवक्षायामनेन तृतीया विभक्तिः। केचित्तु ज्ञापकत्व-स्थापकत्व-उत्पादकत्वभेदेन त्रिविधहेतोः “हेतौ”[20] इति सूत्रे ग्रहणेन ‘जटाभिः तापसः’ इत्यादौ “हेतौ” इत्यनेन सूत्रेण तृतीया विभक्तिः सिद्धा भवति। अतः सूत्रे लक्षणपदं भावप्रत्ययान्तत्वेन ज्ञानपरम्। जनकत्वं सप्तम्यर्थः। तथा च प्रकारविशिष्टविषयकज्ञानजनकत्वात् तृतीया विभक्तिः इति।

अत्र इदं ज्ञेयं यत्– लक्षणवाचकपदाप्रयोज्या यत्रेत्थंभूतस्य उपस्थितिस्तत्रैवानेन तृतीया विभक्तिः। तेन कमण्डलुपाणिं छात्रमद्राक्षीत् इत्यादौ कमण्डलुशब्दात् न तृतीया विभक्तिः। न च उत्पन्नायास्तृतीयायाः “सुपो धातुप्रातिपदिकयोः”[21] इत्येनन लुक्, कृते समासे उत्पन्नायास्तस्याः समासरूपप्रातिपदिकानवयवत्वात् इति।

---

[19] श. कौ., द्वि. ख., पा. सू. २-३-२१, सम्पा. गोपालशास्त्री, पृ. २३०.

[20] पा. सू. २-३-२३.

[21] पा. सू. २-४-७१.

नागेशाचार्यमते तु कमण्डलुपाणिशब्दात् तृतीयापत्तिः, कमण्डलुयुक्तपाणिरूपस्य कमण्डलुपाणित्वस्य लक्षणत्वेन तस्यैव तद्वाचकत्वात्। तदुक्तम्– "अनुर्लक्षणे"[22] इति सूत्रे भाष्ये– सकृदसौ कमण्डलुपाणिच्छात्रो दृष्टस्तस्य तदेव लक्षणम् इति। तदेव इत्युक्ते कमण्डलुपाणित्वमेव। कमण्डलोर्लक्षणत्वे तु स एवेति वदेत्। एवञ्च तन्मध्यपतितन्यायेन तद्विशिष्टस्य प्रातिपदिकत्वेन प्रातिपदिकानवयवोक्तिरसङ्गता स्यात् इति लुको दुर्वारत्वम्। अत एव 'नरं मन्यः' इत्यादौ इजन्तस्योत्तरपदत्वाय पूर्वं सुपो लुकि उत्पन्नस्यामः सुपो धातुप्रातिपदिकयोः[23] इति लुक् अम्विधानसामर्थ्येन वारितः "इच एकाचोऽम्प्रत्ययवच्च"[24] इति सूत्रभाष्ये।

नागेशाचार्यस्य मतम् अयुक्तमिति आलोचकाः वदन्ति। तथा हि– यदुक्तं नागेशेन स एव वदेत् इति तन्न युक्तम्, उद्देश्यविधेययोरैक्यमापादयत् सर्वनाम पर्य्यायेण तत्तल्लिङ्गभाग् भवति इति लक्षणशब्दानुरोधेन नपुंसकत्वोक्तिः। तन्मध्यपतितस्य तत्समुदायनिष्ठोद्देश्यतानिरूपितविधेयताश्रयस्यैव तद्ग्रहणेन ग्रहणात्। 'नरम्मन्यः' इत्यत्र समुदायस्यापि उद्देश्यत्वं परम्परया अस्त्येवेति भाष्यविरोधः नास्ति। कमण्डलुपाणिशब्दात् तृतीयाविभक्तेः आपत्तिः तु न भवति, कारकविभक्तित्वेन द्वितीयायाः बाधात् इति।

---

[22] पा. सू. १-४-८४.

[23] पा. सू. २-४-७१.

[24] पा. सू. ६-३-६८.

### 6.5. संज्ञोऽन्यतरस्यां कर्मणि (२-३-२२)।

अनभिहिते इत्यधिकारः। तृतीया इति अनुवृत्तिरायाति। सम्पूर्वकज्ञाधातुवाच्य-व्यापारजन्यफलाश्रयवाचकात् प्रातिपदिकात् तृतीया विभक्तिः विकल्पेन भवति। तथा *शब्दकौस्तुभे*– "सम्पूर्वस्य जानातेः कर्मणि तृतीया वा स्यात्"।[25] अत्र तृतीयायाः अर्थः कर्मत्वशक्तिः। अतः आचार्येण नागेशेन *लघुशब्देन्दुशेखरे* प्रोक्तं– "कर्मत्वशक्तिरेवात्र तृतीयार्थः"।[26] पित्रा पितरं वा संजानीते। पितरं सम्यक् जानीते इत्यर्थः। तृतीयायाः अभावपक्षे कर्मणि द्वितीया विभक्तिः। 'संजानीते' इत्यत्र "सम्प्रतिभ्यामनाध्याने"[27] इत्यनेन सूत्रेण आत्मनेपदम्। कृदन्ततदादियोगे किन्तु तृतीयां द्वितीयां च परत्वात् प्रबाध्य "कर्तृकर्मणोः कृतिः"[28] इत्यनेन षष्ठी विभक्तिः एव। यथा– 'पितुः संज्ञाता' इति। आध्यानरूपार्थे पित्रा पितरं संजानाति इति भवति। केचन तु आध्यानेऽर्थे "अधीगर्थदयेशां कर्मणि"[29] इत्यनेन षष्ठी– मातुः संजानाति इति तदयुक्तं, तत्र सूत्रे शेषाधिकारसत्त्वात् इति। *भाष्य*कारेणापि प्रोक्तं– "कृत्प्रयोगे षष्ठ्या अवकाशः – इध्मप्रव्रश्चनः पलाशशातनः। इहोभयं प्राप्नोति– मातुः संज्ञाता, पितुः संज्ञाता इति। षष्ठी भवति विप्रतिषेधेन"।[30]

---

[25] श. कौ., द्वि. ख., पा. सू. २-३-२२, सम्पा. गोपालशास्त्री, पृ. २३०.

[26] ल. श. शे., का. प्र., सम्पा. तेजपालः शर्मा, पृ. ३३१.

[27] पा. सू. १-३-४६.

[28] पा. सू. २-३-६५.

[29] पा. सू. २-३-५२.

[30] महा. भा., द्वि. ख., पा. सू. २-३-२२, सम्पा. भार्गवशास्त्री जोशी, पृ. ५०४.

## ६.६. हेतौ (२-३-२३)।

हेतुः अत्र लौकिकः, न तु "तत्प्रयोजको हेतुश्च"[31] इति कृत्रिमसंज्ञापरः, तस्य चकारेण कर्तृसंज्ञायाः अपि विधानेन तत्र "कर्तृकरणयोस्तृतीया" इति कर्तृत्वादेव तृतीयासिद्धत्वात्। हेतोरपि करणत्वादेव तृतीया सिद्धेत्याशङ्क्य हेतुत्वकरणत्वयोः भेदः वक्तव्यः। हेतुत्वम् इत्युक्ते द्रव्यगुणक्रियानिरूपितं निर्व्यापारसव्यापारवृत्तित्त्वरूपम्। करणत्वम् इत्युक्ते क्रियामात्रनिरूपितं व्यापारवद्वृत्ति च इति। *सिद्धान्तकौमुद्यां*– "द्रव्यादिसाधारणं निर्व्यापारसाधारणं च हेतुत्वम् इति"।[32] अर्थात् द्रव्यगुणक्रियात्मककार्यनिरूपितं निर्व्यापारसव्यापारवृत्ति च यत् तत् हेतुत्वम् इति। "करणत्वं तु क्रियामात्रविषयव्यापारनियतं च"।[33] अर्थात् क्रियाजनकमात्रवृत्तिव्यापारवद्वृत्ति च यत् तदेव करणत्वम्। हेतुविषये *प्रदीपे* उक्तं– "योग्यतामात्रयुक्तोऽनाश्रितव्यापारोऽर्थो द्रव्यगुणक्रियाविषयो हेतुः"।[34] *उद्द्योते* तावदुक्तं– "व्यापारानाविष्टत्वे द्रव्यगुणक्रियाविषयत्वे च हेतुर्योग्यतामात्रयुक्त इति। व्यापाराविष्टं क्रियामात्रविषयं च करणं, व्यापारावेशे च क्रियाविषयत्वमेव फलोपधानमेवेति ततो भेदः इति भावः"।[35]

द्रव्यं प्रति हेतोः उदाहरणं– 'दण्डेन घटः'। दण्डहेतुकः घटः इत्यर्थः भवति। अत्र दण्डे व्यापारसत्त्वेऽपि क्रियाजनकत्वाभावात् न करणत्वम्। गुणं प्रति हेतोः उदाहरणं –

---

[31] **प्रेषणाध्येषणे कुर्वन् तत्समर्थानि चाचरन्।**
**कर्तैव विहितां शास्त्रे हेतुसंज्ञा प्रपद्यते॥** वाक्यपदीये, ३/१२५.

[32] वै. सि. कौ., प्र. भा., पा. सू. २-३-२३, पृ. ६४०.

[33] तत्रैव.

[34] महा. भा. प्र., द्वि. ख., पा. सू. २-३-२३, सम्पा. भार्गवशास्त्री जोशी, पृ. ५०४.

[35] महा. भा. उ., द्वि. ख., पा. सू. २-३-२३, सम्पा. भार्गवशास्त्री जोशी, पृ. ५०५.

'कोपेन रक्तः'। कोपहेतुकः रक्तत्वान् इत्यर्थः। क्रियां प्रति हेतोः उदाहरणं– 'पुण्येन दृष्टः हरिः'। वाक्येऽस्मिन् पुण्यपदं यज्ञादिसत्कर्मनिष्ठजनकतानिरूपितजन्यतावदपूर्वपरम्, अपूर्वन्तु यावत्पर्यन्तं तत्सम्पाद्य कार्यं न जातं तावत्कालपर्यन्तं विद्यते एव, पुण्यस्य ध्वंसेऽपि तज्जन्यस्यापूर्वस्य विद्यमानत्वात्।

अत्र अपूर्वस्य हरिदर्शनरूपक्रियान्वयित्वसम्भवेऽपि व्यापारवत्त्वाभावेन न तस्य करणत्वम्। यागादिकमेव पुण्यशब्देन उच्यते तदा तस्य करणत्वे तु पुण्येन गौरवर्णः इति उदाहरणं ज्ञेयम्। ननु 'जटाभिः तापसः' इत्यत्र अनेन तृतीया कुतो न इति चेन्न, तत्र हेतुत्वाविक्षायां लक्ष्यलक्षणभावविवक्षायां तृतीयाविधानार्थम् इत्थंभूतलक्षणे इत्यस्य आवश्यकत्वात् इति। पुनः शङ्का उदेति– 'बाणेन हतः' इत्यादौ "हेतौ"[36] इत्यनेन तृतीयासिद्धौ "कर्तृकरणयोस्तृतीया"[37] इत्यत्र करणग्रहणं व्यर्थं स्यात्। संज्ञा तु करणाधिकरणयोश्च एतदर्थम् आवश्यकी। एवं सति उच्यते– क्रियासाधकतमं यत् व्यापारवत्त्वेन विवक्षितं चेत् करणं, नो चेत् हेतुः। द्रव्यसाधकतमस्य दण्डादेस्तु व्यापारवत्त्वेऽपि हेतुत्वमेव। किञ्च बाणव्यापारसाध्यप्राणवियोगाश्रयः इति व्यापाराविष्टत्वेन विवक्षायां हेतुत्वेनाविवक्षायां करणे तृतीयार्थं तत्र करणग्रहणं प्रयोजनम्।

*शब्दशक्तिप्रकाशिका*कारेण प्रोक्तं– "धनेन कुलं, दण्डेन घटः इत्यादौ व्यापारगर्भस्य करणत्वस्याप्रतीतावपि हेतुत्वप्रत्ययात् अभिघातेन क्रियेत्यादौ करणत्वस्य बाधाच्च तत्र जनकत्वरूपं हेतुत्वमेव तृतीयार्थः"।[38]

---

[36] पा. सू. २-३-२३.

[37] पा. सू. २-३-१८.

[38] श. श. प्र., द्वि. ख., सम्पा. श्रीगङ्गाधरन्यायाचार्यः, पृ. ३६७.

प्रकृतसूत्रे हेतुपदेन फलस्यापि ग्रहणं भवति। अतः *शब्दकौस्तुभे* आह– "तथा फलमपीह हेतुशब्देन गृह्यते"।[39] अत्र इह इति पदेन "हेतौ" इति सूत्रं विवक्ष्यते तदा इह सूत्रे हेतुपदेन फलत्वेन फलमपि ज्ञाप्यते। एवञ्च फलं तृतीयार्थः। 'अध्ययनेन वसति' इत्यस्मिन् वाक्ये अध्ययनाभिन्नफलजनको वर्तमानकालिको वास इति ज्ञेयः। यदा इह इत्यस्योदाहरणे इत्यर्थस्तदा हेतुत्वेन रूपेण फलमपि तृतीयार्थो भवति। तथा च अध्ययननिरूपितनिरूपनाय वसति इत्यपि सिद्ध्यति एव। तादर्थ्यविवक्षायां चतुर्थ्या सहानेन तृतीया भवति। तस्मादेव 'अध्ययनाय वसति' इत्यपि भवति। विशेषार्थस्तावत् अध्ययनस्य फलेन सह संसर्गः अभेदः। उपकारकत्वेन सह निरूपकता अस्ति।

### 6.7. अकर्तर्यृणे पञ्चमी (२-३-२४)।

कर्तृसंज्ञारहिते हेतुभूते ऋणे सति ऋणवाचकात् पञ्चमी भवति। तथा च प्रोक्तं *शब्दकौस्तुभे*– "कर्तृवर्जितं यदृणं हेतुभूतं, ततः पञ्चमी स्यात्"।[40] "ऋणत्वं वस्तुसन्निमित्तं, न तु तृतीयावाच्यकोटिनिविष्टम्"।[41] 'शताद् बद्धः'। केनचित् कस्माच्चित् शतं ऋणरूपेण गृहीतम्। नियतसमये तस्य ऋणस्य प्रत्यर्पणाभावे सति ऋणहेतुना सः अधमर्णः बद्धः, अर्थात् बन्धनदण्डेन दण्डितः इति वाक्यार्थो भवति। अत्र शतशब्दः कर्तृसंज्ञारहितः,

---

[39] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पा. सू. २-३-२३, पृ. २३१.

[40] तदेव, पा.सू. २-३-२४.

[41] ल. श. शे., का. प्र., पा. सू. २-३-२४, सम्पा. तेजपालः शर्मा, पृ. ४०१.

ऋणवाचकः। बद्धक्रियायां हेतुभूतः। अत एव "हेतौ" इति प्राप्तां तृतीयां बाधित्वा "अकर्तर्यृणे पञ्चमी"[42] इति सूत्रेण पञ्चम्यां विहितायां शताद् इति।

ननु सूत्रे अकर्तरि इति पदं किमर्थम्। तदोच्यते– 'शतेन बन्धितः'। यदि सूत्रे अकर्तरि इति नोच्येत तदा हेतुभूत-ऋणवाचकात् पञ्चमी स्यादिति सूत्रार्थः स्यात्। तदा 'शतेन बन्धितः' शतेन प्रयोजककर्त्रा ऋणेन बन्धनं कारितः, इत्यर्थके वाक्ये शतशब्दात् पञ्चम्या आपत्तिः स्यात्। अत्र शतेन इति कर्तृसंज्ञकमस्ति, अतो न भवति पञ्चमी। अत्र एवं बोध्यं– हेतुमण्ण्यन्ताद् बन्धिधातोः कर्मणि क्तप्रत्यये बन्धितः इति भवति। ण्यन्तावस्थायाः रूपं शतेन बन्धितः इत्यस्ति। अण्यन्तावस्थायां शताद् अधमर्णः बद्धः इति भवति। अत्र शतं बन्धेन हेतुः। ण्यन्तावस्थायां शतेन अधमर्णः उत्तमर्णेन बन्धितः इति भवति। अर्थात् शतेन प्रयोजककर्त्रा अधमर्णः उत्तमर्णेन प्रयोज्यकर्त्रा बन्धनं कारितः इत्यर्थके शतेन बन्धितः इति वाक्ये शतम् इति प्रयोजकत्वात् कर्तृसंज्ञं हेतुसंज्ञञ्चास्ति। तत्र सूत्रं प्रमाणं– "तत्प्रयोजको हेतुश्च"[43] इति। शतशब्दात् अप्रधाने कर्तरि कर्तृकरणयोरिति तृतीया भवति। यदि सूत्रे अकर्तरि इति पदं न भवेत्तदा अत्रापि तृतीयां बाधित्वा पञ्चमी विभक्तिः स्यादिति दोषः। तन्निवारणार्थम् अकर्तरि इति पदं देयम्।

### 6.8. विभाषा गुणेऽस्त्रियाम् (२-३-२५)।

गुणे हेतौ अस्त्रीलिङ्गे विकल्पेन पञ्चमी विभक्तिः विधीयते। 'जाड्यात् जाड्येन वा बद्धः'। मूर्खस्य भावः जाड्यम् इति। जाड्यशब्दः गुणवाचकः बन्धने हेतुभूतः अस्त्रीलिङ्गश्च

[42] पा. सू. २-३-२४.

[43] पा. सू. १-४-५४.

तेन पञ्चमी विभक्तिः, पक्षे हेतौ तृतीया विभक्तिः च भवति। 'धनेन कुलम्' इत्यत्र धनशब्दः द्रव्यवाचकः न प्रधानतया गुणवाचक इति न पञ्चमी विभक्तिः, परन्तु तृतीया विभक्तिः एव। धनहेतुकं कुलमस्य प्रशंसनीयम् अस्ति। प्रशंसायां बीजं धनमेव। 'बुद्ध्या मुक्तः' इत्यादौ बुद्धिशब्दस्य स्त्रीलिङ्गत्वेन न पञ्चमी विभक्तिः। बाहुलकं प्रकृतेस्तु न दृष्टेः इति वार्त्तिकनिर्देशज्ञापकात् अत्र विभाषा इति योगः। तस्मादेव अगुणे स्त्रियाञ्च शिष्टप्रयोगानुरोधेन विकल्पेन पञ्चमी विभक्तिः, योगविभागस्य इष्टार्थसिद्धेः।

*शब्दकौस्तुभ*कारेण उक्तम्– "इह विभाषा इति योगो विभज्यते तेनागुणेऽपि क्वचिद्भवति, एवं स्त्रियामपि"।[44] योगविभागस्य फलं तावत्– 'धूमादग्निमान्'। "धूमपदं स्वज्ञानेऽग्निमत्पदं स्वज्ञानविषये लाक्षणिकं बोध्यम्"।[45] ज्ञाननिष्ठजन्यजनकभावस्य विषये आरोपबोधेन धूमज्ञानजन्यं वह्निज्ञानमिति बोधः। भूतले घटो नास्ति, कथम्। अनुपलब्धेः, यदि स्यात्तदा उपलभ्येत नोपलभ्यतेऽतो नास्तीति। स्त्रीलिङ्गानुपलब्धिशब्दा योगविभागेन विभक्तेन 'विभाषा' इति सूत्रेण पञ्चमी विभक्तिः। वस्तुतः दार्शनिकस्वीकृतमनुपलब्धिरूपं प्रमाणं नास्ति इति।

### 6.9. षष्ठी हेतुप्रयोगे (२-३-२६)।

हेतौ इत्यनुवर्तते। हेतुशब्दस्य प्रयोगे हेतुत्वे द्योत्ये च हेतुवाचकात् शब्दात् षष्ठी स्यात्। एवं *शब्दकौस्तुभे* – "हेतौ द्योत्ये षष्ठी स्यात्"।[46] 'अन्नस्य हेतोर्वसति'। वासे अन्नं हेतुः

---

[44] श. कौ., द्वि. ख., पा. सू. २-३-२५, सम्पा. गोपालशास्त्री, पृ. २३१.

[45] ल. श. शे., का. प्र., पा. सू. २-३-२५, सम्पा. तेजपालः शर्मा, पृ. ४०२.

[46] श. कौ., द्वि. ख., पा. सू. २-३-२६, सम्पा. गोपालशास्त्री, पृ. २३१.

अस्ति। अन्नप्राप्तिनिमित्तको चैत्रकर्तृको वर्तमानकालिकः स्थित्यनुकूलव्यापारः। सूत्रे हेतुप्रयोगे इति पदाभावे अन्नेन वसति इत्यत्रापि षष्ठी प्रसज्येत। किञ्च हेतौ इत्यस्य अनुवृत्त्यभावे अन्नस्य हेतोस्तुभ्यं नमः इत्यत्र युष्मच्छब्दे हेतुत्वाभावेऽपि षष्ठी प्रसज्येत।

### 6.10. सर्वनाम्नस्तृतीया च (२-३-२७)।

षष्ठी हेतुप्रयोगे इत्यनुवर्तते। चकारात् हेतौ इति सम्बध्यते। तृतीयायाः अभावपक्षे षष्ठी विभक्तिः। तेन हेतौ द्योत्ये षष्ठी भवति, कस्मादित्याकाङ्क्षायां सामीप्यात् सर्वनाम्नः हेतोश्चेति गम्यते। अतः हेतौ द्योत्ये सर्वनाम्नः हेतुशब्दात् च तृतीया-षष्ठ्यौ भवतः। केन हेतुना वसति, कस्य हेतोः इत्यत्र "षष्ठी हेतुप्रयोगे"[47] इति सूत्रं प्रबाध्य "सर्वनाम्नस्तृतीया च"[48] इति सूत्रेण सर्वनामसंज्ञकात् किम्-शब्दात्, हेतुशब्दाच्च तृतीयायां कृतायां केन हेतुना इति भवति। षष्ठी विभक्तौ कस्य हेतोः इति। निमित्तार्थकाः ये शब्दाः, तेषां प्रयोगे सर्वविभक्तिः भवति, अतः आह– "निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम्" (का.वा.)। किं निमित्तमिति। इदं प्रथमान्तं द्वितीयान्तमपि समानमेव। केन कस्मै कस्मात् कस्य कस्मिन्नित्यपि ज्ञेयम्। एवं कारणशब्दप्रयोजनशब्दयोगेऽपि सर्वविभक्तिदर्शनम्। इष्टानुरोधेन वार्त्तिके प्रायग्रहणेन असर्वनाम्नः प्रथमाद्वितीये न स्त इति। भाष्यकारेणापि एवमुपस्थापितं – "निमित्तकारणहेतुषु सर्वाः प्रायेण दृश्यन्त इत वक्तव्यम्। किं निमित्तं वसति। केन निमित्तेन वसति। कस्मै निमित्ताय वसति। कस्मान्निमित्ताद्वसति। कस्य निमित्तस्य वसति। कस्मिन्निमित्ते वसति। किं कारणं वसति। केन कारणेन वसति। कस्मै कारणाय वसति।

[47] पा. सू. २-३-२६.

[48] पा. सू. २-३-२७.

कस्मात्कारणाद्वसति। कस्य कारणस्य वसति। कस्मिन्कारणे वसति। को हेतुर्वसति। कं हेतुं वसति। केन हेतुना वसति। कस्मै हेतवे वसति। कस्माद्धेतोर्वसति। कस्य हेतोर्वसति। कस्मिन्हेतौ वसति"।[49]

### 6.11. अपादाने पञ्चमी (२-३-२८)।

पञ्चम्याः अपादानमर्थः "अपादाने पञ्चमी" इति सूत्रात् बोध्यः। 'ग्रामाद् आगच्छति'। पञ्चम्यर्थम् अपादानं त्रिविधं –

**"निर्दिष्टविषयं किञ्चित् उपात्तविषयं तथा।**

**अपेक्षितक्रियं चेति त्रिधाऽपादानमुच्यते"**॥[50] इति।

**(1) निर्दिष्टविषयम् अपादानम्–** स्वशक्तिनिरूपकक्रियानिर्दिष्टः विषयः यस्य तदेव अपादानं निर्दिष्टविषयम्। यथा– 'ग्रामाद् आच्छति चैत्रः'। अत्र विभागरूपः अपायः ग्रामः चैत्रश्च। द्वयोः अपाये कर्तृत्वं वर्तते। ग्रामः अचलः, चैत्रश्च चलः। तत्तु धातुना साक्षात् निर्दिष्टः, तस्मादेव अत्र निर्दिष्टविषयम् अपादानं जातम्।

**(2) उपात्तविषयम् अपादानम्–** उपात्तः क्रियान्तरस्य गुणभावेन प्रधानभावेन वा यत्र अपायलक्षणो विषयः तद् अपादानम् उपात्तविषयम्। यथा– 'बलाहकाद् विद्योतते विद्युत्'। बलाहकात् निःसृत्य ज्योतिर्विद्योतते, बलाहकाद्वा विद्योतनं निःसरतीत्यर्थः। अत्र हि

---

[49] महा. भा., द्वि. ख., पा. सू. २-३-२३, सम्पा. भार्गवशास्त्री जोशी, पृ. ५०४.

[50] वा. प., ३/७/१३६.

निःसरणाङ्गे विद्योतने विद्योतनाङ्गे वा निःसरणे विद्युतिर्वर्तते इति निःसरणलक्षणः अपायः विद्योतनस्य गुणप्रधानभावेन उपात्तः।

**(3) अपेक्षितक्रियम् अपादानम्–** यत्र सर्वदा क्रियाशब्दस्य अनुपलब्धेः अश्रुता क्रियानुमीयमाना सम्बन्धिषु द्रव्येषु संज्ञाविशेषहेतूनां शक्तिभेदानाम् आविर्भावे निमित्तत्वाय कल्पते तत्र अपेक्षितक्रियम् अपादानम्। यथा– 'माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः'। अत्र प्रकर्षार्थकस्य तरप्-प्रत्ययस्य सामर्थ्याद् अपकर्षक्रिया अनुमीयते।

**"ल्यब्लोपे कर्मण्यधिकरणे चोपसंख्यानम्" (का.वा.)।** "ल्यब्ग्रहणं क्त्व उपलक्षणम्"[51] ल्यबन्तस्य प्रयोगाभावे तदर्थकस्य योगे प्रतीयमानकर्मणि अधिकरणे च पञ्चमी भवति। यथा– 'प्रासादात् प्रेक्षते' इत्यत्र प्रासादम् आरुह्य प्रेक्षते इति अर्थः। आरुह्य इति ल्यबन्तस्य प्रयोगः नास्ति, परन्तु तदर्थः प्रतीयते। तदर्थं प्रति प्रासाद इति कर्म। ततः पञ्चमी विभक्तिः। 'आसनात् प्रेक्षते' इत्यत्र आसने उपविश्य प्रेक्षते इत्यर्थः। अत्र उपविश्येति ल्यबन्तस्याप्रयोगे तदर्थं प्रति अधिकरणम् आसनम् अस्ति। ततः पञ्चमी विभक्तिः। 'श्वशुराज्जिह्रेति' इत्यत्र श्वशुरं वीक्ष्य लज्जते इति अर्थः। अत्र वीक्ष्येति ल्यबन्तस्याप्रयोगे तदर्थं प्रति श्वशुर इति कर्म, ततः श्वशुरशब्दात् पञ्चमी।

**"यतश्चाध्वकालनिर्माणं तत्र सप्तमी" (का.वा.)।** यच्छशब्दात् तृतीयार्थे तसि प्रत्यये कृते यतः इति। येन अवधि भूतेन इत्यर्थः। अध्वनः कालस्य च परिच्छेदः इयत्ता च इति अध्वकालनिर्माणम्। येन अवधिभूतेन अध्वनः कालस्य च परिच्छेदो भवति तस्माद् अवधिभूतात् पञ्चमी विभक्तिः भवति इत्यर्थः।

---

[51] महा. भा. उ., द्वि. ख., पा. सू. २-३-२८, सम्पा. भार्गवशास्त्री जोशी, पृ. ५०५.

**"तद्युक्तादध्वनः प्रथमासप्तम्यौ" (का.वा.)।** तेन युक्तः तत् युक्तः, तस्मात् तद्युक्तात्। तेन अवधिभूतपञ्चम्यन्तेन युक्ताद् अध्ववाचिशब्दात् प्रथमा सप्तमी च भवतः इत्यर्थः।

**"कालात्सप्तमी च वक्तव्या" (का.वा.)।** अत्र तद्युक्ताद् इत्यपि अनुवर्तते। अवधिभूतपञ्चम्यन्तेन युक्तात् कालवाचकात् सप्तमी भवति इत्यर्थः।

'वनाद् ग्रामो योजनं योजने वा' इत्यत्र योजनं मार्गपरिमाणम्। तच्च अनेन पूर्वावधिना परिच्छिद्यते। यतो हि कस्माद् इत्याकाङ्क्षायाम् अवधिभूतं वनमेवास्ति। अतः यतश्चाध्वकालनिर्माणं ततः पञ्चमी इति वार्त्तिकेन वनशब्दात् पञ्चमी भवति। वनात् इति जायते। वनात् इति पञ्चम्यन्तयुक्तात् मार्गवाचकात् योजनशब्दात् योजनशब्दात् प्रथमासप्तम्योः कृतयोः योजनं योजने वा इति भवति। अत्र यद्यपि वने अवधित्वमस्ति तथापि विश्लेषस्य प्रतीतेः अभावात् "ध्रुवमपायेऽपादानम्"[52] इत्यस्याप्रवृत्याम् अनेन पञ्चमी विभक्तिः।

'कार्तिक्या आग्रहायणी मासे'। कृत्तिकायुक्तपौर्णमास्या आरभ्य मासात्मकावधौ अग्रहणपूर्णिमा भवति इति वाक्यार्थः। अत्र मासरूपं कालपरिमाणं पूर्वावधिभूतया कार्तिक्या परिच्छिद्यते। अत एव कार्तिकीशब्दात् यश्चेति पञ्चमी। तद्युक्तात् कालवाचकात् मास इत्यस्मात् 'कालात्सप्तमी च वक्तव्या' इति सप्तम्यां कृतायां मासे इति भवति। कार्तिकशुक्लपूर्णिमातः अव्यवहितोत्तरत्रिंशद्दिवसकाले मार्गशुक्लपूर्णिमा भवति इति।

---

[52] पा. सू. १-४-२४.

### 6.12. अन्यारादितरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते (२-३-२९)।

सूत्रेऽस्मिन् शिष्टकृद्व्याख्यानात् अन्यपदेन शब्दस्वरूपग्रहणं नास्ति, परन्तु तदर्थग्रहणं तेन अन्यपर्यायवाचकशब्दयोगेऽपि पञ्चमी विभक्तिः। 'अन्यः, भिन्नः, इतरो वा कृष्णात्' इत्यत्र कृष्णशब्दात् पञ्चमी विभक्तिः। अन्यः भिन्नः भेदवान् भेदस्य प्रतियोगिनि नित्यसाकाङ्क्षत्वेन प्रकृते कृष्णत्वावच्छिन्नप्रतियोगिताकभेदाश्रयः अनुयोगी चैत्रादिपदार्थः इति ज्ञेयम्। अन्यपदेन पर्य्यायवाचकशब्दग्रहणेन पञ्चमी विभक्तिः इतरयोगेऽपि सिद्धा भवति, अतः सूत्रे इतर-ग्रहणं व्यर्थमेव स्यात्। तदुक्तम् इतरग्रहणं प्रपञ्चार्थम्।

ननु अन्यपदेन अन्यार्थग्रहणे नञोऽपि भेदबोधकत्वेन घटः पटो न इत्यत्र पञ्चम्यापत्तिरिति चेन्न, नञो द्योतकत्वेन शक्त्या भेदबोधकत्वाभावेन अदोषात्, निपातानां द्योतकत्वमेव इति सिद्धान्तात्। 'आरात् वनात्'। आ रातीति आरात्। वनस्य दूरं समीपो वा इत्यर्थः। 'ऋते कृष्णात्'। ऋतिः इति सौत्रो धातुः। कृष्णस्य वर्जने इत्यर्थः। अर्थात् कृष्णसाक्षात्कारं विना न सुखम् इति ज्ञेयम्। 'पूर्वो ग्रामात्'। ग्रामावधिकपूर्ववर्ती ग्राम इत्यर्थः। सूत्रेऽस्मिन् शब्दग्रहणसामर्थ्येन रूढ्या दिशायां दृष्टस्यैव दिक्शब्दस्य ग्रहणं, न तु यौगिकस्यैन्द्रादिशब्दस्य। पूर्वं कायस्य इत्यादौ कायस्य पूर्वोऽशः कायावयव इत्यर्थे अवयववाचकपूर्वशब्दयोगे, एवं परादिशब्दयोगे पञ्चमी विभक्तिः न, "तस्य परमाम्रेडितम्"[53] इति निर्देशात्। ननु सूत्रेऽस्मिन् दिक्शब्दग्रहणाद् अञ्चूत्तरपदस्य प्राङ्-आदिशब्दस्य दिक्शब्देनैव गतार्थत्वात् तद्व्यर्थमिति चेत् न, दिक्शब्दत्वेन प्राप्तां पञ्चमीं प्रबाध्य "षष्ठ्यतसर्थप्रत्ययेन"[54] इति षष्ठीबाधनार्थं सूत्रेऽस्मिन् अञ्चूत्तरपदग्रहणस्य

---

[53] पा. सू. ८-१-२.

[54] पा. सू. २-३-३०.

प्रयोजनत्वात्। 'प्राक् प्रत्यक् वा ग्रामात्'। अत्र प्राच्यां दिशि, प्रतीच्यां दिशि इत्यर्थे "दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः" इत्यनेन प्राची प्रतीची इत्याभ्याम् अञ्चूत्तरपदाभ्याम् अस्तातिप्रत्ययः। तस्य अञ्चतेर्लुक् इति लुकि सति लुक् तद्धितलुकि इत्यनेन ङीपो लुक् भवति। प्राक् प्रत्यक् चेति सिद्ध्यति।

सूत्रेऽस्मिन् दिक्शब्देन गतार्थत्वात् आच् आहिग्रहणञ्च व्यर्थं स्यात्। 'दक्षिणा ग्रामात्'। दक्षिणस्यां दिशि इत्यर्थे "दक्षिणादाच्"[55] इति आच्प्रत्ययः। 'दक्षिणाहि ग्रामात्'। "आहि च दुरे"[56] इत्यादिहप्रत्ययः। भवात् प्रभृति आरभ्य वा सेव्यो हरिः इत्यत्र प्रभृतियोगे पञ्चमीविधायकं वचनं नास्ति इति कथं पञ्चमी विभक्तिः इति आशङ्कानिराकरणाय कार्तिक्याः प्रभृति इति "अपादाने पञ्चमी"[57] इत्यत्र भाष्यप्रयोगात् प्रभृतियोगे पञ्चमी विभक्तिः इति ज्ञाप्यते।

वस्तुतः अत्र पूर्वोक्तज्ञपाकस्य उपयोगः न कर्तव्यः। ज्ञाप्यवचनमन्तरापि इष्टसिद्धिः भवेत्। तथा हि वस्तुतः अवधित्वं तस्य समभिव्याहृतपदार्थनिरूपितं गम्यमानक्रियापेक्षमित्यपादानत्वेन एव अत्र पञ्चमी विभक्तिः सिद्धा। कार्तिकीतो विभक्ते, अतः कार्तिक्यवधिके आग्रहायणीघटिते मासे कार्तिकीमादाय गते आग्रहायणीति ज्ञेयः। भवात् प्रभृति आरभ्य वा इत्यत्र भवकालात् विभक्ते, अतः भवावधिके मरणान्ते काले भवकालम् आदाय 'हरिः सेव्य' इति ज्ञेयः।

---

[55] पा. सू. ५-३-३६.

[56] पा. सू. ५-३-३७.

[57] पा. सू. २-३-२८.

'ग्रामात् बहिः'। "अपपरिबहिरञ्चवः पञ्चम्या"[58] इत्यनेन पञ्चम्यन्तशब्देन सह बहिः-इत्यस्य समासः जातः। तेन ज्ञायते यत् बहिर्योगे पञ्चमी विभक्तिः भवति। अतोऽत्र ग्रामशब्दात् पञ्चमी विभक्तिः कृता। अन्यथा पञ्चम्यन्तेन सह बहिरित्यस्य समासविधानं व्यर्थं स्यात्।

### 6.13. षष्ठ्यतसर्थप्रत्ययेन (२-३-३०)।

अतसर्थः दिग्देशकालरूपः अर्थः एव यस्य स अतसर्थप्रत्यय इत्युच्यते। तस्य अतसर्थप्रत्ययान्तस्य प्रयोगे षष्ठी भवति इत्यर्थः। प्रथमम् अस्तातीत्यस्योल्लेखात् सूत्रे अस्तात्यर्थप्रत्ययेन इत्यस्य प्रयोग उचितः आसीत्, परन्तु लाघवाद् अतसर्थप्रत्ययेन इति उच्यते। "अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते"[59] (२.३.२९) इत्यनेन दिग्शब्दयोगे विहितायाः पञ्चम्याः अपवादरूपेण बाधिका इयं षष्ठी विभक्तिः अस्ति। ग्रामस्य दक्षिणतः। अत्र 'दक्षिणस्यां, दक्षिणस्याः, दक्षिणा वा दिक्' इत्यर्थे दक्षिणाशब्दात् अतसुच्-प्रत्यये कृते दक्षिणतः इति भवति। एवमेव ग्रामस्य पुरः, पुरस्तात्, ग्रामस्य उपरि, उपरिष्टात् इत्येतेषु वाक्येष्वपि प्रकृतसूत्रेण ग्रामशब्दात् षष्ठी विभक्तिः बोध्या।

---

[58] पा. सू. २-१-१२.

[59] पा. सू. २-३-२९.

### 6.14. एनपा द्वितीया (२-३-३१)।

'एनबन्यतरस्याम्' इति विहितैनबन्तयोगे द्वितीया विभक्तिः भवति। तथा चोक्तं *शब्दकौस्तुभे* – "एनबन्तेन योगे द्वितीया स्यात्।"[60] 'एनपा' इति योगविभागः क्रियते। ततः षष्ठीम् अनुवृत्त्य षष्ठी विभक्तिः विधीयते। तेन ग्रामं ग्रामस्य दक्षिणेन इति सिद्ध्यति। एवमुत्तरेण योगेऽपि बोद्धव्यम्। परन्तु आचार्याय नागेशाय एतन्मतं न रोचते। नागेशेन प्रोक्तं – "भाष्ये तु न दृश्यते।"[61] एवं योगविभागे षष्ठ्याः अनुवृत्तिः न सम्भवति। अत्र कारणं तावत् "षष्ठ्यतसर्थप्रत्ययेन"[62] इति सूत्रात् पूर्वमेव "एनपा द्वितीया"[63] इति सूत्रस्य पाठः भाष्यसम्मतः, यस्य उपपादनं "पृथग्विनानाभिस्तृतीयान्यतरस्याम्"[64] इत्यस्य भाष्ये कृतम्।

### 6.15. पृथग्विनानाभिस्तृतीयाऽन्यतरस्याम् (२-३-३२)।

अस्मिन् सूत्रे मण्डूकप्लुत्या "अपादाने पञ्चमी" इत्यस्मात् सूत्रात् पञ्चमी इत्यनुवर्तते। "एनपा द्वितीया" इत्यस्मात् सूत्राच्च द्वितीया इत्यनुवर्तते। अन्यतरस्याम् इत्यस्य ग्रहणं विकल्पार्थेन समुच्चयार्थोऽपि वर्तते। अन्यथा तृतीया च इति लघुना पाठेनैव कार्यं सिद्ध्येत्। समुच्चयार्थकस्य अन्यतरस्यांग्रहणस्य सामर्थ्यादेव व्यवहितायाः पञ्चम्या अपि अनुवृत्याऽत्र समावेशः भवति। सा चानुवृत्तिः मण्डूकप्लुत्या एव सम्भवति। यतो हि षष्ठ्यतसर्थप्रत्ययेन इत्यत्र पञ्चमीति नानुवर्तते। तत्परित्यज्य अत्र व्यवहिते अनुवर्तते। पृथक् विना नाना इत्यतैः

---

[60] श. कौ., द्वि. ख., पा. सू. २-३-३१, सम्पा. गोपालशास्त्री, पृ. २३३.

[61] ल. श. शे., का. प्र., पा.सू. २-३-३१, सम्पा. तेजपालः शर्मा, पृ. ४१४.

[62] पा. सू. २-३-३०.

[63] पा. सू. २-३-३१.

[64] पा. सू. २-३-३२.

योगे तृतीया, पक्षे पञ्चमीद्वितीये च भवन्ति। वस्तुतः तृतीयाविधायकमिदं सूत्रम्। पक्षे पञ्चमीद्वितीये भवतः। अत्र सूत्रोक्ताः त्रयोऽपि शब्दाः भेदार्थकाः, वर्जनार्थकाः वा सन्ति। पृथक् रामेण रामात् रामं वा।

यत्तु अन्यतरस्य आम्– अङ्गीकारः इति पदद्वयमिति तन्न, विकल्पविषये अर्थासङ्गतेः। वस्तुतः "द्वितीयासमुच्चयो न फलं, 'विना वातं विना वर्षं विद्युतः पतनं विना' इत्यादौ ऋतेशब्दयोगे 'ततोऽन्यत्रापि दृश्यते' इत्यनेन द्वितीयासिद्धेः। अत एव भाष्ये द्वितीयासमुच्चयो नोक्तः। 'पञ्चम्या अधिकारे द्वितीया षष्ठीविषये प्रतिषेधो वक्तव्यः', 'दक्षिणेन ग्रामम्' 'दक्षिणतो ग्रामस्य' इति प्रकृतसूत्रस्य भाष्येण 'एनपा द्वितीया' इति सूत्रं 'षष्ठ्यतसर्थप्रत्ययेन' इत्यतः प्रागिति सूचितम्"।[65]

### 6.16. करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य (२-३-३३)।

करणे तृतीया विभक्तिः सिद्धा। पक्षे पञ्चमीविधायकमिदम्। सत्त्वम् इत्युक्ते द्रव्यम्। द्रव्यपदेनात्र सर्वनामपरामर्शयोग्यं लिङ्गनिरूपितविशेष्यरूपं वा। तद्भिन्नार्थस्य इत्यर्थः। सूत्रेऽस्मिन् चकारस्तृतीयान्यतरस्यामित्यनुकर्षणार्थः। प्रत्ययविधाने षष्ठी तु "गापोष्टक्" इतिवत्। पञ्चम्यर्थे षष्ठी तेन असत्त्ववचनेभ्य इति फलति। स्तोकशब्दः यद्धर्मावेशाद् द्रव्ये स्तोकव्यवहारस्तद्धर्मपरः इति। अयञ्च धर्मोऽल्पत्वादिशब्दप्रवृत्तिनिमित्तमेव। शुक्लादिवच्चैते धर्मवचना अपि। करणत्वञ्च परम्परया इति। 'स्तोकं पचति' इत्यत्र करणत्वाभावेन इदं न प्रवर्तते। फलमपि फलाश्रयः इति धात्वर्थविक्लित्तिरूपे फलेऽभेदसम्बन्धेन स्तोकपदर्थः विशेषणम्। व्यपदेशिवद्भावलभ्यमर्थमर्थतो गृहीत्वा उच्यते– "क्रियाविशेषणानां कर्मत्वं

[65] ल. श. शे., का. प्र., पा. सू. २-३-३२, सम्पा. तेजपालः शर्मा, पृ. ४०३.

नपुंसकत्वमेकवचनत्वञ्च"। 'स्तोकेन स्तोकाद् वा मुक्तः'। अनायासेन मुक्तः इत्यर्थः। अत्र 'अल्पेन विषेण हत' इत्यर्थके द्रव्यवाचके तु तृतीया विभक्तिः एव स्तोकशब्दात् भवति।

### 6.17. दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम् (२-३-३४)।

दूरार्थकैः अन्तिकार्थैश्च योगे षष्ठी विधीयते विकल्पेन। षष्ठ्या अभावे "अपादाने पञ्चमी" इत्यनेन पञ्चमी। बालमनोरमाकारस्तु "अपादाने पञ्चमी" इत्यस्मात् सूत्रात् व्यवहितायाः पञ्चमीत्यस्या अनुवर्तनेन पक्षे पञ्चमीं साधयति। व्याख्यानाद् "एनपा द्वितीया" इत्यस्मात् सूत्राद् द्वितीया इत्यस्याः, "पृथग्विनानाभिस्तृतीन्यतरस्याम्" इत्यस्मात् सूत्रात् तृतीया इत्यस्याः अनुवृत्तिं नानुमन्यते। वस्तुतः एतदर्थकयोगेऽपादानत्वम् आदायैव पञ्चमी विभक्तिः स्यात्। 'दूरं निकटं ग्रामस्य ग्रामात् वा'।

### 6.18. दूरान्तिकार्थेभ्यो द्वितीया च (२-३-३५)।

दूरार्थकेभ्यः अन्तिकार्थकेभ्यः द्वितीया विभक्तिः स्यात्। सूत्रस्थ-चकारेण व्यवहितयोरपि पञ्चमीतृतीययोरनुवृत्तिः आयाति। प्रातिपदिकार्थमात्रे सूत्रमिदं प्रवर्तते। अतः प्रथमायाः अपवादभूतम्। अत्रापि सूत्रे करणे च "स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य"[66] इत्यस्मात् सूत्रात् असत्त्ववचनस्येत्यनुवृत्तिर्भवति। ततः सूत्रार्थः भवति– अद्रव्यवाचिभ्यो दूरार्थकेभ्यः अन्तिकार्थकेभ्यश्च द्वितीया-तृतीया-पञ्चमीविभक्तयः भवन्ति। 'ग्रामस्य दूरं दूरेण दूराद् वा'। 'ग्रामस्य अन्तिकम् अन्तिकेन अन्तिकाद् वा'। 'दूरः पन्थाः' इत्यत्र दूरशब्दः विशेषणत्वेन

---

[66] पा. सू. २-३-३३.

द्रव्यवाची अस्ति। अतः प्रकृतसूत्रस्य अत्र प्रवृत्तिः नास्ति। "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा"[67] इत्यनेन सूत्रेण प्रातिपदिकार्थमात्रे दूरशब्दात् प्रथमा विभक्तिः एव भवति।

### 6.19. सप्तम्यधिकरणे च (२-३-३६)।

सप्तम्याः अधिकरणमर्थः। सूत्रस्यास्य अर्थस्तावद् अधिकरणकारके अनभिहिते सप्तमी विभक्तिः स्यात्, चकारेण दूरार्थकेभ्यः समीपार्थकेभ्यश्च सप्तमी विभक्तिः भवति। वनस्य दूरे अन्तिके वा इत्यत्र चकारबलात् प्रकृतसूत्रेण दूरशब्दात् अन्तिकशब्दात् च सप्तमी विभक्तिः विहिता।

सूत्रोक्तम् अधिकरणम् "आधारोऽधिकरणम्"[68] इति सूत्रेण ज्ञाप्यते। एतच्च सूत्रं "कारके" इति अधिकारसूत्रान्तर्गतम्। किञ्च कारके अर्थात् क्रियाजनके एतस्य प्रवृत्त्योपस्थिततत्वादाधारः क्रियायाः एव ग्राह्यः। परन्तु "स्वतन्त्रः कर्ता"[69], "कर्तुरीप्सिततमं कर्म"[70] इति सूत्रघटकस्वतन्त्रेप्सिततमपदाभ्यां स्वाश्रयत्वसम्बन्धेन क्रियाधारयोः कर्तृकर्मसंज्ञाभ्यां बाधात् स्वाश्रयाश्रयत्वसम्बन्धेन क्रियाश्रयस्याधिकरणत्वं ज्ञेयम्। स्वम् इति क्रिया, तदाश्रयः कर्ता कर्म च, तदाश्रयः अधिकरणमिति अन्वयः।

---

[67] पा. सू. २-३-४६.

[68] पा. सू. १-४-४५.

[69] पा. सू. १-४-५४.

[70] पा. सू. १-४-४९.

प्रोक्तञ्च वाक्यपदीये –

**"कर्तृकर्मव्यवहितामसाक्षाद्धारयत् क्रियाम्।**

**उपकुर्वत् क्रियासिद्धौ शास्त्रेऽधिकरणं स्मृतम्"॥**[71]

एतत्सर्वं विचिन्त्य आचार्येण नागेशेन प्रोक्तं– "कर्तृकर्मद्वारकफलव्यापाराधारत्वमधिकरणत्वम्"[72] इति। अर्थात् कर्तृद्वारकव्यापाराश्रयत्वं कर्मद्वारकफलाश्रयत्वञ्च अधिकरणत्वम्। यथा– 'स्थाल्याम् ओदनं गृहे पचति' इत्यादौ कर्मद्वारकविक्लित्तिरूपफलाधारः स्थाली भवति किञ्च कर्तृद्वारकव्यापाराधारः गृहमिति भवति। अधिकरणं त्रिविधम्– औपश्लेषिकं, वैषयिकम् अभिव्यापकञ्च।

**औपश्लेषिकमधिकरणम्–** समीपे श्लेषः संयोगादिसम्बन्धः उपश्लेषः, तत्कृतम् औपश्लेषिकम्। यथा– 'कटे आस्ते'। वाक्येऽस्मिन् देवदत्तः इति कर्ता अध्याहार्यः। तेन देवदत्तगताम् आसनक्रियां प्रति कटस्य संयोगः। अतः देवदत्तद्वारा कटस्य आधारत्वं भवति। ततः कटस्य अधिकरणसंज्ञायां सप्तमी।

**वैषयिकमधिकरणम्–** विषयतासम्बन्धेन यत् अधिकरणं तद् वैषयिकम्। यथा– 'मोक्षे इच्छा अस्ति'। अत्र कर्तृभूता इच्छा। तद्गतां सत्ताक्रियां प्रति मोक्षः विषयतासम्बन्धेन आधारः। इच्छाद्वारा अत्र मोक्षस्य आधारत्वं वर्तते। अतः मोक्षस्य अधिकरणसंज्ञायां सप्तमी।

**अभिव्यापकमधिकरणम्–** आधेयेन सह व्यापकः सम्बन्धः यस्य भवेत् तद् अभिव्यापकम् अधिकरणम्। यथा– 'सर्वस्मिन् आत्मा अस्ति'। आधेयः आत्मा सर्वत्र

---

[71] वा. प., ३/७/१४८.

[72] वै. प. ल. म., सम्पा. जयशङ्करलालत्रिपाठी, पृ. २६४.

अभिव्याप्तः अस्ति। आत्मरूपकर्तृगतां सत्ताक्रियां प्रति सम्पूर्णव्याप्तिं पुरस्कृत्य आत्मद्वारा सर्व-इत्यस्य अधिकरणसंज्ञायां सप्तमी विहिता।

"क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्" (का.वा.)। इन्-प्रत्ययान्तो यो क्तप्रत्ययान्तः, तस्य कर्मणि सप्तमी विभक्तिः। 'अधीती व्याकरणे'। अधिपूर्वाद् इङो भावे क्तप्रत्यये अधीत इति जाते, तस्माद् अधीतम् अनेन इति विग्रहे इष्टादिभ्यश्चेति कर्तरि इनिः प्रत्यये 'अधीती' इति रूपं भवति। अधीतवान् इत्यर्थः। किम् अधीतवान् इति कर्मणो जिज्ञासायां व्याकरणमिति कर्मत्वेन अध्ययने अन्वेति। तस्मात् कर्मणि द्वितीयायां प्राप्तायां क्तप्रत्ययान्तेन्प्रत्ययघटितस्य अधीती इत्यस्य योगे प्रकृतवार्तिकेन सप्तमी विहिता। *उद्द्योते* उक्तं– "पूर्वमविवक्षितकर्मतया भावे क्ते पश्चात्कर्मसम्बन्धेन कर्मणोऽनभिहितत्वाद् द्वितीया प्राप्तेत्याशयः। एतेन कर्मणि क्तप्रत्यये व्याकरणशब्दात् प्रथमैवेति निरस्तम्"।[73]

"साध्वसाधुप्रयोगे च" (का.वा.)। साधु असाधु च इत्यनयोः योगे सप्तमी विभक्तिः स्यात्। यद्यपि "साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः"[74] इत्यनेन सूत्रेण साधुप्रयोगे सप्तमी विभक्तिः भवितुमर्हति, तथापि अनर्चायामपि सप्तमीविधानार्थमिदं वार्त्तिकम्। तेन 'साधुर्भृत्यो राजनि' इत्यत्र तत्त्वकथने साधुशब्दप्रयोगे राजन् शब्दात् सप्तमी विभक्तिः सिद्ध्यति। 'साधुः कृष्णो मातरि'। कृष्णः मातुः हितकारी इत्यर्थः। अत्र साधुशब्दप्रयोगे मातृशब्दात् प्राप्तां शेषषष्ठीं प्रबाध्य सप्तमी विहिता। 'असाधुः कृष्णो मातुले'। कृष्णो

---

[73] महा. भा., द्वि. ख., पा. सू. २-३-३६, सम्पा. भार्गवशास्त्री जोशी, पृ. ५०९.

[74] पा. सू. २-३-४३.

मातुलस्य अहितकारीत्यर्थः। "तत्र साधुग्रहणं तु साधुप्रयोगेऽप्यर्चायां प्रत्यादियोगे निषेधार्थम्। न चानेन दुर्वारा। तत्सामर्थ्येनास्याप्यप्रवृत्तेरिति केचित्"[75] इति *उद्द्योते*।

"निमित्तात् कर्मयोगे" (का.वा.)। योगः समवायरूपः संयोगरूपो वाऽत्र गृह्यते। निमित्तमत्र फलमेवास्ति, फलं च क्रियायाः, अतः प्रयोजनमिह फलं भवति। अन्यथा 'जाड्येन बद्धः' इत्यत्रापि निमित्तवाचकाद् जाड्यशब्दात् तृतीया प्रसज्येत। फलमित्युक्ते तु न भवति। कर्मणा सह योगे सति निमित्तवाचकात् शब्दात् सप्तमी विभक्तिः विहिता भवति। अर्थाद् येन निमित्तेन प्रयोजनेन वा क्रिया क्रियते, तन्निमित्तं, प्रयोजनं वा यदि क्रियायाः कर्मणा सह युक्तं भवेत् तदा सप्तमी स्यात्। इदं वार्त्तिकं हेतुतृतीयायाः तादर्थ्यचतुर्थ्याश्च बाधकम्। 'चर्मणि द्वीपिनं हन्ति'। चर्मार्थं व्याघ्रं हन्ति इत्यर्थः। चर्मफलकं हननम्। कर्म 'द्वीपी' इति अस्ति। तेन कर्मणा सह चर्मन् इत्यस्य समवायसम्बन्धः, ततः चर्मन्-शब्दात् सप्तमी विहिता। 'दन्तयोः कुञ्जरं हन्ति'। दन्तार्थं गजं हन्तीत्यर्थः। 'केशेषु चमरीं हन्ति'। केशार्थं चमरीनामकं मृगविशेषं हन्ति। 'सीम्नि पुष्कलको हतः'। अण्डकोषार्थं कस्तूरीमृगः हतः।

यदि वार्त्तिके 'कर्मयोगे' इति नोच्येत तदा कस्मिन्नपि योगे सप्तमी प्रसज्येत। तथा सति 'वेतनेन धान्यं लुनाति' इत्यत्र लूयमानस्य धान्यस्य वेतनस्य च तादर्थ्यसम्बन्धोऽस्ति, अत्रापि वेतनशब्दात् सप्तमी विभक्तिः प्रसज्येत। 'योगविशेष' इत्युक्ते समवायसंयोगरूपे योगे एव सप्तमी भवति। 'वेतनेन धान्यं लुनाति' इत्यत्र तयोरभावे सप्तमी न विहिता।

---

[75] महा. भा., द्वि. ख., पा. सू. २-३-३६, सम्पा. भार्गवशास्त्री जोशी, पृ. ५०९.

### 6.20. यस्य च भावेन भावलक्षणम् (२-३-३७)।

क्रियया क्रियान्तरं लक्ष्यते ततः क्रियान्तरलक्षणक्रियाश्रयवाचकात् सप्तमी विभक्तिः स्यात्। अस्मादेव एतद्विहितसप्तम्याः क्रियान्तरज्ञापकत्वम् अर्थ इति प्राप्यते। 'गोषु दुह्यमानासु गत' इत्यादौ उभयोरपि पदयोर्ज्ञापकक्रियाश्रयवाचकत्वादुभाभ्यामपि सप्तमी विभक्तिः, निर्ज्ञातदेशकालक्रिया अनिर्ज्ञातकालक्रियायाः सम्बन्धिदेशकालपरिच्छेदकत्वेन लक्षणमिति ज्ञेयम्। तेन भूयोदर्शनाश्रयात्वाद् ज्ञाप्यज्ञापकभावस्य 'उदिते आदित्ये तमो नष्टम्' इत्यादौ एव स्यात् न तु अत्र कदाचित् हि 'गोषु दुह्यमानासु असौ गत' इत्यपास्तम्। ज्ञापकत्वं च तत्तत्शब्दबोध्यत्वेन विवक्षितमेवैतच्छास्त्रप्रवृत्तौ निमित्तं न तु तस्य मानान्तरेण नियमतो ग्रहणापेक्षेति नेदं भूयो दर्शनाश्रयम्। ज्ञाप्यज्ञापकभावः सप्तम्यर्थः अत्र ज्ञेयः।

### 6.21. षष्ठी चानादरे (२-३-३८)।

अनादरे इत्यत्र विषयसप्तमी। सूत्रेऽस्मिन् यस्य च भावेन इत्याद्यनुवर्तते। अनादरे गम्यमाने सति यस्य क्रियया क्रियान्तरं लक्ष्यते ततः षष्ठी सप्तमी वा इत्यर्थः। *शब्दकौस्तुभे* चोक्तम्– "अनादराधिक्ये भावलक्षणे षष्ठीसप्तम्यौ स्तः"।[76] षष्ठ्यर्थः लक्ष्यलक्षणभावः। अनादरविशिष्टं प्रव्रजनं धात्वर्थः। यदुद्देश्यकेच्छाप्रयोज्या क्रिया क्रियान्तरं लक्षयति तस्य समाहितस्य असिद्धिरूपः अनादरः इति। अत्रानादरश्च प्रत्यासक्त्या पुत्रादिविषयक एव इति बोध्यः। 'रुदति रुदतो वा प्राव्राजीत्'। अत्र रोदनक्रियया प्रव्रजनक्रिया लक्ष्यते, तथा च

---

[76] श. कौ., द्वि. ख., पा. सू. २-३-३८, सम्पा. गोपालशास्त्री, पृ. २३५.

अनादरोऽपि प्रतीयते, अतः रुदत्-शब्दात् षष्ठीसप्तम्यौ भवतः। रुदन्तं पुत्रादिकमनादृत्य सन्न्यस्तवान् इत्यर्थः।

**6.22. स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च (२-३-३९)।**

चकारेण षष्ठीसप्तम्यौ अनुकृष्येते। योगे इत्यध्याहार्यम्। स्वामी ईश्वरः अधिपतिश्च प्रायः समानार्थकाः। दायादः पित्रादिभिरर्जितो धनांशः दायः, पुत्रादिभिः स्वीकर्तुं योग्यः। दायम् आदत्ते इति दायादः। आपूर्वाद् दाधातोः कप्रत्ययः निपातनादेव। स्वामीश्वरादिभिः सह योगे षष्ठीसप्तम्यौ भवतः इति सूत्रार्थः। शेषषष्ठी स्वतः प्राप्ता आसीत्, पुनः अनेन सूत्रेण षष्ठीविधानं पक्षे सप्तमीविधानार्थमस्ति। गवां गोषु वा स्वामी। गवां गोषु वा प्रसूतः। सम्बन्धोऽत्र भोक्तृत्वरूपः विद्यते। गवामुपभोगाय उत्पन्नः इत्यर्थः।

**6.23. आयुक्तकुशलाभ्यां चासेवायाम् (२-३-४०)।**

सूत्रेऽस्मिन् "षष्ठी शेषे" (पा.सू. २-३-५०) इत्यतः षष्ठीति, "सप्तम्यधिकरणे च" (पा.सू. २-३-३६) इत्यस्मात् सप्तमीति चानुवर्तते। आसेवापदस्यार्थः औत्सुक्यम्, तत्परः, व्यापारितः, प्रवर्तित इति। आयुक्तकुशलशब्दाभ्यां योगे षष्ठीसप्तम्यौ भवतः। 'आयुक्तः हरिपूजने हरिपूजनस्य वा'। हरिपूजनविषये प्रवर्तितः इत्यर्थः। 'कुशलो हरिपूजने हरिपूजनस्य वा'। ननु आसेवायाम् इति पदं किमर्थम्? तदोच्यते– यदि इदं पदं नोच्येत तदा तात्पर्यार्थाऽभावेऽपि ईषद्युक्तेऽर्थे आयुक्तपदप्रयोगे 'आयुक्तो गौः शकटे' इत्यत्रापि शकटशब्दात् षष्ठीसप्तम्यौ भवेताम् इति दोषः स्यात्। कृते तु आसेवायामिति पदे उक्तप्रयोगे षष्ठ्या आपत्तिर्न भवति।

### 6.24. यतश्च निर्धारणम् (२-३-४१)।

निर्धारणं पृथक्करणम् इति। यतः समुदायात्। यतः पृथक्करणं तद्वाचकशब्दात् षष्ठी सप्तमी च भवति। यश्च निर्धार्य्यते, पृथक् क्रियते, यस्मात् निर्धार्य्यते, येन रूपेण निर्धार्य्यते इति त्रयाणामुपादाने एवेदं सूत्रं प्रवर्तते, नान्यत्र। जात्यादिविशिष्टस्य स्वेतरव्यावृत्तधर्मवत्त्वप्रकारकज्ञानविषयीकरणं निर्धारणम् इत्यर्थः। एवं सति यद्व्यावृत्तधर्मवत्त्वं जात्यादिविशिष्टस्य प्रतिपाद्यते ततः षष्ठीसप्तम्यौ भवतः।

'नृणां नृषु च ब्राह्मणः श्रेष्ठः'। नृसमुदायस्यैकत्वेऽपि उद्भूतावयवभेदविवक्षया बहुवचनं नृणामिति। तिरोहितावयवभेदविक्षया एकवचनन्तु निर्धारणविषये असाधु। ब्राह्मणत्वादिविशिष्टस्य तदितरनरादिव्यावृत्तश्रेष्ठत्वधर्मवत्तया प्रतिपत्तिरिति तत्र षष्ठीसप्तम्यौ भवतः। व्यावृत्तत्वञ्च अत्यन्ताभावप्रतियोगिरूपं विधेयताऽवच्छेदकावच्छिन्नत्वम्। तेन नराणां ब्राह्मणः प्राणी इति प्रयोगः न। ब्राह्मणेतरनरेषु प्राणित्वघटोभयाभावसत्त्वेऽपि प्राणित्वत्वस्य तद्वृत्त्यभावप्रतियोगितावच्छेदकतापर्य्याप्त्यनधिकरणत्वात्। नरशब्दः नरत्वजातिवाचकः। 'गवां गोषु वा कृष्णा बहुक्षीरा'। गोसमुदायैकदेशभूता कृष्णा गौः बहुक्षीरत्वरूपधर्मिकेत्यर्थः। छात्राणां छात्रेषु मैत्रः पटुः। छात्रसमुदायैकदेशभूतः मैत्रनामा छात्रः पटुत्वकारणात् पृथक् क्रियते।

### 6.25. पञ्चमी विभक्तेः (२-३-४२)।

निर्धारणापेक्षया अवधित्वविवक्षायां पञ्चम्यपि साधु "पञ्चमी विभक्तेः" (पा.सू. २-३-४२) इति सूत्रात्। अतः सूत्रार्थः एवं भवति– निर्धारणावधेः निर्धार्यमाणस्य च यत्र विभागः भवेत् तत्र निर्धारणावधेः पञ्चमी विभक्तिः भवति। 'माथुराः पाटलिपुत्रकेभ्यः आढ्यतराः'।

माथुराणाम् आढ्यतरत्वं निर्धारणीयमतः माथुराः निर्धार्यमाणाः। यतो निर्धारणावधिः, तत् पाटलिपुत्रकम्। उभयोरस्ति भेदः। मथुरादेशीयाः पाटलिपुत्रदेशीयापेक्षया अतिशयेन आढ्याः सन्ति इत्यर्थः। *उद्द्योते* उक्तं– "माथुराः पाटलिपुत्रकेभ्य इत्यादौ माथुराणां पाटलिपुत्रकेषु प्राणित्वेनान्तर्भावेऽपि शब्दोपात्ताकारापेक्षयानन्तर्भावाद्विभाग एवेति भावः"।[77]

### 6.26. साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः (२-३-४३)।

शेषषष्ठ्याः अपवादोऽयं योगः। साधुनिपुणाभ्यां योगे प्रशंसार्थे गम्ये सप्तमी विभक्तिः विहिता, न तु प्रतेः प्रयोगे। 'मातरि साधुः'। मातुः हितकारीत्यर्थः। 'मातरि निपुणः'। मातुः सेवायां कुशल इत्यर्थः। ननु अर्चायाम् इति किम्? तदोच्यते– यदि सूत्रे उक्तपदं नोच्येत तदा साधुनिपुणाभ्यां योगे तत्त्वकथनेऽपि सप्तमी विभक्तिः स्यात्। तदा 'राज्ञः भृत्यो निपुणः' इत्यत्रापि 'राजन्' इत्यस्मात् सप्तमी विभक्तिः आपद्येत।

### 6.27. प्रसितोत्सुकाभ्यां तृतीया च (२-३-४४)।

सप्तमी इत्यनुवर्तते पूर्वसूत्रात्। प्रसित-उत्सुकशब्दौ तत्परे आसक्तौ इष्टार्थे उद्युक्ते च स्तः। वैषयिकसप्तम्यामेव प्राप्तायामिदं सूत्रं क्रियते। प्रसित उत्सुक इत्याभ्यां योगे तृतीया सप्तमी च भवति। 'प्रसित उत्सुको वा हरिणा हरौ वा'।

---

[77] महा. भा., द्वि. ख., पा. सू. २-३-४२, सम्पा. भार्गवशास्त्री जोशी, पृ. ५१०.

### 6.28. नक्षत्रे च लुपि (२-३-४५)।

सप्तमी तृतीया चानुवर्तते। मण्डूकप्लुत्या “सप्तम्यधिकरणे च”[78] इत्यस्मात् सूत्रात् अधिकरणे इत्यप्यनुवर्तते। लुपि इत्यत्र लुप्-पदेन लुप्संज्ञया लुप्तप्रत्ययार्थस्य विवक्षा अस्ति। नक्षत्रे इत्यतः परं प्रकृत्यर्थे सति इत्यध्याहार्यम्। नक्षत्रे प्रकृत्यर्थे सति लुप्यमानस्य प्रत्ययस्य अर्थेऽपि विद्यमानात् नक्षत्रवाचकात् अधिकरणे तृतीयासप्तम्यौ भवतः।

यत्र नक्षत्रवाचकात् तद्युक्तकालेऽर्थे अणादिप्रत्ययाः भवन्ति, किन्तु तेषां लुबविशेषे इत्यनेन लोपः भवति, तत्र यः शिष्यते स लुप्यमानार्थाभिधायीति नियमात् प्रकृतिरूपः नक्षत्रवाचकशब्दः लुप्तप्रत्ययस्यार्थं कथयति, तत्रैवास्य सूत्रस्य प्रवृत्तिर्भवति।

‘मूलेनावाहयेद्देवीं श्रवणेन च विसर्जयेत्’। अत्र मूलेन इत्यत्र मूलशब्दात् श्रवणेन इत्यत्र च श्रवणशब्दात्, “नक्षत्रे च लुपि”[79] इत्यनेन अधिकरणे तृतीया भवति। पक्षे सप्तम्यां कृतायां मूले श्रवणे इत्यपि भवति। मूलेन इत्यत्र मूलशब्दः नक्षत्रवाचकः। तस्मात् मूलेन युक्तः कालः इत्यर्थे अण् भवति, तस्य लुबविशेषे इति लोपे सति मूल-शब्द एवावशिष्यते। तस्यार्थः मूलनक्षत्रयुक्तः कालः। एवमेव श्रवणेन इत्यस्य श्रवणनक्षत्रयुक्तः कालः इत्यर्थो भवति। मूलनक्षत्रयुक्ते काले देवीमावाहयेत् श्रवणनक्षत्रयुक्ते काले च देवीं विसर्जयेदिति वाक्यार्थः। सूत्रे ‘लुपि’ इति किम्, यदि सूत्रे लुपि इति पदं नोच्येत तदा ‘पुष्ये शनिः’ इत्यत्रापि अधिकरणे नक्षत्रवाचकात् पुष्यशब्दात् तृतीया प्रसज्येत। उक्ते तु ‘लुपि’ इति पदे ‘पुष्य’ इत्यत्र तद्युक्तकालेऽर्थे प्रत्ययविधानाभावात्, अत एव लोपाभावाच्च न भवत्यस्य सूत्रस्य प्रवृत्तिः। अधिकरणे सप्तमी एव भवति।

---

[78] पा. सू. २-३-३६.

[79] पा. सू. २-३-४५.

## अध्यायसमीक्षणम्

“विभक्त्यर्थद्वितीयाह्निकविमर्शः” इत्यभिधेये षष्ठाध्याये कर्तृकरणयोस्तृतीया[80] इति सूत्रात् ‘नक्षत्रे च लुपि’ इति सूत्रपर्यन्तं सूत्राणां पर्यालोच्य विश्लेषणं वर्तते। कर्तृकरणयोस्तृतीया इति सूत्रे “प्रकृत्यादिभ्य उपसङ्ख्यानम्” (का.वा.) इति वार्त्तिकस्य प्रकृत्यादिगणपठितशब्देभ्यः तृतीया इत्यर्थः। आकृतिगणत्वाद् यत्र तृतीयाविभक्तिविधायकं वचनं नास्ति शिष्टप्रयुक्तश्च तृतीयान्तप्रयोगस्तत्रानेन तृतीया कार्य्या। ‘प्रकृत्या चारुः’। वस्तुतः प्रकृत्यादिभ्य उपसंख्यानम् इति वार्त्तिकम् अनारम्भणीयमेव, तथाहि– स्वभावेनायमभिरूपः कृतो न त्वलङ्कारादिना इत्यर्थे गम्यमानकृधातुवाच्यक्रियाकरणत्वात् करणतृतीयया ‘प्रकृत्या चारुः’ इति सिद्धं भवति। *महाभाष्ये* तु वार्त्तिकमिदं प्रत्याख्यातम्। तथा चोक्तम् *उद्द्योते*– “सम्बन्धसामान्यविवक्षायां षष्ठीबाधनार्थम् आवश्यत्वाच्चेत्याहुः। अनभिधानेन भगवता प्रत्याख्यातमित्यन्ये” इति। अत्र *शब्दकौस्तुभ*कारस्य *उद्द्योत*कारस्य च उभयोः मतं समं इति प्रतिभाति।

“इत्थम्भूतलक्षणे” इति सूत्रे *शब्दकौस्तुभे*– “कञ्चित् प्रकारं प्राप्त इत्थम्भूतस्तल्लक्षणे तृतीया स्यात्” कमण्डलुपाणिं छात्रमद्राक्षीद् इत्यादौ तृतीया भवति। परन्तु नागेशाचार्यमते तु कमण्डलुपाणिशब्दात् तृतीयापत्तिः, कमण्डलुयुक्तपाणिरूपस्य कमण्डलुपाणित्वस्य लक्षणत्वेन तस्यैव तद्वाचकत्वात्। तदुक्तम्– “अनुर्लक्षणे”[81] इति सूत्रे भाष्ये। नागेशाचार्यस्य मतम् अयुक्तमिति आलोचकाः वदन्ति। कमण्डलुपाणिशब्दात्

---

[80] पा. सू. २-३-१८.

[81] पा. सू. १-४-८४.

तृतीयाविभक्तेः आपत्तिः तु न भवति, कारकविभक्तित्वेन द्वितीयायाः बाधात् इति। एवञ्च श्रीमन्नागेशापेक्षया *शब्दकौस्तुभ*कारस्य श्रीमद्भट्टोजिदीक्षितस्य मतं युक्तियुक्तं इति विभावयामि।

# सप्तमोऽध्यायः

## विभक्त्यर्थतृतीयाह्निकविमर्शः

### 7.1. प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा (२-३-४६)।

महामुनिपाणिनिविरचिताष्टाध्यायीनामकशब्दशास्त्रग्रन्थे प्रथमाविभक्तिविधायकम् अन्यतमं सूत्रमिदं राराजते। शास्त्रेणानेन हि अभिहितेषु कर्त्रादिकारकेषु प्रथमा विधीयते। तदर्थमेव इदं विधिशास्त्रम्। पुनश्च विभक्तिविधायकेषु शास्त्रेषु इदमेव शास्त्रम् अत्यन्तं सुप्रसिद्धम्। न केवलम् अभिहिते कर्तृकारके प्रथमा भवति अपि तु अभिहितेषु कर्मादिषु सर्वकारकेषु प्रथमा जायते।

पदद्वयात्मकमिदं सूत्रम्। प्रातिपदिकार्थश्च लिङ्गञ्च परिमाणञ्च वचनञ्च इति प्रातिपदिकार्थलिङ्गपरिमाणवचनानि इति द्वन्द्वः। तानि एव प्रातिपदिकार्थलिङ्गपरिमाण-वचनमात्रम् इति, तस्मिन् प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे। 'द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकमभिसम्बध्यते' इति नयेन मात्रशब्दस्य प्रत्येकं योगः। तेन प्रातिपदिकार्थमात्रे, लिङ्गमात्रे, परिमाणमात्रे, वचनमात्रे इति बोधः। को नाम प्रातिपदिकार्थः। यतो हि एतद्विषये बहूनां विदुषां विप्रतिपत्तिर्राजते। प्रातिपदिकार्थः सत्ता इति *शब्दकौस्तुभ*कारः। सत्ता इत्युक्ते जातिरिति भर्तृहरिः। प्रोक्तं हि तत्र- "तस्यां सर्वे शब्दाः व्यवस्थिताः"[1] इति। पुनश्च तत्रैव पुनरुल्लिखितम्- "तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते"[2] इति। अन्ये तु प्रातिपदिकार्थ इत्युक्ते नियतोपस्थितिकः। नियता उपस्थितिर्यस्य सोऽर्थः नियतोपस्थितिकः। अर्थाद् यस्मिन्

[1] वा. प., श्लो. सं. ३/१/३३.

[2] वा. प., श्लो. सं. ३/१/३४.

प्रातिपदिके उच्चारिते यस्यार्थस्य नियमेन प्रतीतिर्जायते, स एव प्रातिपदिकार्थः। नियतलिङ्गाः, अलिङ्गाश्च शब्दाः प्रातिपदिकार्थस्य हि दृष्टान्तः। नियतोपस्थितिकः प्रातिपदिकार्थ इति पक्षे 'वृक्षः कुड्यं भित्तिः' इत्यत्र वृक्ष इति प्रातिपदिके उच्चारिते वृक्षत्वजातिः, वृक्षव्यक्तिः, पुंस्त्वञ्च प्रतीयन्ते। तस्मादेव जातिव्यक्तिपुंस्त्वञ्च प्रातिपदिकार्थः। तस्मादेव उक्तसूत्रेण प्रथमा विधीयते। इदमपि अस्माभिरवधेयम्- लिङ्गमात्रे इत्युक्ते लिङ्गमात्राधिक्ये इति। कारणं न हि कुत्रापि केवलं लिङ्गस्य प्रतीतिर्जायते। प्रकृते हि तटः, तटी, तटमिति दृष्टान्तः। अनियतलिङ्गस्थले तु 'तटः' इत्यत्र पुंस्त्वविशिष्टस्य तटस्य, 'तटी' इत्यत्र स्त्रीत्वविशिष्टस्य तटस्य 'तटम्' इत्यत्र क्लीबत्वविशिष्टस्य तटस्य बोधो भवति। अर्थात् प्रकृते हि नियमेन लिङ्गस्य भानं न जायते। तस्मादेव लिङ्गमात्रे इत्यस्य ग्रहणम्। पुनश्च परिमाण इत्युक्ते परिमाणाधिक्ये इति बोधः। अत्र हि दृष्टान्तः- द्रोणो ब्रीहिः। अत्र द्रोण सु ब्रीहि सु इत्यत्र द्रोणपदस्यार्थो भवति द्रोण इति तदुत्तरसुविभक्तेरर्थो भवति परिमाणम् इति। द्रोण इति परिमाणविशेषः। तस्मादेव सामान्यविशेषयोः अभेदः इति नयेन प्रकृत्यर्थस्य द्रोणस्य प्रत्ययार्थे परिमाणे अभेदसम्बन्धेनान्वयः। ततश्च द्रोण इत्यस्य द्रोणभिन्नपरिमाणम् इत्यर्थः। सुप्रत्ययार्थस्य परिमाणस्य च ब्रीहौ परिच्छिन्नत्वसम्बन्धेनान्वयो भवति। तेन हि वाक्यार्थः- द्रोणभिन्नपरिमाणपरिच्छिन्नब्रीहिः। तदेव वक्ति- "इह हि द्रोणलक्षणं यत्परिमाणन्तत्परिच्छिन्नो ब्रीहिरित्यर्थः। प्रकृत्यर्थस्य द्रोणस्य प्रत्ययार्थे परिमाणे अभेदेन संसर्गेण विशेषणता, प्रत्ययार्थश्च ब्रीहिषु परिच्छेद्यपरिच्छेदकभावेन संसर्गेण विशेषणमिति बोध्यम्"[3] इति। वचनमात्रे एकः, द्वौ, बहवः। संख्याबोधकात् प्रातिपदिकात् स्वार्थे प्रथमा विभक्तिः भवति। वाक्यस्यास्य

[3]श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. २३८.

का आवश्यकता वर्तते। यतो हि एकशब्दस्य एकत्वम् इत्यर्थस्तु नियतो वर्तते। एवमेव द्विशब्दस्य द्विरूपोऽर्थो वर्तते। तथैव बहुशब्दस्य बहुत्वार्थो नियतो वर्तते। तस्मादेव प्रातिपदिकार्थमात्रे प्रथमा भवति। यदि चोच्यते एते अपि अनियतलिङ्गाः शब्दाः। तस्मादेव प्रातिपदिकार्थमात्रे प्रथमा न भवितुमर्हति। अत्र समाधानम्- लिङ्गमात्रे प्रथमा सिद्ध्यति। तस्मात् सूत्रे वचनग्रहणं किमर्थमिति प्रश्नः। अत्रोच्यते- अस्ति तावत् न्यायः उक्तार्थानामप्रयोगः। अस्य न्यायस्य अर्थस्तावत् उक्तः अर्थः येषां ते उक्तार्थाः शब्दाः इति। तेषाम् अप्रयोगः। अर्थाद् उक्तार्थानां शब्दानां प्रयोगो न कर्तव्यः। यथा- एकशब्देन एकत्वरूपः अर्थः उक्तः। स एव च सुप्रत्ययार्थो वर्तते। एवञ्च एकशब्देनैव सुप्रत्ययार्थः उक्तः। ततश्च सुप्रत्ययः उक्तार्थः। तस्मात्तस्य प्रयोगो न स्यात्। तस्मादेव एकशब्दात् सुप्रत्ययो न भवति। तथैव द्विशब्दात् औप्रत्ययो न स्यात्। एवमेव बहुशब्दाद् जस्प्रत्ययो न स्यात्। अतः एतेभ्यः शब्देभ्यः प्रथमासिद्ध्यर्थं वचनग्रहणमिति भावः। एवञ्च वचनग्रहणबलादत्र उक्तार्थानामप्रयोगः इति न्यायस्य प्रवृत्तिर्नैव भवतीति कृत्वा एकशब्दाद् एकवचनं, द्विशब्दाद् द्विवचनं, बहुशब्दाद् बहुवचनं च सिध्यन्ति। इदमेव वक्ति *शब्दकौस्तुभे*- “तत्र प्रकृत्या उक्तायामपि संङ्ख्यायां यथा स्यादित्येतदर्थमिदं वचनम्”[4] इति।

इह सूत्रे 'अर्थलिङ्गयोः प्रथमा' इत्येतावदेवावश्यकम्, इतराणि पदानि व्यर्थानि। इह सूत्रे प्रातिपदिकग्रहणं तावद्व्यर्थम्। यतो हि ङ्याप्प्रातिपदिकाद्धि स्वादिविभक्तयो विधीयन्ते। अत्र हि अर्थग्रहणापेक्षया यस्मात्स्वादिविधिर्विहितः स एव तदर्थः। तस्मादेव प्रथमा भवति। लिङ्गानाम् अनियमेन भानात् लिङ्गग्रहणं विहितमिह सूत्रे। पुनश्च परिमाणग्रहणमपि व्यर्थमेव।

[4] तत्रैव.

यतो हि अर्थग्रहणेनैव परिमाणस्यापि अन्तर्भावो दृश्यते। इदमेव- “इह सूत्रे 'अर्थलिङ्गयोः प्रथमा’ इत्येतावदेवाश्यकम्, इतरत्तु व्यर्थम्। तथा हि प्रातिपदिकग्रहणं तावद्व्यर्थम्। ङ्याप्प्रातिपदिकाद्धि स्वादयो विधीयन्ते। तत्रार्थे इत्यपेक्षायां यस्मात्स्वादिविधिस्तदर्थ इति लभ्यत एव। परिमाणमप्यनर्थकम्।”[5] इति।

सम्प्रति शङ्का मनसि समुदेति- गौर्वाहीक इत्यादिस्थले प्रातिपदिकार्थाद्भिन्नः लक्ष्यार्थो विद्यते। तस्मात् प्रकृते कथं स्वार्थे प्रथमा। अत्र समाधानम्- सर्वादौ गो इत्यादिपदेषु तदर्थे प्रथमा विधीयते। ततश्च पदान्तरेण सह सम्बन्धादिकल्पनादेव लक्ष्यार्थः प्रतीयते। परन्तु प्रथमाविधानकाले तु लक्ष्यार्थो नैव प्रतीयते। तस्मादेव तदर्थे प्रथमाविधाने न कापि हानिः। एवमेव वचनग्रहणमपि नावश्यकम्। यतो हि "न केवला प्रकृतिः प्रयोक्तव्या” इति नयेन केवलं प्रकृतेः प्रत्ययस्यापि प्रयोगो न सम्भवति। तस्मादेव लोकव्यवहारे केवलस्य प्रत्ययस्य केवलायाः प्रकृतेश्च प्रयोगासम्भवाद् एकत्वादिप्रातिपदिकेभ्यः स्वादिप्रत्ययो विधीयते एव। इदमपि अस्माभिरवधेयम्- इह सूत्रे मात्रग्रहणमपि नापेक्षितम्। यतो हि 'सम्बोधने च’ इत्यादिषु सम्बोधनार्थस्याधिक्ये प्रथमाया अविधानात्प्रतीयते यत् प्रातिपदिकार्थव्यतिरिक्ते प्रथमा स्वतो न विधीयते। तदर्थमेव मात्रग्रहणं व्यर्थम्। अत्र हि शङ्का- 'वीरः पुरुषः’ इत्यादौ विशेष्यविशेषणभावस्य आधिक्येन प्रतीतौ कथं प्रथमा। सर्वप्रथमं प्रातिपदिकार्थे वीर, पुरुष इत्यादिभ्यः प्रातिपदिकेभ्यः प्रथमा। ततश्च प्रथमाविभक्तिविधानादेव परं वीरपदस्य पुरुषपदेन सह संसर्गो जायते। अर्थात् संसर्गस्य वाक्यार्थत्वेन बहिरङ्गम्। प्रथमाविभक्तिविधानम् अन्तरङ्गम्। अर्थाद् अन्तरङ्गकार्यप्रवृत्तिकाले बहिरङ्गकार्यं न कदापि बाधकम्।

---

[5] तत्रैव.

*शब्दकौस्तुभ*कारस्य हि मतम्- “ननु 'वीरः पुरुषः’ इत्यादौ अभेदसंसर्गस्याधिकस्य भानात् प्रथमा न स्यादिति चेन्न संसर्गस्य वाक्यार्थत्वेन बहिरङ्गत्वात् प्रथमाप्रवृत्तसंस्कारबाधानुपपत्तेः”[6] इति।

वार्त्तिककारस्य हि मतम्- अभिहिते प्रथमा। अभिधानञ्च प्रायेण तिङ्कृत्तद्धितसमासैर्भवति। यथा- ‘वृक्षस्तिष्ठति’ इत्यत्र तिप्-प्रत्ययेन कर्तुः अभिहितत्वाद् अभिहिते वृक्षरूपे कर्तरि प्रथमा। एवमेव 'कृतः कटः’ इत्यत्र क्ताख्येन कृत्प्रत्ययेन कर्मणः अभिहितत्वाद् अभिहिते कटरूपे कर्मणि प्रथमा। एवमेव 'शत्य’ इत्यत्र यदाख्येन तद्धितप्रत्ययेन कर्मणः अभिहितत्वाद् अभिहिते अश्वरूपे कर्मणि प्रथमा। तथैव 'प्राप्तोदको ग्राम’ इत्यत्र समासाख्यया वृत्त्या ग्रामस्याभिहितत्वाद् अभिहिते ग्रामे प्रथमा। इदमेव वक्ति ग्रन्थकृत्- “ ‘वृक्षस्तिष्ठति’ 'कृतः कटः’ 'शत्यः’ 'प्राप्तोदको ग्राम’ इत्यादौ तिङादिभिरभिहिते कर्त्रादौ प्रथमा भवतीत्यर्थः”[7] इति। एवमेव 'वीरः पुरुषः' इत्यत्र विशेष्यविशेषणभावस्याधिकस्य भानादपि अभिहिते प्रथमा जायते। ननु 'वृक्षः’ ‘प्लक्षः’ इत्यादिषु अस्ति इत्यादिना अध्याहृतक्रियापदेन कर्तुः अभिधानाद् अभिहिते कर्तरि प्रथमा।

अत्र भाष्यम्- अभिहिते प्रथमा। सम्प्रति 'प्रासाद आस्ते’ इत्यत्र सदिक्रियायाः असिक्रियायाश्च एकमेवाधिकरणं प्रासादः। तच्च प्रसादाख्यम् अधिकरणं सदिधातोः उत्पन्नेन घञ्प्रत्ययेनाभिहितम्। असिधातोः उत्पन्नेन तिङा अनभिहितम्। प्रकृते च सप्तमीं बाधित्वा परत्वात् प्रथमा भवेत्। पुनश्च अतिङ्समानाधिकरण्ये प्रथमा इत्युच्येत। तदपि न सम्भवति। यतो हि 'देवदत्तः पचति’ इत्यत्र देवदत्तादिषु प्रथमा न भवेत्। तथाहि देवदत्तः पच लट् इत्यत्र

---

[6] तत्रैव.

[7] तत्रैव.

यावत्तिङो न विहिताः, तावत् तिङ्सामानाधिकरण्याभावात् प्रथमैवेति नियमो न प्रवर्तेत। तथा च देवदत्तशब्दाद् अविशेषोत्पन्नाः सर्वे स्वादयः सन्त्येवेति शतृशानचौ स्याताम्। तन्निमित्तभूतस्याप्रथमान्तेन सामानाधिकरण्यस्य सत्त्वात्। तिङ्विधेस्तु लिङ्गादिष्ववकाशः। स एव प्रथमैवेति नियमस्यापि 'विदो लटो वा' इत्यादेस्तु विदिमात्रप्रयोगे चरितार्थता। यथा- 'वेत्थ वेद' इत्यादि। स्थानिन्यपि मध्यमोत्तमयोर्विधानादर्थात्प्रकरणाद्वा निर्ज्ञातस्य प्रयोगानावश्यकत्वाच्च। पाक्षिकश्चायं दोषः। शत्रादिविधौ हि 'अप्रथमा' इत्यादिः पर्युदासः प्रसज्यप्रतिषेधो वेति द्वैतम्, तत्र द्वितीये उक्तदोषस्यासङ्गतेः प्रथमाया अपि सत्त्वेन शत्रादिनिषेधसम्भवात्।

*भाष्य*मते- पर्युदासपक्षे 'विभक्तिनियमे दोषो न' इत्युक्तमतिचिन्त्यम्, तत्र हि द्वितीया हि द्वितीया कर्मण्येवेत्यादिवचनव्यक्त्याश्रयणात्। देवदत्ते द्वितीया मा भूत्, षष्ठी तु स्यादेव। सा हि शेष एवेति नियम्यते। यत्र च विभक्त्यन्तरस्य नियमो न प्रवृत्तः स शेषः। ततश्च तिङः समानाधिकरण्यात् प्राक् शेषलक्षणषष्ठ्यां सत्यां दुर्वारौ शतृशानचाविति।

### 7.2. सम्बोधने च (२-३-४७)।

सूत्रेणानेन हि प्रथमा विधीयते। प्रातिपदिकार्थसूत्रे मात्रग्रहणेन सम्बोधनाधिक्ये प्रथमा न प्राप्नोति, इति सम्बोधनाधिक्येऽपि प्रथमाविधानार्थं शास्त्रमिदम्। इह सम्बोधनं प्रकृत्यर्थं प्रति विशेष्यं, क्रियां प्रति विशेषणम्। उक्तिर्वर्तते-

**"सम्बोधनपदं यच्च तत्क्रियायां विशेषणम्।**

**व्रजानि देवदत्तेति निघातोऽत्र तथा तिष्ठति॥"** इति।

किं नाम सम्बोधनम्। सम्बोधनं नाम अभिमुखीकृत्य ज्ञापनम्। अर्थाद् आभिमुख्यकरणम्। तस्मिन्नधिके प्रातिपदिकार्थे प्रथमा न प्राप्नोति। किन्तु शास्त्रेण हि तस्मिन्नधिके प्रथमा विधीयते। यथा- हे राम, मां पाहि। इह हि रामं प्रति मद्रक्षणं ज्ञाप्यम्। इदमेव वक्ति *शब्दकौस्तुभ*कारः- “इह प्रथमा स्यात्। हे राम।”[8] इति। इदं प्रतिपन्नमेव मतं सर्वशास्त्रकृत्सम्मतम्।

### 7.3. सामन्त्रितम् (२-३-४८)।

अनेन हि शास्त्रेण आमन्त्रितसंज्ञा विधीयते। तद्धेतोः इदं संज्ञाशास्त्रम्। सम्बोधने च इत्यस्मात् शास्त्रात् सम्बोधने इति पदम् अनुवर्तते। अर्थात् सूत्रार्थो भवति- सम्बोधने या प्रथमा तदन्तं शब्दरूपम् आमन्त्रितसंज्ञं भवति। अत्र शङ्कोदेति- ‘संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नास्ति’ इति परिभाषया तदन्तविधिर्न भवति। अत्र हि मानम्- ‘सुप्तिङन्तं पदम्’ इत्यत्र अन्तग्रहणमेव ज्ञापकम्। तदर्थमेव संज्ञाविधौ प्रत्ययग्रहणमिह, तन्न तदन्तस्य संज्ञा। पुनश्च केवलं प्रत्ययमात्रस्य संज्ञाग्रहणं स्यात्, तथा च संज्ञाकरणमनर्थकम्। अत्र हि समाधानम्- इह महासंज्ञाकरणसामर्थ्यात् तदन्तस्यापि संज्ञा। इदमेव भट्टोजिदीक्षितः वक्ति- “यद्यपि संज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं दुर्लभं, तथापि महासंज्ञाकरणाल्लभ्यते आमन्त्रणमामन्त्रितम्”[9] इति। अभेदसम्बन्धस्य उपचारात् तत्साधने शब्दे शक्तिः। पुनश्च विभक्त्यन्तस्यैव आमन्त्रितसंज्ञा भवति न तु केवलायाः विभक्तेः। प्रातिपदिकार्थसूत्रोपात्ता

[8] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. २३९.

[9] तत्रैव.

प्रथमा सा इति पदेन परामृश्यते। अर्थात् सेति वचनं पूर्वसूत्रेणापि सम्बोधने या विहिता तस्या अपीयं संज्ञा यथा स्यात्। यथा- हे पचन्, हे पचमान इत्यत्र। असति त्वस्मिन् 'अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति पूर्वसूत्रेणैव या विहिता तस्या एव स्यात्। आमन्त्रितसंज्ञाकरणे सति हे देवदत्त इत्यादौ 'आमन्त्रितस्य च' इत्युदात्तत्वं भवति। 'आमन्त्रितम्' इति महत्याः संज्ञायाः करणं विविधफलार्थम्।

### 7.4. एकवचनं सम्बुद्धिः (२-३-४९)।

सूत्रेणानेन सम्बुद्धिसंज्ञा विधीयते। तस्मादेव संज्ञासूत्रमिदम्। सम्बोधने यद् एकवचनं तत् सम्बुद्धिसंज्ञकं स्यात्। सम्बोधने च इत्यस्मात् सूत्रात् सम्बोधने इत्युनवर्तते। पुनश्च प्रत्ययग्रहणपरिभाषया तदन्तग्रहणमपि न सम्भवति। तेन च सूत्रार्थः फलति- सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञकं स्यात्। हे पटु सु इति स्थिते सम्बोधने प्रथमाविभक्तेः एकवचनं सुप्रत्ययः सम्बुद्धिसंज्ञको भवति। तेन 'ह्रस्वस्य गुणः' इति सूत्रेण सम्बुद्धिसंज्ञके प्रत्यये परे ह्रस्वस्य उकारस्य गुणे ओकारे हे पटो सु इति स्थितिः। तेन च 'एङ्ह्रस्वात्संबुद्धेः' इति सूत्रेण संबुद्धिसंज्ञकस्य सुप्रत्ययस्य लोपो भवति। तेन हे पटो इति रूपम्। पुनश्च सुः सम्बुद्धिरिति वाच्ये एकवचनम् एकोऽर्थ उच्यते येन एकवचनस्यैव संज्ञार्थम्। अन्यथा सामन्त्रितमिति पूर्वसूत्रे तदन्तस्यामन्त्रितसंज्ञा कृतेति प्रक्रमाभेदाय इयमपि संज्ञा तदन्तस्यैव स्यादिति। इदमेव वक्ति भट्टोजिदीक्षितः- “सु सम्बुद्धिरिति वाच्ये एकवचनग्रहणमेकोऽर्थ उच्यते, येन तावन्मात्रस्य प्रत्ययस्य संज्ञार्थम्। अन्यथा प्रक्रमाभेदाय तदन्तस्य स्यात्”[10] इति।

---

[10]श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. २३९.

### 7.5. षष्ठी शेषे (२-३-५०)।

विधिसूत्रमिदम्। शेषे द्योत्ये षष्ठी स्यात्। को नाम शेषः। "कर्मादिभ्योऽन्यः प्रातिपदिकार्थव्यतिरेकः स्वस्वामिसम्बन्धादिः शेषः"[11] इति। "कारकप्रातिपदिकार्थ-व्यतिरिक्तः स्वस्वामिभावादिसम्बन्धः शेषः"[12] इति। अर्थात् कर्मादीनामपि सम्बन्धमात्रविवक्षायां षष्ठी जायते। अर्थात् कर्मादिकारकेभ्यः भिन्नः शेषशब्दः भिन्नमर्थं प्रतिपादयति। ते च सम्बन्धाः स्वस्वामिभावः, अवयवावयविभावः, जन्यजनकभावः। कर्मादीनाम् अविवक्षायां सत्यामपि क्रियाकारकपूर्वकः सम्बन्धस्तु विलसति एव। तदुक्तं हि शास्त्रे-

**"सम्बन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः।**

**श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते॥"**[13] इति।

तत्र हि अश्रुतायां क्रियायां राज्ञः पुरुष इत्यादौ क्रियाकारकसम्बन्धपूर्वकोऽन्य एव स्वस्वामिभावादिकः सम्बन्धः प्रतीयते। राज्ञः पुरुष इत्यत्र राजा पुरुषाय ददातीति बोधः। अत्र हि राजा कर्ता, पुरुषः संप्रदानम्। स च क्रियाकारकपूर्वकः सम्बन्धः। मातुः स्मरतीत्यादौ तु श्रूयमाणे क्रियाशब्दे सदपि कर्मत्वम् अविवक्षित्वा विशेषणभाव एव स्मरणं प्रति मातुः प्रतिपाद्यते। अत्र प्रश्नः समायाति- सतः कथम् अविद्यमानत्वम्। अत्र क्रियाकारकभावसम्बन्धे सति कथम् एतेषाम् अविवक्षा। सतोऽपि अविवक्षा जायते। यथा- अनुदरा कन्या इति। उदरो नास्ति इति वक्तुं न शक्यते। उदरस्य सत्त्वेऽपि नञः प्रयोगो भवति।

---

[11] का., द्वि. ख., सम्पा. स्वामीद्वारिकादासशास्त्री आचार्यकालिकाप्रसादशुक्लश्च, पृ. ६४.

[12] वै. सि. कौ., द्वि. भा., सम्पा. गिरिधरशर्मा परमेश्वरानन्दश्च, पृ. ६७२.

[13] वा. प., श्लो. सं. ३/१५६.

'षष्ठी शेषे' इत्यत्र अर्थनियमपक्ष उत प्रत्ययनियमपक्षो वेति विचारः पातञ्जलमहाभाष्ये उत *शब्दकौस्तुभे* रराजते। किमर्थं शेषग्रहणमिति प्रश्ने *महाभाष्ये* समाधानम्- “प्रत्ययावधारणाच्छेषवचनम्”[14]इति। प्रत्ययावधारणार्थं शेषग्रहणं कार्यम्। यतो हि प्रत्ययाः नियताः, अर्थाः अनियताः। तस्मादेव षष्ठी प्राप्नोति। तत्र शेषग्रहणं कर्तव्यं षष्ठीनियमार्थम्- शेषे एव षष्ठी भवति, नान्यत्र। अपरपक्षे, अर्थावधारणार्थं शेषग्रहणम्। पुनश्च अर्थाः नियताः, प्रत्ययाः अनियताः, ते शेषेऽपि प्राप्नुवन्ति। तत्र शेषग्रहणं कर्तव्यं शेषनियमार्थम्- शेषे एव षष्ठ्येव भवति नान्या। अर्थनियमपक्षे शेषग्रहणं कर्तुम् अशक्यम्। यतो हि अर्था नियताः, प्रत्यया अनियताः। अर्थात् षष्ठी भवति। यत्र षष्ठी चान्या च प्राप्नोति तत्र षष्ठ्येव भवति इति नियमः। पुनश्च उत्तरार्थमवश्यकर्तव्यस्य शेषग्रहणस्य स्पष्टार्थमिहैव ग्रहणम्। अप्रधानार्थं न शेषग्रहणम्। द्वयोः पर्यायेण वा न स्यादिति वाच्यम्। यतो हि प्रत्ययार्थस्य प्राधान्येन अप्रधानादेव षष्ठ्या न्याय्यत्वात्। सम्बन्धो द्विष्ठो भवति। तस्मादेव षष्ठी कस्माद्भवति इति प्रश्ने, प्रतियोगिवाचकात् राजन्पदात् एव षष्ठी। इदमेव मतं दीक्षितोऽपि प्रतिपादयति। तन्मतम्- “ननु प्रत्ययनियमपक्षे शेष एवेत्यवधारणार्थमस्तु नाम शेषग्रहणम्। अर्थनियमपक्षे तु षष्ठ्याश्चान्यस्य च प्राप्तौ षष्ठ्येवेति नियमसम्भवात्किन्तेनेति चेन्न, उत्तरार्थमवश्यकर्तव्यस्य शेषग्रहणस्य स्पष्टार्थमिहैव ग्रहणम्”[15] इति। अर्थात् पातञ्जलमेव मतम् अनुकरोति *शब्दकौस्तुभ*कार इति विवेकः।

पुनश्च शेषग्रहणं कुतः इति भट्टोजिदीक्षितः स्पष्टीकरोति- अप्रधानार्थं शेषग्रहणं विहितं, तेन द्वयोः प्रधानाप्रधानयोः पर्यायेण वा षष्ठीविभक्तिः न स्यात् इत्यपि न वाच्यम्।

---

[14] महा. भा., द्वि. ख., सम्पा. भार्गवशास्त्री जोशी, पृ. ५१९.

[15] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. २४०.

यतो हि प्रत्ययार्थस्य प्राधान्येन षष्ठ्या न्यायत्वम्। "अप्रकृत्यर्थं पुरुषं तु राज्ञाः इति षष्ठ्यर्थस्य विशेषणत्वमुचितमेव इति दिक्"[16]। एवं सविमर्शं *शब्दकौस्तुभ*काराशयः प्रतिपादितः इति शिवम्।

### 7.6. ज्ञोऽविदर्थस्य करणे (२-३-५१)।

ज्ञः अविदर्थस्य इति पदच्छेदः। ज्ञ इति ज्ञाधातोः अनुकरणात् षष्ठ्या एकवचने रूपम्। विद्- धातोः नैकेऽर्थाः विलसन्ति। विद् नाम ज्ञानम्। विद् अर्थो यस्य, स विदर्थः। न विदर्थ इति अविदर्थः। अर्थात् ज्ञानभिन्नार्थकः। जानातेः ज्ञानभिन्नार्थकस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात्। *शब्दकौस्तुभे* सूत्रार्थः- "जानातेरज्ञानार्थकस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात्"[17] इति। यथा- सर्पिषो जानीते इति। प्रकृते हि ज्ञाधातोरर्थः प्रवृत्तिः। अत्र हि करणं सर्पिः। तस्य करणस्य शेषत्वेन विवक्षिते षष्ठी स्यात्। करणीभूतं यत्सर्पिस्तत्ससम्बन्धिनी प्रवृत्तिरिति। अत्र हि शङ्का- सर्पिषो ज्ञानमित्यत्र 'षष्ठी शेषे' इत्यनेनापि सूत्रेण शेषत्वेन विवक्षिते षष्ठी भवितुमर्हति। कथं पुनः इदं सूत्रम्। अत्र हि समाधानम्- 'षष्ठी शेषे' इति सूत्रेण षष्ठीविधाने सति 'षष्ठी' इति सूत्रेण समासो भवितुमर्हति। परन्तु समासनिवृत्त्यर्थं सूत्रमिदम्। एवञ्च 'ज्ञोऽविदर्थस्य करणे' इत्यनेन सूत्रेण षष्ठीविधाने सति समासो न भवति। यतो हि नियमो

---

[16] तत्रैव.

[17] तत्रैव.

राजते- 'प्रतिपदविधाना षष्ठी न समस्यते' इति। तथाहि दीक्षितः *शब्दकौस्तुभे* भणति- "समासनिवृत्त्यर्थमिदं प्रकरणमिति"[18] इति।

## 7.7. अधीगर्थदयेशां कर्मणि (२-३-५२)।

विधिसूत्रम् इदम्। अनेन हि सूत्रेण अनभिहिते कर्मणि षष्ठी विधीयते। अधीगर्थाः स्मरणार्थाः, दय दानगतिरक्षणेषु, ईश एश्वर्ये इत्येषाम् अनभिहिते कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति। दीक्षितः *शब्दकौस्तुभे* भणति- "एषां कर्मणि शेषे षष्ठी स्यात्"[19] इति। स्मृत्यर्थ इत्युक्ते अधीगर्थ इत्युक्तिः किमर्था। अधिपूर्वकः इङ् धातुः इक् धातुश्च स्मरणार्थकः। इङ् इकौ अध्युपसर्गतो न व्यभिचरतः। अर्थात् इक् इङ् धातुश्च अध्युपसर्गपूर्वको भवति। तथैव दीक्षितः भणति- "इङिकावध्युपसर्गं न व्यभिचरति"[20] इति। अत एव स्मृत्यर्थदयेषामिति नैव सूत्रम् उक्तम्। एवञ्च अत्र सूत्रभङ्गपक्षे कित्त्वं कर्तव्यम्। यथा- मातुः स्मरणम् इत्यत्र मातृसम्बन्धिस्मरणमित्यर्थे कर्मणि षष्ठी, विशेषवचनविहितषष्ठी यत्र तत्र शेषे षष्ठी इव षष्ठ्यन्तेन न समासस्तथा च व्यस्तमेव। अपरं सर्पिषो दयनम् इत्यत्र घृतं मे प्राप्तं स्यादित्यर्थे गमनरूपा प्रवृत्तिः। अपरं सर्पिषो ईशनम् इत्यत्र सर्पिर्मे भूयादित्याशंसनमित्यर्थः। अत्र हि अधीगर्थदयेशां कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यादिति फलितार्थः।

---

[18] तत्रैव.

[19] तत्रैव.

[20] तत्रैव.

## 7.8. कृञः प्रतियत्ने (२-३-५३)।

विधिसूत्रमिदम्। अनेन कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यात्। प्रतियत्नो नाम कः। प्रतियत्न इत्युक्ते गुणाधानम्। उत्पत्त्यनुकूलव्यापारजन्यफलनिष्ठाधेयताश्रयरूप-कर्मवाचकात् शेषे षष्ठी गुणाधानेऽर्थे गम्ये। अन्यस्य गुणाः सन्निकर्षेणान्यत्रारोपिताः। अस्य हि सूत्रस्यार्थः निगदितः- "करोतेः कर्मणि शेषे षष्ठी स्यात् गुणाधाने"[21] इति। एधोदकस्योपस्करणम्। एधाश्चोदकञ्चेति विग्रहे "जातिरप्राणिनाम्" इत्यनेन एकवद्भावो भवति। ततश्च "उपात्प्रतियत्न" इति सूत्रेण सुट् भवति। अत्रापि शेषे षष्ठी भवति।

## 7.9. रुजार्थानां भाववचनानामज्वरेः (२-३-५४)।

अनेनापि शेषत्वेन विवक्षिते षष्ठी स्यात्। तदर्थम् इदं विधिसूत्रम्। रुजार्थानां धातूनां भाववचनानां भावकर्तृकाणां ज्वरिवर्जितानां कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवतीति सूत्रार्थः। रुजार्थानाम् इत्युक्ते रुजा, पीडा, रोग इत्यर्थो येषाम्। भावकर्तृकाणाम् इत्युक्ते वक्तीति वचनः, कर्तरि ल्युट्-प्रत्ययः। प्रकृत्यर्थो न विवक्षितः। भावो= धात्वर्थो, वचनः= कर्ता येषामिति विग्रहः। भावकर्तृकाणामिति फलितमिति भाष्ये स्पष्टम्। शेष इति कर्मणीति चानुवर्तते। अस्य हि सूत्रस्यार्थः *शब्दकौस्तुभे-* " भावकर्तृकाणां ज्वरिवर्जितानां रुजार्थानां कर्मणि शेषे षष्ठी स्यात्"[22] इति। चौरस्य रोगस्य रुजा। अत्र रुजेति व्याधिकृतसन्तापादिपीडा कथ्यते। रोगश्चौरं सन्तापादिना पीडयतीति पर्यवसन्नोऽर्थः।

---

[21] तत्रैव.

[22] तत्रैव.

रोगकर्तृका वस्तुतः कर्मीभूतचौरगता सन्तापादिपीडेत्यर्थः। रुजो भङ्गे इत्यत्र भिदादिपाठात् प्रकृतसूत्रे एव निपातनाद्वाङ्। रुजाशब्दो हि व्याधौ रुढः। सूत्रे हि भाववचनानामिति कर्तरि ल्युट्। प्रकृत्यर्थस्तु नेह विवक्षितः। भावो वक्ता सम्भवति। तस्मात् प्रत्ययस्य साधुत्वनिर्वाहाय वचिर्बोध्यः। "अज्वरिसन्ताप्योरिति वाच्यम्" इति वार्त्तिकम्। रुजार्थानां भाववचनानां ज्वरिसंतापिवर्जितानामिति सूत्रं वक्तव्यमित्यर्थः। रोगस्य चौरज्वर इति। अत्र चौरज्वरशब्दे शेषषष्ठ्या समासो भवत्येव, शेषषष्ठ्याः पुनर्विध्यभावात्। एवं 'रोगस्य चौरसंताप' इत्यत्रापि बोध्या। अत्राऽज्वरिसंताप्योरित्यनुक्तौ तु रुजार्थानां भाववचनानां कर्मणि शेषे चौरशब्दात्षष्ठी स्यादित्यतिव्याप्तिं दर्शयितुमाह रोगकर्तृकमिति। रोगकर्तृको वस्तुतः कर्मीभूतचौरसंबन्धी ज्वरः संतापो वेति यावत्। एवञ्च ज्वरिसंताप्योः रुजार्थकत्वाद्रोगात्मकभावकर्तृकत्वाच्च तत्कर्मणश्चौरस्य शेषत्वविवक्षायां नानेन षष्ठी, किन्तु कृद्योगे षष्ठी, षष्ठी शेषे इत्येव षष्ठी वा। अतः- चौरज्वरः चौरसन्ताप इति समासो भवत्येवेति भावः।

### 7.10. आशिषि नाथः (२-३-५५)।

विधिसूत्रमिदम्। आशीः नाम शुभाशंसनम्। आङ् इत्युपसर्गपूर्वकः शास् अनुशिष्टौ इति धातुः। आशीरर्थस्य नाथतेः कर्मणः शेषत्वविवक्षायां षष्ठी स्यात्। तथाहि फलितार्थः- “आशीरर्थस्य नाथतेः शेषे कर्मणि षष्ठी स्यात्”[23] इति। यथा- सर्पिषो नाथनम्। सर्पिर्मे भूयादित्याशासनम्। अत्र हि पृच्छा- आशिषि इति किमर्थम्। अत्र हि माणवकनाथनमिति

[23] तदेव, पृ. २४१.

आशीरर्थाभावे सति आशिषि नाथः इत्यनेन सूत्रेण षष्ठी न भवति। तेन च "शेषे षष्ठी" इत्यनेन षष्ठी विधीयते। अथवा कर्मत्वविवक्षायां "कर्तृकर्मणोः कृति" इति सूत्रेण षष्ठी भवति। तदा च समासोऽपि भवति। परन्तु "आशिषि नाथः" इति विधीयमाना षष्ठी प्रतिपदविधाना षष्ठी। तस्मादेव "प्रतिपदविधाना षष्ठी न समस्यते" इति नयेन समासो न भवति।

### 7.11. जासिनिप्रहणनाटक्राथपिषां हिंसायाम् (२-३-५६)।

विधिसूत्रम् इदम्। अनेनापि कर्मणि शेषत्वेन विवक्षिते षष्ठी स्यात्। जासि निप्रहण नाट क्राथ पिषित्येतेषां धातूनां हिंसाक्रियाणां कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी विभक्तिर्भवति। अत्र हि जसु मोक्षणे इति दैवादिकस्य न ग्रहणम्। यतो हि दीर्घोपधनिर्देशात्, हिंसायाम् इत्युक्तेश्च। किन्तु जसु ताडने, जसु हिंसायाम् इति चुराद्योर्ग्रहणम्। एवञ्च निप्रोपसृष्टो हनो निप्रहणम्। अत्र हि हन्तेः इति णत्वं सौत्रत्वात्। नट नृत्तौ इत्यस्य तु घटादेरग्रहणम्, दीर्घनिर्देशात्। नट अवस्कन्दे चुरादिः। क्रथ हिंसायाम् इति घटादौ पठ्येत तस्यैह निपातनाद्वृद्धिरिति वृत्तिकारः प्राह। अत एव "क्रथ हिंसायाम्" इति युजादौ स्वरितेतं वदन्, देवस्तत्रैवानुदात्तेतं पठन् इति शाकटायनश्च मतान्तरपरतया नीतो माधवादिभिः। यथा- चौरस्य क्राथनम्। मित्त्वाद्दीर्घविकल्पार्थम्। अक्रथि अक्राथि। क्रथं क्रथम्। क्राथं क्राथम्। प्रकृतस्थले हि निपातनं बाधित्वा परत्वाद्धीर्घविकल्पः। पुनश्च निप्रौ संहतौ विपर्यस्तौ व्यस्तौ च। यथा- चौरस्य निप्रहणनं प्रणिहननं प्रहणनं वा।

*शब्दकौस्तुभ*ग्रन्थे न्यासोक्तं मतं समुद्धरति दीक्षितः। क्राथीति विकृतनिर्देशात् मित्त्वे कृतेऽपि वृद्धिर्यत्र भवति तत्रैव षष्ठी जायते। चङि वृद्ध्यभावे सति चोरम् अचिक्रथद् इति रूपम्। पुनश्च समासस्य निवृत्त्यर्थं प्रकरणम् आरब्धम्। चङन्ते शेषे षष्ठीति माधवः। पुनश्च क्राथेरेव

शेषे षष्ठी न तु ह्रस्वस्येति व्याख्यानात् प्रकरणं भित्त्वा प्रकृते तिङन्तमप्युदाहरणम् अस्तु इति सिद्धान्तात् न्यासस्याशयो न वाच्यः, एवमपि द्वितीयाया दुर्लभत्वात् प्रक्रमभेदे मानाभावाच्च। प्रकृते हि हरदत्तस्याशयः- घटादिपाठः "घटादयः षितः" इति आतिदेशिकषित्वे अङ् यथा स्यादित्येतदर्थम्। इदमपि युक्तियुक्तं न प्रतिभाति। "घटादयः षितः" इति मध्ये सूत्रितम्। तेन च पूर्वेषामेव षित्त्वं न तु परेषामपि, परश्चायमिति दिक्।

### 7.12. व्यवहृपणोः समर्थयोः (२-३-५७)।

इदमपि विध्यात्मकं सूत्रम्। यतो हि अनेनापि सूत्रेण शेषत्वे विवक्षिते षष्ठी स्यात्। व्यवहृ पण इत्येतयोः समर्थयोः समानार्थयोः कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी स्यात्। द्यूते क्रयविक्रयव्यवहारे च समानार्थत्वमनयोः। तथाहि दीक्षितः *शब्दकौस्तुभे* सूत्रार्थं प्राह- "शेषे कर्मणि षष्ठी स्यात्"[24] इति। अर्थाद् अत्रापि शेषत्वेन विवक्षिते षष्ठी विधीयते। व्यवहृपणोः क्रयविक्रये द्यूते तुल्यार्थता राजतेतराम्। यथा- शतस्य व्यवहरणं पणनं वा। अत्र शतसम्बन्धी क्रयविक्रयरूपेण विनियोगो देवनं वेत्यर्थः। शतरूपस्य कर्मकारकस्य शेषत्वेन विवक्षिते सूत्रेणानेन हि षष्ठी विधीयते। सम्प्रति पृच्छा- समर्थयोः इति पदं किमर्थं सूत्रे। यथा- शलाकाव्यवहारः। प्रकृते हि व्यवहारो नाम गणना। अत्र द्युतार्थः क्रयविक्रयार्थो नास्ति। अपरो हि दृष्टान्तः- ब्राह्मणपणनम्। पणनं नाम स्तुतिः। अत्रापि स्तुत्यर्थो वर्तते न तु द्युतार्थः क्रयविक्रयार्थश्च। तस्मादेव प्रकृते हि सूत्रेणानेन षष्ठी न भवति।

---

[24] तदेव, पृ. २४२.

**7.13. दिवस्तदर्थस्य (२-३-५८)।**

विध्यात्मकम् इदं शास्त्रम्। तच्छब्देन व्यवहृपणौ परामृश्येते। तौ च द्यूते क्रयविक्रयव्यवहारे च तुल्यार्थौ पूर्वसूत्रे वर्तेते। तेन द्यूतार्थस्य क्रयविक्रयव्यवहारार्थस्य दिवः कर्मणि षष्ठी भवति। अत्र हि शेषे इति न सम्बध्यते, उत्तरसूत्रद्वयारम्भात्। पूर्वसूत्र एव दिवेः सति तदर्थस्य इति कर्तव्यमेव। यद्यपि लाघवं तथापि योगविभागस्तु उत्तरार्थः करणीयः। एवञ्च अस्मिन् सूत्रे शेष इति न सम्बध्यते। तदेव प्राह दीक्षितः- "पूर्वसूत्रे एव दिवेः पाठे तदर्थस्येति न कर्तव्यमिति। यद्यपि लाघवं तथापि योगविभाग उत्तरार्थः, शेषसम्बन्धार्थश्च"[25] इति। एवञ्च व्यवहृपणिसमानार्थस्य दिवः कर्मणि षष्ठी स्यादिति फलितार्थः। अत्र हि 'शेषे' इत्यस्य सम्बन्धे 'विभाषोपसर्गे' इत्यत्र शेषे इति सम्बध्यते न वा, नाद्यः, 'दिवस्तदर्थस्य' इत्यनेनैव समासाभावस्य सिद्धत्वेन सूत्रवैयर्थ्यापत्तेः। न च पक्षे 'षष्ठी शेषे' इत्यस्य प्रवृत्त्या पक्षे समासप्रवृत्तिः फलम्। इह त्रिसूत्र्यां तिङन्तमप्युदाहरणम्। अत्र हि दृष्टान्तः- शतस्य दीव्यति। शतकर्मकव्यवहार इत्यर्थः। अत्रापि इयमेव पृच्छा- तदर्थस्य इति ग्रहणं कुतः। यतो हि तदर्थस्य इति ग्रहणाभावे सति द्युतार्थस्य क्रयविक्रयार्थस्य च ग्रहणं न सम्भवति। तेन च ब्राह्मणं दीव्यति इत्यत्र स्तुत्यर्थेऽपि षष्ठी प्राप्नोति। परन्तु तदर्थस्य इति ग्रहणे सति तदर्थाभावाद् ब्राह्मणं दीव्यति इत्यत्र षष्ठी न भवतीति विवेकः।

---

[25] तदेव, पृ. २४२.

### 7.14. विभाषोपसर्गे (२-३-५९)।

विध्यात्मकम् इदं शास्त्रम्। अस्मिन् सूत्रे शेषे इति न सम्बध्यते। तदर्थस्य इति चानुवर्तते। "दिवस्तदर्थस्य" इत्यस्य शास्त्रस्य अपवादभूतमिदम्। "दिवस्तदर्थस्य" इति नित्यं षष्ठ्यां प्राप्तायां सोपसर्गस्य विकल्पेन उच्यते। उपसर्गे सति दिवस्तदर्थस्य कर्मणि कारके विकल्पेन षष्ठी विभक्तिर्भवति। शतस्य प्रतिदीव्यति, शतं प्रतिदीव्यति वा। अनेन हि सूत्रेण प्रति इति उपसर्गयुक्तस्य दिविधातोः शताख्ये कर्मणि विकल्पेन षष्ठी भवति। पुनश्च कर्मणि कारके द्वितीया जायते। अत्रापि पुनः पृच्छा जायते- उपसर्गे इति पदं किमर्थम्। तदा समाधानम्- उपसर्गे इति पदाभावे शतस्य दीव्यति इत्यत्रापि विकल्पेन षष्ठी भवेत्। तद्वारणाय उसर्गे इति पदम्। एवञ्च शतस्य दीव्यति उपसर्गाभावान्न विकल्पः।

### 7.15. द्वितीया ब्राह्मणे (२-३-६०)।

विध्यात्मकमिदं सूत्रम्। अनेन हि सूत्रेण कर्मणि कारके द्वितीया विभक्तिर्भवति। ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि कारके द्वितीया विभक्तिर्भवति। गामस्य तदहः सभायां, दीव्येयुः। अनुपसर्गस्य षष्ठ्यां प्राप्तायां वचनमिदम्। उपसर्गसहितस्य तु छन्दसि व्यवस्थितविभाषया अपि सिद्ध्यति। तथाहि दीक्षितेन निगदितः सूत्रार्थः- “ब्राह्मणविषये प्रयोगे दिवस्तदर्थस्य कर्मणि द्वितीया वा स्यात्”[26] इति। पुनश्च सोपसर्गस्य छन्दसि व्यवस्थितविभाषयापि सिद्धे निरुपसर्गार्थ आरम्भः।

---

[26] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. २४२.

## 7.16. प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने (२-३-६१)।

विधिसूत्रम् इदम्। प्रोपसर्गाद् इष्यतेर्दैवादिकस्य गत्यर्थस्य लोण्मध्यमपुरुषैकवचने 'प्रेष्य' इति तत्साहचर्यात् ब्रुविरपि तथाभूत एव। अत एवेह शेषग्रहणं न सम्बध्यते, तिङन्तेन सह समासस्य अप्रसक्तत्वात्। देवतासम्प्रदानेऽर्थे वर्तमानयोः प्रेष्यब्रुवोः कर्मणो हविर्विशेषस्य वाचकाच्छब्दात्षष्ठी स्याद् इति फलितार्थः। अयमेव सूत्रार्थः *शब्दकौस्तुभे* निगदितः- "देवतासंप्रदानं यस्यार्थस्य तत्र वर्तमानयोः प्रेष्यब्रुहीत्यतयोः कर्मणोर्हविर्विशेषस्य वाचकाच्छब्दात् षष्ठी स्यात्"[27] इति। यथा- अग्नये छागं हविषो वपाया मेदसः प्रेष्यानुब्रूहि वा।

सम्प्रति पदकृत्यं समालोच्यते। सूत्रे प्रेष्यब्रुवोः इति पदं किमर्थमिति पृच्छा। अत्र हि प्रेष्यब्रुवोः इति पदाभावे देवतासम्प्रदानार्थे विद्यमानानां धातूनां कर्मणो हविषो वाचकाच्छब्दात् षष्ठी प्राप्नोति। तेन च अग्नये छागस्य हविर्वपां मेदो जुहोधि इत्यत्र हविर्वाचकात् मेदस् इति शब्दात् षष्ठी प्राप्नोति। तच्चानिष्टम्। तस्मादेव सूत्रे प्रेष्यब्रुवोः इति पदम्। यथा- अग्नये छागस्य हविर्वपां मेदो जुहोधि इत्यत्र प्रेष्यब्रुवोः इति पदाभावे मेदस्शब्दात् षष्ठी न भवति।

अपरा हि शङ्का- हविषः इति पदं सूत्रे किमर्थम्। उक्तपदाभावे सति हविर्भिन्नवाचकात् देयपदार्थाद् अपि षष्ठी प्राप्नोति। यथा- अग्नये गोमयानि प्रेष्य इत्यत्र गोमयपदार्थादपि षष्ठी प्राप्नोति। तच्चानिष्टम्। उक्तपदग्रहणे सति गोमयपदार्थस्य हविर्वाचकत्वेन ग्रहणाभावान्न षष्ठीति विवेकः।

---

[27] तत्रैव.

अन्तिमा हि पृच्छा- देवतासम्प्रदाने इति पदं कुतः। उक्तपदाभावे देवतासम्प्रदानभिन्नार्थेऽपि षष्ठी प्राप्नोति। तेन च माणवकाय पुरोडाशान् प्रेष्य इत्यत्र देवतासम्प्रदानभिन्नार्थे विद्यमानस्य प्रेष्य इति धातोः कर्मणः हविर्वाचकात् पुरोडाशात् षष्ठी प्राप्नोति। किन्तु उक्तपदग्रहणे सति देवतासम्प्रदानभिन्नार्थस्य विद्यमानात् पुरोडाशात् षष्ठी न भवति।

इन्द्राग्निभ्यां छागं हविर्वपाम्मेदः प्रस्थित प्रेष्य इह सूत्रे शेषग्रहणं न सम्भवति। यतो हि तिङन्तेन समासस्य अप्रसक्तत्वात्। नियमोऽयं लोकेऽपि प्रवर्तते। उत्तरत्र छन्दोग्रहणसम्भवाद् इति विवेकः।

### 7.17. चतुर्थ्यर्थे बहुलं छन्दसि (२-३-६२)।

विधिसूत्रम् इदम्। अनेन सूत्रेण हि षष्ठी विधीयते। काशिकाकारः सूत्रार्थं प्राह- “छन्दसि विषये चतुर्थ्यर्थे षष्ठी विभक्तिर्भवति बहुलम्”[28] इति। यथा- पुरुषमृगश्चन्द्रमसे गोधाकालकादार्वाघाटस्ते वनस्पतीनाम्, वनस्पतिभ्यः इत्यर्थः। प्रकृते हि वनस्पतीनाम् इत्युक्ते वनस्पतिभ्यः। अर्थात् प्रकृते हि चतुर्थ्यर्थे षष्ठी भवति। अर्थात् चतुर्थ्याः षष्ठ्यर्थः। सूत्रे हि बहुलग्रहणं विहितम्। तस्मात् क्वचित् चतुर्थी विभक्तिरपि विधीयते। 'षष्ठ्यर्थे चतुर्थीत्यपि वक्तव्यम्’ इति वार्त्तिकम्। अनेन हि षष्ठ्यर्थे चतुर्थी विभक्तिः विधीयते।

[28] का., द्वि. ख., सम्पा. स्वामीद्वारिकादासशास्त्री आचार्यकालिकाप्रसादशुक्लश्च, पृ. ७६.

## 7.18. यजेश्च करणे (२-३-६३)।

विधिसूत्रं भवति इदम्। अनेन हि सूत्रेण करणे कारके बहुलं षष्ठी विभक्तिर्भवति। अर्थात् यजिधातोः करणकारके छन्दोविषये बहुलं षष्ठी भवति। अर्थात् सूत्रार्थं प्राह काशिकाकृद्- "यजेर्धातोः करणे कारके छन्दसि बहुलं षष्ठी विभक्तिर्भवति"[29] इति। अर्थात् प्रकृते हि षष्ठ्या अर्थः करणम्। करणे एव बहुलं षष्ठी भवति। तेन क्वचित् तृतीया भवति। क्वचिच्च षष्ठी भवति। तथा हि दृष्टान्तः- 'घृतस्य घृतेन वा यजते' इत्यत्र करणे एव षष्ठी भवति। बहुलग्रहणसामर्थ्यात् तृतीया अपि जायते। सौम्यस्य यजते, सोमेन यजते इत्यत्रापि तथैव बोध्यम्।

## 7.19. कृत्त्वोऽर्थप्रयोगे कालेऽधिकरणे (२-३-६४)।

विधिसूत्रमिदम्। अत्र हि छन्दसि बहुलमिति निवृत्तम्। पुनश्च 'दिवस्तदर्थस्य' इत्यादिपूर्वसूत्रे विच्छिन्नमपि शेषग्रहणं मण्डूकप्लुतिन्यायेन इहानुवर्तते। किं तर्हि प्रमाणम्। अत्र मानम्- 'व्याख्यानतो विशेषप्रतिपत्तिर्न हि सन्देहादलक्षणम्' इति। अर्थात् समस्यायां सत्यां हि व्याख्यानमेव शरणम्। 'कर्तृकर्मणोः कृति' इति सूत्रे कर्मपदग्रहणादेव प्रतिपन्नं यत् शेषग्रहणमिह चानुवर्तते। दीक्षितः *शब्दकौस्तुभे* वक्ति- "इह षट्सूत्र्या विच्छिन्नमपि शेषग्रहणमनुवर्तते, उत्तरसूत्रे कर्मग्रहणात्"[30] इति। क्रियाया अभ्यावृत्तिः। अर्थात् पुनः पुनर्जन्म। स च क्रियाया एव भवति। कृत्वसुचोऽर्थ इव अर्थो येषां प्रत्ययानां ते कृत्वोऽर्थाः।

---

[29] तत्रैव.

[30] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. २४२.

कालवाचकः अधिकरणवाचकश्च अहन्शब्दः तस्मात् अधिकरणे सप्तमी प्राप्ता, किन्तु अधिकरणस्य शेषत्वविवक्षायां षष्ठी स्यात्। यथा- पञ्चकृत्वो भोजनम्। दिवसम्बन्धि पञ्चवारं भोजनम्। अपरं हि उदाहरणम्- द्विरह्नो भोजनम्। अर्थात् दिवसम्बन्धि द्विवारं भोजनम्।

अत्र हि पृच्छा- शेषे इति ग्रहणं कुतः। शेषस्य मण्डूकानुवृत्तौ किम्मानम्। वृत्त्यादिप्रमाणं तदनुवृत्तेः। तथा हि अधीगर्थदयेशां कर्मणि इति सूत्रे 'कर्मादीनामविवक्षा शेषः' इति भाष्ये अधिकरणघटितेऽस्मिन् सूत्रे शेषपदासम्बन्धे 'कर्मादीनामविवक्षा शेषः' इति बहुवचनासङ्गतिः। एतद्व्यतिरिक्ते कर्मकरणयोर्द्वयोरेव उपलम्भात्। वस्तुतस्तु कर्माश्रयषष्ठीविषये सूत्रोपात्तसकर्मकाणामकर्मकवद् वचनम् इति वार्त्तिकप्रत्याख्यानाय शेषे इति वर्तते इति भाष्यकृतोक्ते परेण शेषश्च कः इति पृष्टे शेषे षष्ठी इति सूत्रोक्तं कर्मादीनामविवक्षा शेषः इति सिद्धान्तिना स्मारितः।

### 7.20. कर्तृकर्मणोः कृति (२-३-६५)।

विधिसूत्रं हि इदम्। अनेन सूत्रेण अनभिहिते कर्तरि कर्मणि च षष्ठी विधीयते। यद्यपि पूर्वतनसूत्रेषु शेषसम्बन्धो राजते तथापि इह न वर्तते शेषसम्बन्धः। अत्र सूत्रार्थः समायाति- कृदन्तपदवाच्यक्रियायाः अनभिहिते कर्तरि कर्मणि च षष्ठी स्यात्। यथा- भवतः शायिका इत्यत्र भावे ण्वुच्-प्रत्ययो भवति। तेन च कर्ता अनभिहितः। तेन च कृदन्तपदवाच्यक्रियाया अनभिहिते कर्तरि भवत् इत्यत्र षष्ठी भवति। अपरञ्च अपां स्रष्टा इत्यत्र कर्तरि अर्थे तृच्-प्रत्ययविधानात् कर्म अनभिहितम्। तेन च कृदन्तपदवाच्यक्रियाया अनभिहिते कर्मणि अप् इत्यत्र षष्ठी भवति।

अत्र हि शङ्का- कर्तृकर्मणोः इति पदं सूत्रे कुतः। उक्तपदोपादाने सति सूत्रार्थः समायाति- कृदन्तपदवाच्यक्रियायाः अनभिहिते कारके षष्ठी भवति। तथा- शस्त्रेण भेत्ता इत्यत्र कृदन्तपदवाच्यक्रियाया अनभिहिते करणकारके षष्ठी भवति। इदञ्चानिष्टम्। उक्तपदोपादाने सति अनभिहिते कर्तरि कर्मणि च षष्ठी भवति न तु करणे।

कृद्ग्रहणं किमर्थम् इति महती शङ्का। कृद् इति पदेन कृदन्तपदवाच्यक्रियायाः संग्रहः। इह कर्तृकर्मभ्यां क्रिया एवाक्षिप्यते। क्रियावाचीह धातुरेव। धातोः परं द्वौ प्रत्ययौ स्तः। एकः तिङ्, अपरश्च कृत्। तथा सति तिङन्तपदवाच्यक्रियाया अनभिहिते कर्तरि कर्मणि च षष्ठी भवतीति सूत्रार्थः। तथा सति देवदत्तः ग्रामं गच्छतीत्यादौ तिङन्तपदवाच्यक्रियाया अनुक्ते ग्रामाख्ये कर्मणि षष्ठी प्राप्नोति। तदर्थमपि न कृद्ग्रहणम्। यतो हि “न लोकाव्ययनिष्ठा...” इत्यादिसूत्रेण निषेधात्। ततश्च परिशेषात् कृदन्तपदवाच्यक्रियाया एव अनभिहिते कर्तरि कर्मणि च षष्ठी भवति। ततश्च दीक्षितः भणति- “ततश्च परिशेषात् कृद्योग एव षष्ठी भविष्यति तत् किं कृद्ग्रहणेन”[31] इति। इह हि तद्धितान्तस्य वारणार्थं कृद्ग्रहणम्। यथा- कृतपूर्वी कटम् इति। कृतः कटः पूर्वमनेनेत्यस्मिन् विग्रहे क्तस्य कर्मणि विधानात्तेनैव कर्मण उक्तत्वात् द्वितीया न भवति। एवञ्च तस्य अपवादत्वेन षष्ठी भवति, इह अनभिहितत्वात्।

किञ्च कृतशब्दस्य कटसापेक्षतया समासो दुर्लभः। एवं तद्धितविषयेऽपि तथा स्यात्। अत्रोक्तं हरिणा-

**“विशेषकर्मसम्बन्धे निर्भुक्तेऽपि कृतादिभिः।**

**विशेषनिरपेक्षोऽन्यः कृतशब्दः प्रवर्तते॥**

---

[31] तदेव, पृ. २४३.

**अकर्मकत्वे सत्येवं क्तान्ते भावाभिधायिनि।**

**ततः क्रियावता कर्त्रा योगो भवति कर्मणाम्॥**

**अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः।**

**क्रिया सम्बध्यते तद्वत् कृतपूर्व्यादिषु स्थिता॥"**[32] इति।

अस्यायमर्थः- कृतादिभिः शब्दैः कटादिशब्दसमभिव्याहाराद् विशिष्टकर्मसम्बन्धे निष्कृष्य भुक्तेऽपि अनुभूतेऽपि कृतः पूर्वे कटोऽनेन इति अवस्थायामिति भावः, तस्यां हि दशायां वृत्तिविरहात्। कर्मसामान्यवचनोऽन्य एव कृतशब्दः प्रवर्तते वृत्तिं लभते। अविवक्षितकर्मतायां नेह पच्यते इत्यादावपि कर्मसामान्ये प्रत्ययाभ्युपगमादिति भावः।

अविवक्षितकर्मणां भावे प्रत्ययो भवतीत्यपि मतान्तरं दरीदृश्यते। कर्मसामान्ये भावे वा क्तप्रत्यये कृते सापेक्षविरहात् "सुप्सुपा" इति समासे कृते "पूर्वादिनिः" "सपूर्वाच्च" इति कर्त्रर्थे इनिप्रत्ययो भवतु। प्रथमपक्षे तु कटस्य क्तप्रत्ययेन अभिधानं दुर्वारम्।

ननु क्रिययापि योगाभावे कथं द्वितीया भवति। विशिष्य ग्रहो ग्रहणं तद्रहिताप्राधान्येनागृह्यमाणापीत्यर्थः। अस्य हि अयमाशयः- गुणभूतयापि क्रियया कारकाणां सम्बन्धो दृश्यते, यथा कटं कृतवान् इति। कृतपूर्वीशब्दश्चायं पूर्वं कृतमनेन इत्यस्मिन्नर्थे व्युत्पादितः। पूर्वं कृतवान् इत्यनेन समानार्थः सम्पद्यते। तत्र करोति क्रियापेक्षम् अस्ति कटस्य कर्मत्वम्। अनभिहितं तत्। अतः असति हि कृद्ग्रहणे षष्ठी स्यादेव इति स्थिरम्।

अत्र हि ओदनः पच्यतेतमां, "गुरुर्धरित्री क्रियतेतरान्त्वया" इत्यादावपि ओदने धरित्र्यादेः कर्मणः क्रिययैव योगाद् द्वितीयैव स्यात्। क्रियाविशेषणीभूतेन लकारार्थेन

---

[32] तत्रैव.

कर्मान्वयश्चेत् क्तार्थेनाप्यस्तु। क्रियायाः कारकेष्विव शक्तेरपि शक्तिमत्युत्थिताकाङ्क्षकत्वाविशेषात्। किञ्चास्तु नाम कथञ्चित् क्तार्थपरित्यागेन वृत्तिः, राजपुरुषादौ संख्याविशेषस्य मासजातादौ गुणप्रधानभावादेश्च बहुशस्त्यागदर्शनात्। तथा हि कृद्ग्रहणं व्यर्थमेव, "न लोकाव्यय" इति निष्ठायोगे निषेधसिद्धेः। निष्ठान्तधातूपात्तक्रियायोगे न भवतीति हि तदर्थः।

कृत्येव यथा स्यात् तद्धिताधिक्ये मा भूदिति कृद्ग्रहणम्। प्राज्ञः व्याकरणमिति "प्रज्ञादिभ्यश्च" इति स्वार्थिकः अण्प्रत्ययो भवति। ननु ओदनस्य पाचकतमः इत्यत्र षष्ठी न लभ्यते। कृतपूर्वीतिवत् कर्तव्यपूर्वीत्यादेरभ्युपगमे तु तव्यदाद्यन्तेन समासादौ कृते कृद्ग्रहणव्यावर्त्यतापि सम्भवति।

### 7.21. उभयप्राप्तौ कर्मणि (२-३-६६)।

"कर्तृकर्मणोः कृति" इत्यनेन हि शास्त्रेण अनभिहिते कर्तरि कर्मणि च षष्ठी विधीयते। यत्र कर्तृकारकम् अनभिहितं कर्मकारकम् अनभिहितं च। तत्र अनभिहिते कर्तरि कर्मणि च उभयत्र षष्ठी प्राप्नोति। तथा सति अनिष्टप्रयोगः सम्भवति। यथा- 'कृष्णेन गवां दोहः' इत्यत्र दोह इति भावार्थे घञ्प्रत्ययो भवति। तेन च प्रकृते कर्ता अनुक्तः कर्म च अनुक्तम्। तेन च उभयत्र षष्ठी प्राप्नोति। तेन कृष्णस्य गवां दोह इति अनिष्टप्रयोगः स्यात्।

नियमसूत्रम् इदम्। उभयप्राप्तौ इति बहुव्रीहिः। तस्य हि विग्रहः- उभयोः प्राप्तिर्यस्मिन् कृति इति उभयप्राप्तिः। एवञ्च अस्यार्थो भवति यत्कृदन्तपदवाच्यक्रियायाः कर्तरि कर्मणि च युगपत्प्राप्तौ षष्ठी विभक्तिर्भवति। ततश्च सूत्रार्थो भवति- कृदन्तपदवाच्यक्रियायाः अनुक्ते कर्तरि कर्मणि च युगपत्षष्ठी प्राप्ता तत्र कर्मणि एव षष्ठीविभक्तिर्भवति न तु कर्तरि।

तत्र हि "अकाकारयोः प्रयोगे प्रतिषेधो नेति वक्तव्यम्" इति वार्तिकम्। अकप्रत्ययस्य अप्रत्ययस्य च प्रयोगे कर्तरि कर्मणि च षष्ठीनिषेधो न भवति। तेन हि रुद्र जगत् इत्यत्रापि षष्ठी प्राप्नोति। कथं क्तिना प्रत्ययेन बाधो न भवतीति "स्थागापापचो भावे" इति सूत्रे वृत्तिः। तथा सुटा सीयुटो बाधो न भवतीति, "सुट्तिथोः" इत्यत्र वृत्तिः। अत्र रक्षितः-अप्रत्ययादित्यकारप्रत्ययस्येह ग्रहणम्, प्राथम्यात्। बाधाशब्दे तु "गुरोश्च हलः" इत्यकार इत्याह करणत्वविवक्षायां तृतीयेति वा बोध्यम्। शेषे विभाषा इति वार्त्तिकम्। स्त्रीप्रत्ययविषयमेवेदमित्येके। विचित्रा सूत्रस्य कृतिः पाणिनेः पाणिनिना वा इति दृष्टान्तः। केचिद् अविशेषेण विभाषाम् इच्छन्ति। शब्दानाम् अनुशासनम् आचार्येण आचार्यस्य वेति।

### 7.22. क्तस्य च वर्तमाने (२-३-६७)।

"न लोकाव्ययनिष्ठाखलर्थतृनाम्" इति प्रतिषेधे प्राप्ते पुनः षष्ठीविधानाय शास्त्रमिदम्। वर्तमानकालविहितस्य क्तप्रत्ययस्य प्रयोगे षष्ठी विभक्तिर्भवति। तथाहि सूत्रार्थः कथ्यते- "वर्तमानार्थकस्य योगे षष्ठी स्यात्"[33] इति। तस्मादेवाह- "न लोक" इति निषेधस्यापवादः। यथा- राज्ञां मतो बुद्धः पूजितो वेति। अत्र हि वर्तमानार्थकः क्तप्रत्ययः। "मतिबुद्धिपूजार्थेभ्यश्च" इति वर्तमाने क्तप्रत्ययः। कथं तर्हि नपुंसके भावे क्तस्य योगे षष्ठी भवति। यथा- 'छात्रस्य हसितम्' इत्यत्र शेषत्वस्य विज्ञानात् सिद्धिर्भवति। यथा- ''छात्रेण हसितम्' इति कर्तृत्वविवक्षायां "कर्तृकरणयोस्तृतीया" इति तृतीया भवति। अत्र हि *महाभाष्यकारः*- 'क्तस्य वर्तमाने नपुंसके भाव उपसंख्यानम्' इति। यथा- छात्रस्य हसितम्, नटस्य भुक्तम्, मयूरस्य

[33] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. २४५.

नृत्तम्, कोकिलस्य व्याहृतमित्यादौ कथं षष्ठी भवति। अत्रैव समाधानवार्त्तिकम्- 'शेषविज्ञानात्सिद्धम्' इति। अर्थात् शेषलक्षणात्र हि षष्ठी विज्ञायते। अर्थात् भाष्यकृतः मतम् अनुकरोति दीक्षित इति विवेकः।

### 7.23. अधिकरणवाचिनश्च (२-३-६८)।

इदं विधिसूत्रम्। "क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः" इति सूत्रेण अधिकरणार्थे विहितस्य क्तप्रत्ययस्य योगे षष्ठी विभक्तिर्भवति। क्तप्रत्ययस्य योगे षष्ठी भवतीति सूत्रार्थः। यथा- इदम् एषां शयितम् इत्यत्र अधिकरणार्थे क्तप्रत्ययः। इह अनभिहिते कर्तरि षष्ठी विभक्तिर्भवति। पुनश्च सकर्मकेभ्यः धातुभ्यः अधिकरणार्थे विहिते क्तप्रत्यये सति कर्तरि कर्मणि च उभयत्र षष्ठी भवति। यतो हि उक्तस्थले कर्तृकर्मणी अनभिहिते। इदमेषां भुक्तमोदनस्य इत्यत्र अनभिहिते कर्तरि कर्मणि च षष्ठी विभक्तिर्भवति। अत्र शङ्का हि- "उभयप्राप्तौ कर्मणि" इत्यनेन सूत्रेण अनभिहिते कर्मण्येव षष्ठी भवतु। उभयत्र कथं षष्ठी। अत्र हि समाधानम्- "कर्तृकर्मणोः कृति" इत्यनेन सूत्रेण कर्तरि कर्मणि च उभयत्र षष्ठ्यां प्राप्तायां "उभयप्राप्तौ कर्मणि" इत्यनेन सूत्रेण केवलम् अनभिहिते कर्मणि षष्ठी विधीयते। परन्तु उक्तस्थले "अधिकरणवाचिनश्च" इति सूत्रेण षष्ठीविधानाद् "उभयप्राप्तौ कर्मणि" इति सूत्रमिह कार्यं न करोति। इह गत्यर्थेषु धातुषु अयं भवति। यथा- इदमेषां गतमित्यधिकरणे। इदमेते गता इति कर्तरि। इदमेभिर्गतमिति कर्मणि। इहैभिर्गतमिति नपुंसके भावे। कर्तृविवक्षाया इदमेषां गतमिति तत्रैव शेषविवक्षायाम्। विचारोऽयं भाष्ये *शब्दकौस्तुभे* च भूयशः दरीदृश्यते।

## 7.24. न लोकाव्ययनिष्ठाखलर्थतृनाम् (२-३-६९)।

विधिसूत्रम् इदं राजते। "कर्तृकर्मणोः कृति" इति षष्ठी प्राप्ता प्रतिषिध्यते। ल, उ, उक, अव्यय, निष्ठा, खलर्थ, तृन्- इत्येतेषां प्रयोगे षष्ठी विभक्तिर्न भवति। 'ल' इति "शतृशानचौ", "कानच्क्वसू", "किकिनौ" च गृह्यन्ते। लादेशाः- ओदनं पचन्, पचमानः, पेचानः, पेचिवान् इति। कथन्तर्हि- "बभ्रिर्वज्रं" "पपिः सोमं" "ददिर्गाः" इति। किकिनौ न लकारौ नापि तदादेशौ। अयं दोषः खलु। नायं दोषः। "किकिनौ लिट् च" इत्यनेन लिट्कार्यातिदेशः क्रियते न तु लिट्संज्ञा। अत्र हि न्यायः- विशेषातिदेशे सति सामान्यम् अपि अतिदिश्यते। उप्रत्ययस्य हि दृष्टान्तः- कटं चिकीर्षुः। कन्याम् अलङ्करिष्णुः। उक- वाराणसीम् आगामुकः। लक्ष्म्याः कामुकः। अव्ययस्य हि दृष्टान्तः- कटं कृत्वा। निष्ठा- ओदनं भुक्तवान्। देवदत्तेन कृतम्। खलर्थस्य हि दृष्टान्तः- त्वया सुकरम्। ईषत्पानः सोमो भवता। तृन् इति प्रत्याहारः "शतृशानचौ" इत्यारभ्य तृनो नकारात्। तेन हि शानन्प्रभृतीनामपि ग्रहणम्। तेन हि सोमं पवमानः इत्यत्रापि सोमप्रभृतीनां षष्ठी न भवति। यथा- द्विषः शतुर्वा। मुरस्य मुरं वा द्विषन्। सर्वत्र कारकषष्ठ्याः प्रतिषेधः। शेषे तु षष्ठी विभक्तिर्भवति। ब्राह्मणस्य कुर्वन्। सत्यानुरक्ता नरकस्य जिष्णवः। छात्रस्य हसितम्। जनिकर्तुरित्यादि।

**इक्ष्वाकूणां दुरापेऽर्थे त्वदधीना हि सिद्धयः।**

**अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयम्॥** इति।

इक्ष्वाकूणां सिद्धयः इत्यन्वयो न तु इक्ष्वाकूणां दुरापे इति। तथा वागधिपस्य विस्मयम् इत्यन्वयो न तु वागधिपस्य दुर्वचम् इति दिक्। इह उश्च उकश्च इति उकौ इति व्युत्पाद्य लश्च ऊकौ चेति विग्रहीतव्यम्। ऊकारेण च कृतो विशेषणात् तदन्तविधिः। व्यपदेशिवद्भावात् केवलेनापि निषेधः इति विवेकः।

**7.25. अकेनोर्भविष्यदाधमर्ण्ययोः (२-३-७०)।**

विधिसूत्रम् इदम्। भविष्यति अर्थे विहितस्य अकस्य भविष्यति आधमर्ण्यार्थे च विहितस्य इनः प्रयोगे षष्ठी न स्यात्। तथाहि सूत्रार्थः- “भविष्यत्यकस्य भविष्यदाधमर्ण्यार्थे नश्च योगे षष्ठी न स्यात्”[34] इति। यथा- ‘एधान् आहारको व्रजति’ इत्यत्र भविष्यत्यर्थे अकप्रत्ययो विहितः। तस्य प्रयोगे षष्ठी विभक्तिर्न भवति। अत एव एधान् इत्यत्र द्वितीया न तु षष्ठी। अपरं हि उदाहरणम्- व्रजङ्गामी इत्यत्र भविष्यत्यर्थे इन्प्रत्ययो विहितः। तस्य च प्रयोगे षष्ठी विभक्तिर्न भवति। अत एव व्रजम् इत्यत्र द्वितीया न तु षष्ठी। द्वितीयासमासप्रसङ्गे व्युत्पादितमेतत्। आधमर्ण्ये- शतं दायी इत्यत्र आधमर्ण्ये विहितः इन्प्रत्ययः। तस्य च प्रयोगे षष्ठी न भवति। भविष्यत् इत्यपि स्वर्यते खलु अत्र। तेन भविष्यदधिकारविहितस्य ग्रहणात् नेह। यथा- वर्षशतस्य पूरकः, पुत्रपौत्राणां दर्शकः। अत्र हि सामान्येन ण्वुल्प्रत्ययो विहितः। तस्मादेव षष्ठी भवत्येव इति विवेकः। इह हि यथासंख्यं वारयितुं भाष्ये योगो विभक्तः। अकस्य भविष्यति, इत आधमर्ण्ये चेति। *शब्दकौस्तुभे* भाष्ये च समविचारः परिलक्ष्यत इति विवेकः।

**7.26. कृत्यानां कर्तरि वा (२-३-७१)।**

विधिसूत्रमिदम् अस्ति। अनेन सूत्रेण हि विकल्पेन षष्ठी विधीयते। "कर्तृकर्मणोः कृति” इति सूत्रेण नित्यं कर्तरि षष्ठ्यां प्राप्तायाम् अनेन हि सूत्रेण विकल्पेन षष्ठी विधीयते। सूत्रस्यास्यार्थः- “कृत्यप्रत्ययानां योगे कर्तरि विकल्पेन षष्ठी विभक्तिर्भवति”[35] इति। यथा-

---

[34] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. २४६.

[35] का., द्वि. ख., सम्पा. स्वामीद्वारिकादासशास्त्री आचार्यकालिकाप्रसादशुक्लश्च, पृ. ८९.

'कर्तव्यम् इदं कृष्णेन कृष्णस्य वा' इति तव्यरूपस्य कृत्यप्रत्ययस्य योगेन कृष्णाख्ये कर्तरि विकल्पेन षष्ठी विभक्तिर्भवति। तस्मादेव एकपक्षे कृष्णेन अपरपक्षे कृष्णस्य इति।

अत्र हि शङ्का- कर्तरि इति पदं किमर्थम्। प्रदत्तपदाभावे सति कृत्यप्रत्ययानां योगे अनभिहिते कर्तरि कर्मणि च विकल्पेन षष्ठी भवतीत्यर्थः। यथा- गेयो माणवकः साम्नाम् इत्यत्र "भव्यगेय" इत्यनेन सूत्रेण कर्तरि यद्विधानाद् अनभिहितं कर्म। तस्मादेव अनभिहिते कर्मणि विकल्पेन षष्ठी स्यात्। परन्तु कर्तरि इति पदोपादाने सति कर्मणि अनुक्ते सति नित्यमेव षष्ठी स्यात् न तु विकल्पेन।

इहापि भाष्ये योगविभागः कृतो वर्तते। तद्यथा- कृत्यानाम् इति योगो विभज्यते। उभयप्राप्तौ कर्मणि इत्यस्माद् उभयप्राप्तौ इत्यनुवर्तते। पुनश्च न लोकाव्ययनिष्ठाखलर्थतृनाम् इत्यस्मात् सूत्रात् न इत्यपि अनुवर्तते। तथा हि सूत्रार्थः - कृत्यप्रत्ययान्तानां योगे कर्तरि कर्मणि च सामान्येन प्राप्तायाः षष्ठ्याः निषेधो विधीयते। यथा- नेतव्या व्रजं गावः कृष्णेन इत्यत्र अनुक्तं कर्म व्रजम्, अनुक्तः कर्ता कृष्णः। यथा- नेतव्य इत्यत्र तव्यप्रत्ययः कर्मणि भवति। अत्र प्रधानं कर्म गौः, गौणं कर्म व्रजम्, कर्ता कृष्णः। अनुक्तम् उभयम्। अत्र हि कर्तृकर्मणोः कृति इत्यनेन कर्मणि उभयप्राप्तौ कर्मणि इत्यनेन सूत्रेण प्राप्तायाः षष्ठ्या निषेधो विधीयते। यथा- अनुक्ते कर्मणि द्वितीया, अनुक्ते कर्तरि तृतीया भवति।

अपरो योगो हि कर्तरि इति। कृत्यानाम् इति पदम् अनुवर्तते। अयमेवार्थः पूर्वमेव प्रोक्त इति शेषः।

## 7.27. तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम् (२-३-७२)।

विभक्तिविधायकं सूत्रमिदम्। तस्मादेव विधिसूत्रमिदम्। तुल्यार्थकैः शब्दैः योगे विकल्पेन तृतीया विभक्तिः स्यात्, तुलाशब्दम् उपमाशब्दञ्च विहाय। पुनश्च शेषत्वविवक्षायां षष्ठी विभक्तिर्भवति। अयमेवार्थः प्रोक्तः- "तुल्यार्थैर्योगे तृतीया वा स्याच्छेषे, पक्षे षष्ठी"[36] इति। यथा- तुल्यः, सदृशः, समो वा कृष्णस्य कृष्णेन वा। अत्र हि तुल्यशब्दस्य समशब्दस्य सदृशशब्दस्य वा योगे कृष्णशब्दात् तृतीया भवति। पुनश्च शेषत्वविवक्षायां षष्ठी विभक्तिरपि भवति।

अत्र हि शङ्का भवति- अतुलोपमाभ्याम् इति पदं किमर्थम्। उक्तपदानुपादाने सति तुलाशब्दस्य उपमाशब्दस्य च योगेऽपि तृतीया भविष्यति। तच्च अनिष्टम्। तद्वारणाय उक्तपदग्रहणम्। उक्तपददाने सति तुला उपमा वा कृष्णस्य नास्ति इत्यत्र न तृतीया।

कथं तर्हि "तुलां यदा रोहति दन्तवाससा" इत्यत्र तुलाशब्दयोगे तृतीया विभक्तिर्भवति। पुनश्च "स्फुटोपमं भूतिसितेन शम्भुना" इत्यत्र उपमाशब्दयोगे कथं तृतीया भवति।

अत्र हि समाधानम्- तुला इत्युक्ते तोलनम्। अस्मिन्नेव सूत्रे "णिलुगङो" निपातनात् साधुरिति माधवः। उपमितिः उपमा। तत्र धात्वर्थं प्रति करणीभूतयोः दन्तवासःशम्भुशब्दयोः तृतीया युक्ता इति विचारः। यथा- उपमीयते अनेन इत्यादौ। प्रकृतसूत्रं तु शेषे षष्ठ्यपवादभूतं तृतीयाविधायकम्। नेह प्रवर्तते इति।

---

[36] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. २४७.

अन्यद्धि समाधानम्- सहार्थे तृतीया। अत्र हि मानम्- सहयुक्तेऽप्रधाने तृतीया। सहशब्दाभावेऽपि सहार्थे सति तृतीया भवति। "वृद्धो यूना" इति प्रामाण्यात्। पुनश्च तुल्यार्थैरित्यर्थग्रहणात्द्योतकानाम् इवादिशब्दानां योगे न भवतीति विवेकः। यथा- गौरिव गवयः। यथा- गौस्तथा गवय इति। वेति वर्तमाने अन्यतरस्यां ग्रहणमुत्तरसूत्रे चकारेण स्वस्यानुकर्षणार्थम्। अन्यथा हि तृतीयैव अनुकृष्येत, सन्निहितत्वादिति विचारः।

## 7.28. चतुर्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः (२-३-७३)।

विधिसूत्रम् इदम्। अनेन हि सूत्रेण चतुर्थी विभक्तिर्भवति। आशिष्यं च आयुष्यं च मद्रं च भद्रं च कुशलं च सुखञ्च इति द्वन्द्वसमासः। ततश्च अर्थशब्देन सह बहुव्रीहिः। पुनश्च अर्थशब्दस्य प्रत्येकम् अभिसम्बन्धः। अत्र हि नयः- द्वन्द्वान्ते श्रूयमाणं पदं प्रत्येकम् अभिसम्बध्यते इति। आशिष्यार्थे आयुष्यार्थे मद्रार्थे भद्रार्थे कुशलार्थे सुखार्थे इति बोधः। मद्रभद्रशब्दयोः समार्थकत्वात् सूत्रे अन्यतरो न पठनीयः। केषाञ्चिन्मते अर्थशब्दस्य पृथगेव ग्रहणम्। पुनश्च व्याख्यानाच्च सर्वत्रार्थग्रहणमित्याहुः। अस्य हि सूत्रस्यार्थः- एतदर्थैर्योगे चतुर्थी वा स्यात्, पक्षे षष्ठी च, आशिषि। तथा हि दीक्षितः *शब्दकौस्तुभे* सूत्रार्थं वक्ति- "आशिषि गम्यमानायाम् एतैर्योगे शेषे चतुर्थी वा स्यात्, पक्षे षष्ठी"[37]इति। अर्थात् एकस्मिन् पक्षे चतुर्थी भवति। अपरस्मिन् पक्षे षष्ठी भवति। यथा- आयुष्यं चिरञ्जीवितं देवदत्ताय देवदत्तस्य वा भूयात्। आयुष्यशब्दस्य योगे देवदत्तशब्दाद् विकल्पेन चतुर्थी षष्ठी च भवतः। एवं मद्रं भद्रं कुशलं निरामयं सुखं शम् अर्थः प्रयोजनं हितं पथ्यं भूयादित्यादि।

---

[37] तत्रैव.

हितयोगे चतुर्थी वक्तव्या इति वार्त्तिकम्। अनाशिषि गम्ये हितार्थत्वात् नित्यं चतुर्थी वक्तव्या। आशिषि गम्ये इति विकल्पेन चतुर्थी षष्ठी च भवतः।

अत्र हि अध्याये यथामति दीक्षितस्य नागेशभट्टस्य च मतानि समासेन समालोचितानि इति शम्।

## अध्यायसमीक्षणम्

"विभक्त्यर्थतृतीयाह्निकविमर्शः" इत्याख्ये सप्तमाध्याये अत्र "प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा" इत्यत्र प्रातिपदिकार्थमात्रे, लिङ्गमात्रे, परिमाणमात्रे, वचनमात्रे इति प्रथमा इति बोधो जायते। को नाम प्रातिपदिकार्थः। यतो हि एतद्विषये बहूनां विदुषां विप्रतिपत्तिर्राजतेतमाम्। प्रातिपदिकार्थः सत्ता इति *शब्दकौस्तुभ*कारः। सत्ता इत्युक्ते जातिरिति भर्तृहरिः। प्रोक्तं हि तत्र- "तस्यां सर्वे शब्दाः व्यवस्थिताः"[38] इति। पुनश्च तत्रैव पुनरुल्लिखितम्- "तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते"[39] इति। अन्ये तु प्रातिपदिकार्थ इत्युक्ते नियतोपस्थितिकः। नियता उपस्थितिर्यस्य सोऽर्थः नियतोपस्थितिकः। अत्र *शब्दकौस्तुभ*कारः प्रायः सर्वत्र भाष्यकारम् अनुसरति, किन्तु श्रीमन्नागेशः *शब्दकौस्तुभ*कारस्य *भाष्य*कारस्य मतम् अतिरिच्य कुत्रचित् भिन्नमेव मतं प्रदर्शयति।

"सम्बोधने च" इति सूत्रेणानेन हि प्रथमा विधीयते। प्रातिपदिकार्थसूत्रे मात्रग्रहणेन सम्बोधनाधिक्ये प्रथमा न प्राप्नोति, इति सम्बोधनाधिक्येऽपि प्रथमाविधानार्थं शास्त्रमिदम्।

---

[38] वा. प., श्लो. सं. ३/१/३३.

[39] वा. प., श्लो. सं. ३/१/३४.

इह सम्बोधनं प्रकृत्यर्थं प्रति विशेष्यं, क्रियां प्रति विशेषणम्। यथा- हे राम, मां पाहि। इह हि रामं प्रति मद्रक्षणं ज्ञाप्यम्। इदमेव वक्ति *शब्दकौस्तुभ*कारः- "इह प्रथमा स्यात्। हे राम।"[40] इति। इदं प्रतिपन्नमेव मतं सर्वशास्त्रकृत्सम्मतम्।

यतो हि *महाभाष्य*कारः सूत्रमिदं प्रत्याख्यातवान्। "सामन्त्रितम्" अपि च "एकवचनं सम्बुद्धिः" इति सूत्रद्वयमपि भाष्यकारेण प्रत्याख्यातम्। "षष्ठी शेषे" इत्यत्र पातञ्जलमेव मतम् अनुकरोति *शब्दकौस्तुभ*कार इति विवेकः। अन्यत्रापि सूत्रेषु प्रायः सर्वत्र श्रीमद्भट्टोजिदीक्षितः *महाभाष्य*कारस्य मतमेव अनुकरोति इति दिक्।

[40] श. कौ., द्वि. ख., सम्पा. गोपालशास्त्री, पृ. २३९.

# उपसंहारः

अयं शोधप्रबन्धः सप्ताध्यायात्मकः। प्रबन्धेऽस्मिन् आदौ प्रथमाध्याये उपोद्घातः वर्तते। जीवस्य सृष्टेः अनन्तरं कथं क्रमेण पशुतः मनुष्ये परिवर्तनं, ततश्च वाग्व्यवहारः, वैदिकज्ञानं, वैदिकज्ञानार्थं व्याकरणस्य उत्पत्तिः इति विषये चर्चितम्। तत्र किं नाम व्याकरणम्, कथं तस्य परम्परास्ति, के च आचार्याः आसन्, व्याकरणस्य प्रयोजनं वा किमस्ति, कथं वा तस्य समादरणीयत्वमित्येतत् सर्वं प्रतिपादितं वर्तते। ततश्च व्याकरणस्य भेदाः, पाणिनीतरव्याकरणस्य सामान्यपरिचयः, पाणिनीयव्याकरणस्य परिचयः, पाणिनीयव्याकरणस्य प्रधानग्रन्थस्य "*अष्टाध्यायी*" इत्यस्य सामान्यपरिचयः, त्रिमुनिव्याकरणस्य परम्परायाः स्वरूपं कथमासीत् इति विषयेऽपि संक्षेपेण आलोचना विद्यते, एवं प्रथमाध्यायस्य समाप्तिर्भवति।

द्वितीयाध्याये श्रीमद्भट्टोजिदीक्षितस्य देशकालकृतिपरिचयः वर्णिताः, तस्य कुत्र देशः आसीत्, कश्च तस्य कालः इति विषये पण्डितानां मतविरोधविषये च विश्लेषणं कृतमस्ति। *शब्दकौस्तुभ*ग्रन्थस्य सामान्यः परिचयः, श्रीमन्नागेशभट्टस्य देशकालकृतिपरिचयः, तेषां वंशपरिचयः तथा च गुरुशिष्यपरम्पराया एकं चित्रमपि प्रदर्शितं वर्तते। ततश्च *महाभाष्य*ग्रन्थस्य परिचयः माहात्म्यं च वर्णितम्। अध्यायस्य अन्ते च *उद्द्योत*टीकायाः परिचयः वर्तते, एवं द्वितीयाध्यायः समाप्तिं याति।

तृतीयाध्याये अपादानात् करणकारकपर्यन्तं द्वाविंशतिसूत्राणां *शब्दकौस्तुभः उद्द्योत*-दिशा च विस्तरेण विश्लेषणं, तत्र कारकस्य लक्षणविषये, "ध्रुवमपायेऽपादानम्" इति सूत्रस्य अपादानत्वविषये, "साधकतमं करणम्" इति सूत्रे करणत्वविषये च विश्लेषणम् एवम् अग्रे अन्येषां सूत्राणामपि एवंरूपेणैव विश्लेषणं कृतम्। विशेषवाक्यानां निगूढतया

स्पष्टीकरणम्, उभययोः उक्तानां मतानां सरलतया प्रतिपादनं, स्वकीयमतानां उपस्थापनम् अन्ते च सम्पूर्णस्य अध्यायस्य समीक्षणं कृतमस्ति, एवं तृतीयाध्यायः समाप्तिं याति।

चतुर्थाध्याये अधिकरणकारकात् कर्तृकारकपर्यन्तम् एकादशसूत्राणामपि *शब्दकौस्तुभः उद्द्योत*-दिशा च विस्तरेण विश्लेषणं, तत्र अधिकरणत्वं, कर्मत्वम् चेति विषये चर्चा वर्तते।

पञ्चमाध्याये “अनभिहिते” इत्यस्मात् सूत्रात् “मन्यकर्मण्यनादरे विभाषाऽप्राणिषु” इति सूत्रपर्यन्तं सप्तदशसूत्राणां विषये चर्चा वर्तते।

षष्ठाध्याये “कर्तृकरणयोस्तृतीया” इत्यस्मात्सूत्रात् “नक्षत्रे च लुपि” इति सूत्रपर्यन्तं अष्टाविंशतिसूत्राणां प्रवीननवीनमते विश्लेषणं वर्तते।

एवम् अन्ते सप्तमेऽध्याये को नाम प्रातिपदिकार्थः इति “प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा” इति सूत्रे प्रतिपादितः वर्तते। यतो हि एतद्द्विषये बहूनां विदुषां विप्रतिपत्तिर्राजते। प्रातिपदिकार्थः सत्ता इति शब्दकौस्तुभकारः। सत्ता इत्युक्ते जातिरिति भर्तृहरिः। प्रोक्तं हि तत्र- “तस्यां सर्वे शब्दाः व्यवस्थिताः” इति।

अन्ये तु प्रातिपदिकार्थ इत्युक्ते नियतोपस्थितिकः। नियता उपस्थितिर्यस्य सोऽर्थः नियतोपस्थितिकः इति सप्तमाध्यायस्य आदौ “प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा” इति सूत्रे विश्लषणं कृत्वा, ततः “चतुर्थी चाशिष्यायुष्य-मद्र-भद्र-कुशल-सुखार्थ-हितैः” इति सूत्रपर्यन्तम् आहत्य अष्टाविंशतिसूत्राणां चर्चा वर्तते। अन्ते च शोधप्रबन्धनिर्माणे परिशीलितसहायकग्रन्थानां सूची निर्मिता। एवं मम शोधप्रबन्धः समाप्तिं याति।

यतो हि विदुषां मते-

**कुतो वा नूतनं वस्तु वयमुत्प्रेक्षितुं क्षमाः।**

**वचो विन्यासवैचित्र्यमात्रमत्र विचार्यताम्॥** इति।

पाणिनिकात्यायनपतञ्जल्युपबृंहितव्याकरणसंसारे नूतनं कि वा पाणिनीयं वक्तुं शक्यते। प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्तते इति, प्रयोजनं विना न कस्यापि मानवस्य कस्मिन्नपि कर्मणि प्रवृत्तिर्दृश्यते। मम शोधप्रबन्धस्यापि वर्तते नूनमेव किञ्चित् फलम्। अनेन शोधपत्रेण तत्तद्ग्रन्थाणामध्ययनेन आत्मशुद्धिस्तु प्रथमं प्रयोजनं, द्वितीयं तु शास्त्रे अभिरुचिः वर्धेत, सर्वोपरि सविमर्शज्ञापितवचनसंग्रहविभूषितशोधप्रबन्धस्यास्यध्ययनेन व्याकरण-पठनपाठन-रसिकजनानां अभूतपूर्वम् आनन्दम् जनयिष्यति इति आशासे।

यतो हि-

**गच्छतः स्खलनं भवत्यैव क्वचित्।**

**हसन्ति दूर्जनाः तत्र समादधति सज्जनाः॥** इति।

॥ ॐ शान्तिः शान्तिः शान्तिः॥

# <u>परिशीलितग्रन्थसूची</u>


अनुभूतिस्वरूपाचार्यः । *सारस्वतव्याकरणम् (वृत्तित्रयात्मकम्)* । सम्पा. वासुदेवशर्मा। मुम्बाइ : पाण्डुरङ्ग जावजी श्रेष्ठना, 1922 (प्रथमसंस्करणम्)।

अन्नंभट्टः । *तर्कसंग्रहः* । सम्पा. गोविन्दाचार्यः। वाराणसी : चौखम्बा सुरभारती प्रकाशन, 2017।

अमरसिहः । *लिङ्गानुशासनम्* । सम्पा. हरगोविन्दः शास्त्री। वाराणसी : चौखम्बा संस्कत-संस्थानम्, 2006।

माधवाचार्यः। *सर्वदर्शनसंग्रहः* । सम्पा. उदयशङ्करः शर्मा। वाराणसी : चौखम्बा विद्याभवन, 2014।

आचार्यः, सत्यनारायणः। *Research Methodology* । तिरुपतिः : राष्ट्रीयसंस्कृतविद्यापीठम्, 2012 (द्वितीयसंस्करणम्)।

ओप्टे, वामन-शिवरामः। *संस्कृत-हिन्दी-कोशः* । दिल्ली : मोतीलाल-बनारसीदास-पाब्लिशार्स-प्राईभेट्-लिमिटेड्, 2007।

विश्वनाथकविराजः। *साहित्यदर्पणः* । सम्पा. कृष्णमोहनाचार्यः। वाराणसी : चौखम्बा संस्कृत संस्थान, 2015।

करणः, शिवशङ्करः। *बौद्धार्थवादसमीक्षणम्* । बेलुड़मठम् : रामकृष्ण-मिशन्-विवेकानन्द-विश्वविद्यालयः, 2016।

श्रीमज्जगदीशतर्कालङ्कारः। *शब्दशक्तिप्रकाशिका(शब्दप्रामाण्यनिरूपणम्)* । सम्पा. करः, श्रीगङ्गाधरन्यायाचार्यः । कोलकाता : महाबोधि वुक् एजेन्सी, 2014(प्रथमसंस्करणम्)।

भट्टोजिदीक्षितः। *प्रौढमनोरमा (अव्ययीभावान्तो भागः)*। सम्पा. सदाशिवशर्माशास्त्री। वाराणसी : चौखम्बा संस्कृत-सीरिज् अफिस्, 1992।

भट्टोजिदीक्षितः। *शब्दकौस्तुभः (द्वितीयखण्डम्)*। सम्पा. गोपालशास्त्री। वाराणसी : चौखम्बा संस्कृत-सीरिज, 1929 (प्रथमसंस्करणम्)।

भट्टोजिदीक्षितः। *शब्दकौस्तुभः (प्रथमभागः)*। सम्पा. सत्यनारायणमूर्तिः। तिरुपतिः : राष्ट्रीयसंस्कृतविद्यापीठम्, 2011 (प्रथमसंस्करणम्)।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी (श्रीवासुदेवदीक्षितप्रणीतया बालमनोरमाख्यया व्याख्यया श्रीज्ञानेन्द्रसरस्वती-विरचितया तत्त्वबोधिन्याख्यया व्याख्यया च सनाथिता*)। सम्पा. गिरिधरशर्मा, परमेश्वरानन्दश्च। वाराणसी : मोतिलाल-बनारसीदास, 2010 (पुनर्मुद्रणम्)।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी द्वितीयखण्डम् ('लक्ष्मी' व्याख्ययोपेता)*। सम्पा. पण्डितसभापतिमिश्र। वाराणसी : मोतिलाल-बनारसीदास, 1966 (प्रथमसंस्करणम्)।

भट्टोजिदीक्षितः। *वैयाकरणसिद्धान्तकौमुदी(कारकप्रकरणम्)*। सम्पा. श्रीअयोध्यानाथ सान्याल शास्त्री। कोलकाता : संस्कृत पुस्तक भाण्डार, 2018 (तृतीयसंस्करणम्)।

नागेशभट्टः। *परमलघुमञ्जूषा*। सम्पा. जयशङ्करलालः त्रिपाठी। वाराणसी : चौखम्बा कृष्णदासअकादेमी, 2011 (चुतर्थसंस्करणम्)।

नागेशभट्टः। *लघुशब्देन्दुशेखरः(कारकप्रकरणम्)*। सम्पा. तेजपालः शर्मा। वाराणसी : सम्पूर्णानन्द संस्कृत-विश्वविद्यालय, 2002।

पतञ्जलिः। *व्याकरणमहाभाष्यम् (द्वितीयखण्डम्) श्रीमदुपाध्यायकैयटप्रणीतेन भाष्यप्रदीपेन श्रीमन्नागेशभट्टविरचित-भाष्यप्रदीपोद्योतोद्भासितेनसमुल्लसितेन* । सम्पा. भार्गवशास्त्री जोशी । दिल्ली : चौखम्बा संस्कृत प्रतिष्ठान, 1987 (पुनर्मुद्रणम्)।

पतञ्जलिः। *व्याकरणमहाभाष्यम् (1-5) प्रदीपोद्द्योत भावबोधिनी हिन्दीव्याख्योपेतम्* । सम्पा. प्रो. जयशङ्करलाल त्रिपाठी । वाराणसी : चौखम्बा कृष्णदास अकादेमी, 2011 (द्वितीयसंस्करणम्)।

पाण्डेयः, श्रीरामाज्ञा । *व्याकरणदर्शनभूमिका* । वाराणसी : राजकीयसंस्कृतपुस्तकालयः, 2010।

पाणिनिः। *अष्टाध्यायी* । सम्पा. भट्टाचार्यः, ड. तपनशङ्करः । कोलकाता : संस्कृत वुक् डिपो, 2008 (प्रथमसंस्करणम्)।

बाहादुरः, स्यार्-राजा-राधाकान्तदेवः। *शब्दकल्पद्रुमः (Vol. 4). श्रीवरदाप्रसाद-वसुना-तदनुजेन-श्रीहरिचरण-वसुना च अशेषशास्त्रविशारदकोविन्दवृन्द-साहाय्येन संपरिवर्द्धितः* । वाराणसी : चौखम्बा संस्कृत-सिरीज्-अफिस्, 1967 (तृतीयसंस्करणम्)।

कौण्डभट्टः। *वैयाकरणभूषणसारः* । व्याख्या. सम्पा. मिश्रः, ड.आद्याप्रसादः. *"सावित्री"-हिन्दी-व्याख्योपेतः* । वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः, 1988 (प्रथमसंस्करणम्)।

भट्टाचार्यः, श्रीविश्वानाथपञ्चाननः । *न्यायसिद्धान्तमुक्तावली* । सम्पा. आचार्यः, श्रीकृष्णवल्लभः. *"किरणावली" समाख्यव्याख्योपेता* । वाराणसी : चैखम्बा संस्कृत संस्थान, 2014।

मिश्रः, जगदीशप्रसादः । *व्याकरणदर्शनस्य दर्शनान्तरैः सह तुलनात्मकमध्ययनम्*। दिल्ली : राष्ट्रीयसंस्कृतसंस्थानम्, 2006 (प्रथमसंस्करणम्)।

मिश्रः, ड. देवरूपः। *महाभाष्यनिगूढकृतयः*। वाराणसी : सम्पूर्णानन्द-संस्कृत-विश्वविद्यालयः, 1978।

मीमांसकः, आचार्यः श्रीयुधिष्ठिरः। *संस्कृत व्याकरण शास्त्र का इतिहास (Vol.1).* सम्पा. शास्त्री-त्रिपाठी, रामनाथः । वाराणसी : चौखम्बा पब्लिशर्स, 2000।

राजशेखरः। *काव्यमीमांसा (द्वितीयभागः)* । सम्पा. मिश्रः, मधुसुदनः। वाराणसी : चौखम्बा संस्कृत सिरिज् अफिस्, 1934 (प्रथमसंस्करणम्)।

वामनजयादित्यौ । *काशिकावृत्तिः (पाणिनीयाष्टाध्यायीव्याख्या, 1-2 भागौ)* । सम्पा. स्वामीद्वारिकदासशास्त्री आचार्यकालिकाप्रसादशुक्लः च । वाराणसी : प्राच्यविद्याप्रकाशन, 1965 (प्रथमसंस्करणम्)।

श्रीभर्तृहरिः। *वाक्यपदीयम्(ब्रह्मकाण्डम्)* । सम्पा. खण्डूड़ी, आचार्यः पं.सत्यनारायणः. *श्रीवामदेवाचार्यस्य संस्कृत-हिन्दी-"प्रतिभया" व्याख्यया समन्वितम्* । वाराणसी : चौखम्बा कृष्णदास अकादेमी, 1995।

श्रीभर्तृहरिः । *वाक्यपदीयम् (Vol-3)* । सम्पा. के. ए. सुब्रमान्यः। पुना : डेक्कन् कलेज्, 1966 (प्रथमसंस्करणम्)।

साहुः, सोमनाथः। *पाणिनीयपदव्यवस्था* । सम्पा. शतपथी, आचार्यः हरेकृष्णः। तिरुपतिः : राष्ट्रीयसंस्कृतविद्यापीठम्, 2011 (प्रथमसंस्करणम्)।

सोमयाजुलुः, के.वि. । *वाक्यपदीस्थसाधनसमुद्देशविमर्शः* । सम्पा. जड्डीपाल्, विरूपाक्ष वि. । दिल्ली : अमर ग्रन्थ पाब्लिकेशन्स, 2002 (प्रथमसंस्करणम्)।

हालदारः, गुरुपदः। *व्याकरण-दर्शनेर्-इतिहास (बङ्गभाषया)*। कोलकाता : संस्कृत वुक् डिपो, 2006।

Abhyankar, Kashinath Vasudev. *A Dictionary of SanskritGrammar*. Ed. B. J. Sandesara. Baroda : Oriental Institute, 1961 (1st Ed.).

Bhate, Saroja. *Pāṇini*. Delhi : Sahitya Academy, 2002.

Cardona, George. *Pāṇini and His Works and Its Traditions*. Delhi : Motilal Banarasidas, 1997.

*New Catalogus Catalogorum (Vol. 10)*. Ed. Dr. K. KunjunniRaja. Madras : University of Madras, 1978.

https://archive.org/

https://sa.wikisource.org/wiki/

https://sanskritdocuments.org/scannedbooks/

https://archive.org/details/booksbylanguage_sanskrit